CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Almira 3
Shelf 3
8

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

n Public Domain. Digitization by eGangotri.Fundin

नं. ५३०२ प्रामाण्यवादः
॥ ५३०३ केवलान्वयिवादः
॥ ५३०४ बाधरहस्यम्
॥ ५३०५ विशिष्टवैशिष्ट्यबोधवादः
॥ ५३०६ अनुमानस्य प्रमा-
णान्तरत्वविचारः

102

al Sanskrit University, Balmeeki Campus, Kathma

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

1. Smriti Sanskara Karya Karanabhava Vichara
2. Ishvara Mana Vichara
3. Anumana Pramanantara Vichara
4. Vidhi Svarupa Vidhi Of Gadadhara Bhattacharya
5. Praga Bhava Vibda

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नं० ४३०२

प्रागभाववादः

गदाधरः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रीगणेशाय नमः॥ ॥घटगोचरस्मृतिं प्रति घटगोचरज्ञानत्वेन हेतुता घटनिर्विकल्पकादपि घटस्मरणापत्तेः। अवच्छिन्नविषयताशा लित्वेन हेतुत्वं कल्पयित्वा तद्वारणेऽपि इदंत्वेन घटज्ञानादिदंत्वेन घटत्वेन तत्स्मरणापत्तेः। न च घटत्वेन स्मरणं प्रति घटत्वज्ञानत्वेन हेतुत्वकल्प नादेव न तादृशस्मरणापत्तिरिति वाच्यं। घटत्वेन पटादिज्ञानस्यापि तदानीं सत्त्वेन तथापत्तिसंभवात्। किंतु घटत्वेन तत्स्मरणं प्रति घट त्वेन तत्प्रकारकज्ञानत्वेन हेतुता स्वजन्यसंस्कारः प्रत्यासत्तिः। एवं तथाविधसंस्कारत्वेन तथाविधस्मृतित्वावच्छिन्नं प्रति विषयाभिश्चिनस्मृतित्वा वच्छिन्नं प्रति वा व्यापारीभूतसंस्कारस्य हेतुता। तथाविधसंस्कारं प्रति तथाविधज्ञानत्वेन हेतुता वाच्या। अन्यथोपेक्षात्मकज्ञानात्स्मरणाप त्तिः। न चोपेक्षान्यत्वेन हेतुत्वकल्पनान्नापत्तिरिति वाच्यं। उपेक्षान्यत्वस्य दुर्वचत्वात्। न चोपेक्षात्वं जातिः चाक्षुषत्वादिना संकरात्। नापि सं स्काराजनकत्वमुपेक्षाज्ञानव्यावृत्तसंस्कारजनकतावच्छेदकधर्माभावात्। न च ज्ञानमिष्टं तत्तद्व्यक्तित्वं संस्कारजनकतावच्छेदकं तादृ शजनकतासंबन्धेन संस्कारवदन्यत्वमेवोपेक्षात्वं तथा च तादृशसंबन्धेन संस्कारवत्त्वेनैव हेतुत्वं पर्यवसितमिति वाच्यं। अननुगतजनक ताघटितत्वेन कारणतावच्छेदकस्याननुगमात्। अत्र पुनः। स्मृतिं प्रत्येव ज्ञानस्य तद्व्यक्तित्वेन हेतुत्वं जनकतासंबन्धेन तादृशस्मृतिम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नैवैतेव संस्कारं प्रति हेतुत्वेन विनिगमनाविरहोऽपि प्रसक्तः। एवं संस्कारं प्रति स्मृतिजनकत्वेन जनकत्वे ज्ञानस्य स्मृतिजनकताज्ञानाधी
नसंस्कारजनकता ज्ञानसंस्कारजनकताज्ञानाधीनमेव स्वजन्यसंस्कारसंबंधेन स्मृतिजनकता ज्ञानं इत्यपेक्षायाश्चाप्रसंगादिति चेन्न। अ
नायत्या प्रातिस्विकरूपेणैवोपेक्षात्मकज्ञानव्यक्तीनां भेदकूटः कारणतावच्छेदककोटौ निवेश्यते स्मृत्वा चाक्षुषत्वादिव्याप्यजातेर्वोपेक्षात्मज्ञा
ग्रि० नत्वः। न तु कश्चित्प्रायोगिकाभ्यासीयांशेऽभेदजनकतावच्छेदककोटौ निवेश्यते न च जातेः सांशिकत्वं मिथ्या आंशिकोपेक्षाज्ञानेनादृशज्ञा पत्नि ४
नस्वीकारे आंशिकोपेक्षाज्ञानात्स्मरणापत्तिरिति वाच्यं। आंशिकोपेक्षाज्ञानानां अनंतव्यक्तीनां प्रातिस्विकरूपेणैव भेदनिवेशात्। एवम
पि सर्वांशोपेक्षासहस्राणां तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदसहस्राणि निवेशनीयानीति। नन्वस्त्वेवमपि तथापि धजातीनांअ
नुगमनियामकाभावात्। तुल्यत्वात्। आहार्यत्वादेरपि जातित्वापत्त्या सांकर्यापत्तेः। आहार्यत्वस्यापि उपाधिरूपस्यैव
त्वात्। सर्वांशोपेक्षात्मकज्ञानभेदानां संस्कारजनकतावच्छेदककोटावेव निवेशनं तेन ज्ञानानिष्ठस्मृतिजनकतावच्छेदककोटौ न त
संस्कारविरहेणैव स्मृतिविरहोपपत्तेः। न च विनिगमनाविरहः संस्कारजनकतावच्छेदककोटौ भेदनिवेशे उपेक्षात्मकज्ञानेष्वो १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ऽप्रामाणिकानंतपंडसंस्कारकल्पनापत्तेः।आंशिकोपेक्षामेवास्तुनैः सहविषयेऽप्यविशेषणताभावेविनिगमनाविरहमिति यास्मृतिजनकताया
मेवनिवेश्यंते। न च तत्रविनिगमनाविरहः।आंशिकोपेक्षाज्ञानात्‌अन्यांशेस्मरणोदयात् तदंशेधर्मत्वेतुसंस्कारस्याकल्पकत्वात्। संस्का
रजनकतायांआंशिकोपेक्षात्मकज्ञानव्यक्तिमेवनिवेशेपेनहिस्वविषयकत्वधर्म्ममात्रकल्पने।इत्थयात्तुधर्म्मिकल्पनमितिधर्म्मिकल्पनातो
धर्मिकल्पनालघीयसीत्येतस्मैवविनिगमकत्वात्। एतेन ज्ञानस्मरणयोर्ज्ञानत्वस्मरणत्वाभ्यामेवकार्यकारणभावो। नतुविषयंनिवेश्य
घटज्ञानघटस्मृतेः संस्काराभावेनापत्तिवारणात् न च संस्कारस्मरणयोः कार्यकारणभावेविषयनिवेशे। नत्वैयत्तद्वयस्यैवविनिगमनावि
ग ८ रहइतिवाच्यं। संस्कारस्मरणयोः कार्यकारणभावेतदनिवेशेघटगोचरोपेक्षाज्ञानसत्त्वेपटसंस्कारसत्त्वेघटस्मरणापत्तेः। न च संस्का
रजन्यापारसंबंधेनघटज्ञानाभावान्नापत्तिरितिवाच्यं। घटांशेऽपेक्षात्मकपटांशेऽपेक्षात्मकज्ञानजन्यसंस्कारसत्त्वेघटस्मरणाप
त्तेरित्येवाफक्किकापरास्ता। आंशिकोपेक्षामेवस्तांस्मृतिजनकतायामेवनिवेशात् घटांशेऽपेक्षाज्ञानादपिघटगोचरसंस्कारोदयात्
तदनंतरंघटस्मरणापत्तेः तदन्यपटज्ञानांतरसत्त्वादिति। घटस्मृतिंप्रतिघटांशेऽपेक्षान्यज्ञानत्वेनहेतुतायाआवश्यकत्वात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संस्कारस्मरणयोः कार्यकारणभावेऽपि विषयानिवेशोऽपि सम्भवात् । न च स्मृतित्वसंस्कारत्वाभ्यामेव कार्यकारणभावः । पटगोचरसंस्का
रसत्वेऽपि घटांशे उपेक्षात्मकघटज्ञानस्य संस्कारसंबंधेनासत्वादेव नापत्तिः यथा चैवं संस्कारस्य तद्विषयकत्वमवश्यमिति सन्तु वेयग्रे विवेचयि
ष्यते नन्वेवं अथ मया गमितिलक्षणस्य विशिष्टस्मरणेऽभिव्याप्तिः संपादकस्य संस्कारादुपपत्तेश्चेत्यादिग्रन्थस्यासंगतिः स्मृतिजनकतायां
आंशिकोपेक्षान्यत्वनिवेशात् अनुमितिजनकतायां च निवेशादिति वाच्यं तावतापि तेरभावात् । वस्तुतस्तु अग्रे तत्संगमनप्रकारो दर्शयि
ष्यते । एवं अनन्तत्वधर्मितावच्छेदकतत्कालविशेष्यकघटत्ववच्छिन्नप्रकारकस्मृतिं प्रति तथाविधनिश्चयत्वेन हेतुतानतो २
नसंशयाकारज्ञानात् स्मरणापत्तिः अथ संस्कारजनकतावच्छेदककोटावेव निश्चयत्वं निवेश्यं । तत एव स्मरणतासंभवे किं स्मृतिज
नकतायां तन्निवेशेनान्यविनिगमनाविरहः । संशयादपि धर्मिणो विशकलितकोट्योरपि स्मरणोदयेन संस्कारकल्पनायास्तत्राव
श्यकत्वादिति वाच्यं एवं सति संस्कारजनकतावच्छेदकेन तन्निवेशे संशयजन्यसंस्कारे विशिष्टविषयताकल्पन एव गौरवात् नचे
पेक्षाभेदे । तद्विशेष्यविशेषणभावे विनिगमनाविरह इति स्मृतिजनकतायामेव तन्निवेश इति वाच्यं । तथापि आंशिकोपेक्षाभेदे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तुरविशेष्यविशेषणभावे विनिगमनाविरह इति स्मृतिजनकतायामेव तन्निवेश इति वाच्यं। तथापि आंशिकोपेक्षामूढे सहजनन
प्रसंगात्। इत्थमेवं स्मृतिजनकतावच्छेदककोटौ निश्चयत्वानिवेशे संशयानंतरं स्मृतिवारणासंभवात्। न च संस्काराभावादेव न स्मृतिरि
ति वाच्यं धर्म्यंश एव संस्कारसत्वात्। न च भूतलत्वावच्छिन्नविशेष्यतानिरूपितघटप्रकारताशालिसंस्कारविरहान्न तथाविधस्म
रणमिति वाच्यं। तथात्वेन संस्कारस्य हेतुत्वाकल्पनात्। स्मृतिं प्रति संस्कारत्वेनैव हेतुत्वात्। तदवच्छिन्नस्य धर्मिगोचरसंस्कार
स्यैव सत्वात् तादृशापत्तिसंभवात्। तस्मात् स्मृतिजनकतावच्छेदककोटौ निश्चयत्वनिवेशनमावश्यकमेवेति। अथोपेक्षात्म
त्वेन स्मृतिजनकतावच्छेदकमपि तु उपेक्षात्मकज्ञानात् स्मृतिवारणाय संस्कारं प्रति उपेक्षाज्ञानानां तत्तद्व्यक्तित्वेन प्रतिबंधक
त्वमास्थीयते न चोपेक्षात्मकज्ञानानंतरं अपेक्षात्मकज्ञानात् संस्कारोदयप्रसंग इति वाच्यं। उपेक्षात्मकज्ञाननाशानंतर
मेव तत्र संस्कारोदयात्। न च यत्र द्वादशोपेक्षात्मकज्ञानानंतरं तत्र सचापेक्षात्मकं तद्भिन्नी यत्र रोत्पन्नरूपेक्षानंतरं तत्र संस्का
रोदयप्रसंग इति वाच्यं। तदुपेक्षात्मकव्यक्तेः प्रतिबंधकत्वकल्पने क्षतिविरहात्। न चानंतगतमिमाशंकनीयं तत्तद्व्यक्ते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

षत्वाविशेष्यभावेविनिगमनाविरहेणामहागौरवात्। इत्थंचविशिष्टस्मरणेऽतिव्याप्तिः। आंशिकोपेक्षात्मकज्ञानानामपिसंस्का
रप्रतिबंधकत्वेतेषामुपपन्नोस्मृतिजनकतावच्छेदकतायांनदृष्टिवेशात्। इयानुपरंभेदः सर्वांशोपेक्षायाः प्रतिबध्यतावच्छेदकंसंस्का
रत्वंआंशिकोपेक्षायास्तत्गोचरसंस्कारत्वमितिनातोऽन्यगोचरसंस्कारेव्यभिचारः संस्कारात्तुत्यत्तेवेत्यादिपंक्तिरपिसद्भुव्या
ख्यातंशक्यतेइत्थंयदिविभाव्यते। नदासंस्कारनिष्ठस्मृतिजनकतायांविषयनिवेशआवश्यकः अन्यथाघटांशेऽपेक्षातोपि
पदत्वावच्छिन्नतत्पटविशेष्यकसंस्कारसत्वात् घटस्मरणापत्तिः संस्कारसंबंधेनघटज्ञानसत्वात्। इत्थंचनिश्चयत्वमपिसंस्का
रजनकतावच्छेदककोटौदेयंनिवेश्यतोसंशयाज्जलत्वावच्छिन्नधर्मिकघटप्रकारकसंस्काराभावादेवनाशतस्मरणापत्यसं २
भवात्। नचोपेक्षयात्मकसंशयस्यापिविशिष्टसंस्कारंप्रतिबंधकत्वमस्तुकिंनदर्यतेनहेतुत्वेनेतिसंशयानंतरंस्मृत्यनिश्चयः नत्व
विनष्टएवसंशयेसंस्कारउत्पद्यतइतिवाच्यं। अपेक्षाउपेक्षात्मकसंशयानंतरंतदनात्मकनिश्चयस्तत्रयत्रचसंशयानंतरंस्मोत्या
प्रामाण्यविषयकोनिश्चयस्तदनंतरमुत्पन्नः संशयस्तत्रसंस्कारानुदयप्रसंगात्॥ अथज्ञानस्मरणायोग्नीनन्यस्मरणानाम्यापे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

य कार्यकारणभावोस्तु ज्ञानविषयनिवेशो निरर्थक इति वेदितव्यम् एव नन्तु॥ तथा सति स्मृतिविरहात् संशयात्मकसंस्काराभावाद्
उद्गतो बाधकादिविशिष्टसंस्काररूपायाः स्मृतिसामग्र्या विशिष्टस्मरणोत्पत्तिः स्यात् अत एवं प्रतिबन्धकतायां संस्कारे तद
भावप्रकारकत्वान्निवेशोऽपि लाघवेन चैवं तन्मतेऽपि तदभावप्रकारकत्वं प्रतिबन्धकतावच्छेदककोटौ न निवेश्यत इति
वाच्यं। संशयाकारसंस्कारत्वेऽनुभवोपपत्तये तन्निवेशस्यावश्यकत्वात्। अथ वह्नित्वनिश्चयत्वेन घटप्रतियोगिकाभावा
प्रकारकत्वान्न घटाभाववद् घटवद्भूतलमित्याकारकज्ञानात् घटवद्भूतलमिति स्मरणोत्पत्त्यप्रसंगात् नचापि घटत्वावच्छिन्ना
भावाप्रकारकत्वं। नीलघटवद्वेति संशयान्न घटस्मरणापत्तेः। न च घटत्वपर्याप्तप्रकारताशालिज्ञानत्वेन तथाविधस्म
रणं प्रति हेतुतानापत्तिरिति वाच्यं नीलघटवदिति ज्ञानादपि नीलांशे भ्रमो घटवदंशे यां घटवदिति स्मरणोत्पत्तिः स्यात्। तथा हेतुता
याः प्रलपितमात्रत्वात्। अथ केचित् संशये उभयप्रकारतानिरूपिता एकैव विशेष्यता सम्पन्नतु प्रकारभेदात् विशेष्यताभिन्ना
तथा चाभावप्रकारतानवच्छिन्न(?) भूतलत्वावच्छिन्नविशेष्यताशालिज्ञानत्वेन भूतलत्वावच्छिन्नधर्मिकघटप्रकारकस्मृतिं प्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निहेतुत्वेनैवकल्पितोपश्चात्कुः॥ नद्विपिनमयनवस्तुनस्तुसंस्कारेणनकतायामेवविनि। अथपनन्निवेशान्नूनकाप्यनुपपत्तिः तथा
हि घटत्वावच्छिन्नधर्म्मानवच्छिन्नपटत्वावच्छिन्नप्रकारतावच्छिन्नभूतलत्वावच्छिन्नविशेष्यताशालिघटत्वावच्छिन्नाभावप्रका
रकज्ञानत्वेन हेतुताकल्पने। नीलघटवद्भूतलाकारकज्ञानात् नीलघटवद्भूतलाकारकसंस्कारः एव जायते। ननु कदाचिद्दपि घटव
द्भूतलाकारकः संस्कारस्य निहेतुतायां तु पर्य्याप्त्यनिवेशात् नीलांशे मोषदशायां घटवदितिस्मरणमितिनकाप्यनुपपत्ति
रिति। न च नीलवद्भूतलाकारको नीलांशे उपेक्षात्मकान् घटवदिति संस्कारोदयात् कथं संस्कारजनकतायां पर्य्याप्तिनिवेशः स्यादि ४
ति नत्रैव नीलघटवदिति संस्कारेणोत्पद्यते नीलसंस्कारं प्रति नीलांशे उपेक्षाज्ञानस्य प्रतिबंधकत्वकल्पनात् अन्यथा तदनंतरं नी
लस्मरणापत्तेरिति वाच्यं। नीलस्मरणं प्रति संस्कारस्य जनकतायां तन्मंस्कारभेदनिवेशादेव तादृशस्मरणवारणे तज्ज्ञानस्य
नीलसंस्कारं प्रति प्रतिबंधकत्वाकल्पनात् तदानीं नीलघटवद्भूतलाकारकसंस्कारस्यैवोत्पत्तेरिति संप्रगाल्लोकयामः। अ
थ निश्चयत्वे संशयाकारस्मरणवारणायैव निवेश्यते। तथा च घटाभाववत्त्वज्ञानस्मरणं प्रति घटाभावप्रकारकज्ञानस्यैह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तुतायां निश्चयत्वनिवेशे नैव संशयाकारस्मरणवारणं शक्यं उभयकोटिकज्ञानस्यैव संशयत्वनया घटवत्त्ववेशि संशयस्य घट
भावानिश्चयात्मकतया तन्नो घटाभावस्मरणात् उदये नैव संशयाकारस्मरणसंभवादिति घटवत्त्वज्ञाने हेतुतायां निश्चयत्व
निवेशो निरर्थकः इत्थं च विशिष्टस्मरणे अनियाभिरपि संगच्छते। उक्तयुक्त्या वह्निव्याप्यधूमवत्त्वास्मरणे न ज्ञाने हेतुताया
मपि निश्चयत्वानिवेशात्। न च संशयादेः कोटिकस्मरणमपि न जायत इति वाच्यं। प्रमाणाभावात् नास्मेनादृशानुभव
विषये नगुरुहणा निश्चयत्वेन हेतुत्वमभ्युपेयते। श्रुतिस्मृतिं प्रति निश्चयत्वेन हेतुत्वमंगीकुर्वतो। दीधितिकृतोऽपि नि
श्चयत्वानिवेशस्य संशयाकारकस्मरणवारणमेव फलमित्याशयो अवसीयते। न च घटवत्त्वाज्ञाने हेतुतायामपि निश्चय
त्वं निवेशस्य संशयाकारकस्मरणवारणासंभवेनद्वैवचित्त्वनिवेशपदे इति विनिगमनाभावादुभयत्रैव निवेशः स्यादिति वा
च्यं। घटवत्तानिश्चयस्य घटाभाववत्ताबुद्धित्वप्रकारतात्वस्य त्वरूपस्य घटाभाववत्ज्ञानीयनिश्चयत्वापेक्षया गुरुशरीर
त्वात्। तेनैव च निश्चयत्वस्य निवेशापि तु मुचिततत्वात्॥ वस्तुतस्तु न कुत्रापि निश्चयत्वानिवेशः। निश्चयत्वेन हेतुत्वेऽपि प्र॰

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्येकनिश्चयजनितसंस्काराभ्यां नियतो बोधकसमवधानदशायां संशयाकारस्मरणवारणायैककोटिकस्मरणसाम
ग्र्या अपरकोटिस्मरणं प्रतिप्रतिबंधकतायां आवश्यकत्वेन संशयाकारकज्ञानजन्यसंस्कारादपि संशयाकारस्मरण
वारणादिति चेन्न। संस्कारजनकतावच्छेदककोटौ निश्चयत्वानिवेशे संशयाकारज्ञानात् संशयाकारसंस्कारोत्पत्तौ अ
ननुगतकालादीनामेव नाशकत्वं स्वीकार्यं। संशयाकारस्मरणस्य कदाप्यनुदयादस्याविधस्मरणस्य च समानाप्र
कारकत्वेन तत्संस्कारनाशकतया अनुगतहेतुतया तन्नाशानिर्वाहादिति गौरवात्। संशयात्मकोपेक्षात्मकज्ञाना ५
देकैककोटिबोधकदशायां एकैककोटिस्मरणवारणाय तत्तज्ज्ञानानां प्रातिस्विकरूपेणानंतभेदनिवेशे च गौरवात्
अनुगतसंशयात्मत्वरूपनिश्चयत्वनिवेशे लाघवाच्च। एतेन पूर्वोक्तफक्किका निरस्ता न चोपेक्षात्मत्वमपि अनुगतमे
व निवेशयितुं शक्यते प्रागेव दूषितत्वात्॥ ननु संस्कारे किं मानं। अनुभवध्वंसस्य यापारत्वसंभवात्। प्रतियोगिभा
वयोरेकत्राजनकत्वप्रवादस्याप्रमाणाभावे नाश्रद्धेयत्वात्। न च स्मृतिप्रतिबंधकत्वापत्तिः। कारणीभूताभावप्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तियोगित्वस्यैव प्रतिबंधकतापदार्थत्वादिति वाच्यं। संसर्गाभावत्वावछिन्नाया अभावत्वावछिन्नाया वा जनकतायाः प्र
तियोगितावछेदकत्वं संबंधेनावछेदको यो धर्मस्तदवछिन्नस्य प्रतिबंधकपदार्थत्वात्। अत्र च अभावत्वेनाजनकत्वादि
ति न च ज्ञाने नष्टे तीयक्षणे जनितसंस्कारेण स्मरणोदयात् ध्वंसस्य व्यापारत्वासंभवात्। फलस्य प्राक्काले ऽनुभवध्वं
साभावादिति वाच्यं। तत्रापि क्षणांतरे स्मरणाभ्युपगमादिति चेन्न संस्कारानभ्युपगमे उपेक्षात्मकज्ञानादपि स्मरणा
पत्तेः। न च स्मृतिं प्रत्युपेक्षान्यज्ञानत्वेनैव हेतुत्वकल्पनान्नोपपत्तिरिति वाच्यं गौरवात्। न च भवन्मते उपेक्षात्मक
ज्ञानात्। संस्कारद्वारा तज्जनकताया उपेक्षान्यत्वनिवेशस्यावश्यकत्वेन साम्यमिति चेन्न अंतर्गडुना स्मृतिजनक
तावछेदककोटौ तस्य वेशेनैव सर्वसामंजस्ये इति वाच्यं। संस्कारं प्रति उपेक्षान्यज्ञानत्वेन हेतुताकल्पनस्य उदासीनत्वे
न फलमुखत्वात्। स्मृतिजनकतावछेदककोटिप्रविष्टांशिको पेक्षाज्ञानभेदकूटेन सर्वांशोपेक्षात्मकज्ञानभेदकूटेन
सहविशेषणविशेष्यभावे विनिगमनाविरहेण गौरवं संपादकानामनिवेशो न्याय्य वाच्य। सर्वांशोपेक्षाभेदस्ता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मेवकारणतावच्छेदकीभूतसंस्कारं प्रति ज्ञानस्य हेतुतायाः कल्पयितुमुचितत्वात्। एवं संस्कारस्वीकारे संस्कारं प्रति उपे
क्षाज्ञानस्य प्रतिबंधकतयोपपत्तौ स्मृतिजनकताया उपेक्षाभेदसहस्राणां विशेषणविशेष्यभावे विनिगमनाविरहेणा
गौरवसंपादकानामनिवेशे लाघवात्। नच स्मृतिं प्रति उपेक्षाज्ञानानां प्रतिबंधकत्वं कल्प्यते इति वाच्यं कालांतरे स्मरणा
पत्तेः। नवतनध्वंसानां प्रतिबंधकत्वमभ्युपेतमिति वाच्यं। यदा कदाचित् जातोपेक्षानानंतरं तदनात्मकज्ञानोत्पत्तावपि स्मरणा
उदयप्रसंगात्। प्रकारांतरानुसरणे अतीव गौरवं एवं विपरीतज्ञाननाश्यत्वेपि संस्कारस्य सिद्धिः। अन्यथा विपरी ६
तज्ञानोत्तरमपि अनुभवनाशसत्वे स्मरणापत्तेः। मम तु विपरीतज्ञानेन संस्कारनाशात् संस्काररूपकारणविर
हादेव स्मरणावारणात्। नच विपरीतज्ञानध्वंसस्य प्रतिबंधकत्वात् नापत्तिरिति वाच्यं। विपरीतज्ञानोत्तरोत्पन्ना
नुभवनाशात् स्मरणानुदयापत्तेः। अथ भूतलत्वावच्छिन्नधर्मिकघटवत्तास्मृतिं प्रति भूतलत्वावच्छिन्नधर्मिक
घटवत्ताज्ञानध्वंसाभावविशिष्टभूतलविशेष्यकघटाभावप्रकारकज्ञानध्वंसत्वेन प्रतिबंधकताद्दशाभावस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वप्रतियोगिविशिष्टस्वसमानाधिकरणसंबंधावच्छिन्नप्रतियोगिताकः स्वप्रागभावविशिष्टस्वसमानाधिकर
णसंबंधावच्छिन्नप्रतियोगिताको वा ग्राह्यः। तेन विपरीतज्ञानोत्तरं ग्राह्यज्ञानोदयेपि पूर्वज्ञानध्वंससत्त्वान्न स्म
रणापत्तिः। अथ वा विपरीतज्ञानध्वंसाभावविशिष्टग्राह्यध्वंसस्य हेतुत्वान्न विपरीतज्ञानोत्तरं स्मरणापत्तिः। विप
रीतज्ञानध्वंसाभावश्च स्वप्रागभावविशिष्टस्वसमानाधिकरणसंबंधावच्छिन्नप्रतियोगिताको ग्राह्यः। अतो
न विपरीतज्ञानोत्तरोत्पन्नानुभवनाशात् स्मरणानुपपत्तिरिति चेन्न। तदपेक्षया संस्कारप्रति विपरीतज्ञानस्य जनकत्व
कल्पनस्यैव लाघवेनोचितत्वात्॥ अथोद्बोधकानामनुगतरूपेणैव हेतुत्वकल्पनात् विपरीतज्ञानानंतरं फ
लानुदयेनोद्बोधकस्यैवाकल्पनान्न स्मरणापत्तिः। न च संबंधिज्ञानादीनामेवानुगतहेतुतायाः संभवात् विप
रीतज्ञानोत्तरं तादृशानुगतोद्बोधकत्वे स्मरणापत्तिरिति वाच्यं। तेषामपि व्यक्तिपौर्वापर्यनिर्वाहाय तत्तद्व्यक्तित्वे
न हेतुत्वकल्पनावश्यकत्वात् विपरीतज्ञानोत्तरवर्त्तिनां तत्फलाभावेन हेतुत्वकल्पनाभावात्। आपत्त्यभावा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दिति चेन्नैवं तेषां तत्तद्व्यक्तित्वेन रूपेणाननुगतत्वेपि सामान्यसामग्रीतः सामान्यधर्मावच्छिन्नोत्पत्तेः। न च तद्विशेषसामग्रीसहकृतमाया
एव सामान्यसामग्र्या फलजनकत्वान्त्वदीययुक्तिर्वाच्यं। अनन्ततत्तद्व्यक्तीनां प्रातिस्विकरूपेण सहकारित्वकल्पने गौरवात्।
अन्यथाउपेक्षात्मकज्ञानानन्तरं सम्भिन्नबोधकविरहितैर्वा स्मरणसंभवे उपेक्षात्मकत्वेनापि हेतुताविलयप्रसंगात्। उक्तयुक्त्या
अनुभवादिहेतुताविलयापत्तिश्चेति वदंति। अथ संस्कारस्य सविषयकत्वे किं मानं न च स्मृतिविषयतानियामकत्वेन तद्विष
यतासिद्धिः। ज्ञानविषयतायास्तन्नियामकत्वात्। न च विपरीतज्ञाननाश्यतावच्छेदकतया तत्सिद्धिः। घटज्ञानजन्यसंस्कारत्वस्यै
व घटाभाववत्ताज्ञाननाश्यतावच्छेदकत्वात्। न च तादृशगुरुधर्म्मापेक्षया घटगोचरसंस्कारत्वस्यैवावच्छेदकत्वस्योचितत्वात्।
संस्कारविषयतासिद्धिरिति वाच्यं। लौकिकचाक्षुषजन्यसंस्कारस्यानुमादिविपरीतज्ञानानाश्यतया ज्ञानविशेषजन्यतायाः तत्रा
वश्यं निवेश्यत्वात्। न च स्मृतिनाश्यतावच्छेदकतया तत्सिद्धिः। घटज्ञानजन्यसंस्कारस्य पटगोचरस्मरणानाश्यत्वात् घटगोचरस्म
रणस्य घटगोचरसंस्कारत्वस्यैव नाश्यतावच्छेदकत्वात् घटज्ञानजन्यसंस्कारत्वस्य तथात्वे गौरवादिति वाच्यं। विपरीतज्ञानादिज

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्यसंस्कारनाशे व्यभिचारवारणाय स्वसमानाधिकरणत्वविशिष्टकालिकविशेषणतासंबंधेन स्मरणविशिष्टसंस्कारनाशत्वस्य
जन्यतावच्छेदकताया आवश्यकत्वेनैव व्यभिचारवारणे विशेषणनिवेशं विनाप्युपपत्तेः। न च मास्तु व्यभिचारः। एवमपि कदाचिद्घ
टज्ञानजन्यसंस्कारनाशः कदाचित्तदजन्यस्येति नियामकाभाव इति वाच्यं। प्रतियोगितासंबंधेन संस्कारनाशं प्रति जनकतासंबंधेन
स्मरणत्वेन हेतुत्वाभ्युपगमात् घटज्ञानजन्यसंस्कारस्य पटस्मरणाजनकतया न च जनकतासंबंधेन स्मरणाभावान्नातिप्रसंग इति
चेन्न। ज्ञानजन्यतावच्छेदकतया संस्कारविषयतासिद्धिः। तथा हि संस्कारं प्रति यदि ज्ञानस्याविषयाभिन्नत्वेनैव न ज्ञानत्वेन हेतु
ता तदा उपेक्षात्मकज्ञानात् संस्कारवारणाय घटपटादिविषयकानंतोपेक्षाभेदानामेकत्र निवेशे गौरवात्। परं तु घटविषयक
ज्ञानत्वादिना जनकताजन्यतावच्छेदकं च यदि संस्कारत्वं तदा व्यभिचार इति घटविषयसंस्कारत्वमेव नथेति तत्सिद्धिः। यदि च उ
पेक्षाज्ञानभेदानां कारणतावच्छेदककोटौ न निवेशः। किं तु तादृशज्ञानात् संस्कारादिवारणाय संस्कारान् प्रति तेषां प्रतिबंधकत्वक
ल्पनमेव समीचीनं लाघवात्। तथा च संस्कारविषयतायां उक्ताभाव इति विभाव्यते। तथापि आंशिकोपेक्षाज्ञानप्रतिबध्यतावच्छे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दकतया संस्कारविषयतासिद्धिः तथाहि सर्वांशोपेक्षाज्ञानस्य प्रतिबध्यतावच्छेदकं संस्कारत्वं तत्सत्वे ऊर्ध्वांशे संस्कारोदयात्
नचतत्र आंशिकोपेक्षाज्ञानस्य प्रतिबध्यतावच्छेदकं यदि संस्कारत्वं तदा धर्म्यंशेपि संस्कारानुदयप्रसंगः इति तत्तद्विषयकसंस्कारं
प्रति तत्त [redacted] त्वेन प्रतिबंधकत्वं कल्प्यमिति संस्कारविषयतासिद्धिः एवं संस्कारस्याविषयतानुपगमे घटांशे उपेक्षा
त्मकज्ञानानंतरं घटस्मरणापत्तिः । व्यापारसंबंधेन घटज्ञानसत्वात् । नचोपेक्षात्मज्ञानत्वेनैव संस्कारसंबंधेन हेतुत्वोप
गमान्नापत्तिरिति वाच्यं तथापि घटस्मरणादपि घटज्ञानजन्यसंस्कारनाशापत्तिः । नचोक्तरीत्या प्रतियोगिता संबंधेन संस्का ८
रनाशं प्रति जनकता संबंधेन स्मृतित्वेन हेतुत्वात् तद्दोषवृत्तिरिति वाच्यं जनकतायाः स्वरूपयोग्यतारूपायाः प्रत्यासत्तित्वे घटज्ञान
जन्यसंस्कारस्यापि संस्कारत्वेन निखिलस्मृति स्वरूपयोग्यतया तादृश संबंधेन घटस्मृतेरपि तत्र सत्वात् । नच घटस्मृतिं प्र
ति घटज्ञानजन्यसंस्कारत्वेनैव स्वरूपयोग्यता इति वाच्यं । तदपेक्षया लाघवेन घटकविषयसंस्कारत्वेनैव तथात्वकल्पनाया औ
चित्यात् प्रकृते न सिद्धिः । नापि फलोपधायकतायाः प्रत्यासत्तित्वं । अननुगमात् । यदि च सामानाधिकरण्यमेव नाशकतावच्छेद

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कप्रत्यासत्तिः तथापि न तन्निस्तारः। तेन संबंधेन घटस्मरणस्य घटज्ञानजन्यसंस्कारे सत्वात्। नन्वाशापत्तेर्वारणादेव तन्निसिद्धिः। न
नुभवत्वेनैव घटादिगोचरसंस्कारनाशत्वस्य जन्यतावच्छेदकत्वेपि घटधर्म्मावच्छिन्नस्यैव घटसंस्कारे आपत्तिः कारणतावच्छेदक
प्रत्यासत्यानन्तकारणसत्वादिति वाच्यं। तादृशसंस्कारनाशत्वावच्छिन्नं प्रति तादात्म्यप्रत्यासत्या तादृशसंस्कारत्वेन हेतुत्वकल्प
नात् न च सामानाधिकरण्यस्य स्वरूपयोग्यताया वा प्रत्यासत्तित्वे स्मरणजन्यसंस्कारस्य क्षणिकत्वापत्तिः स्वजन्यसंस्कारे
तादृशप्रत्यासत्त्यां स्मरणसत्वात् अनन्यथासिद्धतायाः प्रत्यासत्तित्वं तत्संस्कारनाशत्वं च जन्यतावच्छेदकं वाच्यमिति कु
तः संस्कारस्य विषयतासिद्धिरिति वाच्यं। क्षणिकसंस्काराभ्युपगमे सत्यभावात्। तृतीयक्षणोत्पन्नसंस्कारादेव स्मरणनिर्वा
हात्। अस्तु वा अननुगतोपधायकतायाः प्रत्यासत्तित्वं। तत्तत्संस्कारनाशत्वानां जन्यतावच्छेदकत्वं चापेक्ष्य लाघवाद्विनश्यदव
स्थज्ञानत्वेनैव वा संस्कारहेतुत्वं विनश्यदवस्थत्वं च तत्त्वाश्रयनाशविशिष्टत्वं आश्रयस्यात्मनो नाशासंभवात्। अपि तु स्वप्रा
गभावविशिष्टकालिकविशेषणतयात्मनि विशिष्टत्वमतो नाननुगमः। तथा च तृतीयक्षणएव ज्ञानेन संस्कारजननात्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भलिकसंस्कारापत्तिः। अथवा स्वसमानाधिकरणावच्छिन्नस्वप्रागभावसंबंधेन स्मृतित्वेन नाशकतया अभ्युपगमात् स्वजन्यसंस्का
रस्य नातो नाशः। स्वप्रागभाववत्त्वलक्षणसंबंधाभावात्। वस्तुतस्तु शब्दादीनां क्षणिकतावारणाय प्रतियोगितासंबंधेन नाशत्वावच्छि
न्नं प्रति स्वप्रतियोगित्वसंबंधेन नाशत्वेन हेतुत्वकल्पनया आवश्यकत्वे तत एव सर्वत्र क्षणिकतावारणसंभवत्ति। एवं अनुमित्यात्मक
विपरीतज्ञानस्य कार्यतावच्छेदकं यदि संस्कारनाशत्वं न तदा अनुमित्यात्मकविपरीतज्ञानात् लौकिकचाक्षुषजन्यसंस्कारनाशापत्तिः
यदि च लौकिकज्ञानाजन्यसंस्कारनाशत्वं तत्कार्यतावच्छेदकं तदा घटाभाववद्भूतलमिति ज्ञानाद् घटगोचरसंस्कारनाशप्रसंग। न च ९
लौकिकज्ञानाजन्यघटवद्भूतलमिति ज्ञानजन्यसंस्कारनाशत्वावच्छिन्नं प्रति घटाभाववद्भूतलमिति निर्णयत्वेन हेतुत्वमतो न दोष इति वा
च्यं। जन्यत्वादिनिवेशगौरवात् लाघवात् तदंशे लौकिकज्ञानाजन्यतद्विशेष्यकतत्प्रकारकसंस्कारनाशत्वावच्छिन्नं प्रति तद्विशेष्यकतत्
प्रकारकनिर्णयत्वेन हेतुत्वोपगमात् तदवच्छिन्नजन्यतावच्छेदकघटकतया संस्कारविषयतासिद्धिरिति एवं संस्कारविषयताभ्युपग
मे घटस्मरणादिसामान्यसामग्र्या उद्बोधकादिविशिष्टघटज्ञानजन्यसंस्कारत्वेन प्रतिबंधकत्वं अनुभवं प्रति तत्सामग्रीयामिति गौरवं म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्नमेघटविषयसंस्कारत्वेनानिलाघवात्। नचमन्मतेपिसंस्कारसंबंधेनघटस्मरणत्वेनप्रतिबंधकत्वात्नगौरवंशक्तिवाच्यं संस्कारा
दिनाघपदिस्मरणकालेसंस्काररूपशक्तिबंधकाभावसत्वेनप्रतिबध्यत्वाभापत्तेरिति।संस्कारजन्यस्मरणस्यघटगोचरस्मरणत्वेन
हेतुताजन्यतावच्छेदकंघटविषयकसंस्कारनाशत्वंप्रत्यासत्तिर्विचारितमेव।अथस्मरस्यसंस्कारनाशकत्वेमानाभावःस्मरणेनापिसं
स्कारजननात्स्मरणोत्तरमपिस्मरणोदयात्पूर्वसंस्कारसत्वेपिक्षतिविरहादितिचेन्न।अनुभवानंतरंयत्रोपेक्षात्मकस्मर
णंतदनंतरंस्मरणवारणायतथात्वस्यावश्यकत्वात्अथकालरोगादिजन्यसंस्कारनाशेव्यभिचारः। कालाद्यजन्यत्वस्यनिवे
शेतुलघुत्वात्जन्यतावच्छेदककोटावपिस्मरणान्यत्वस्यनिवेशेअन्योन्याश्रयात्। नापिवैजात्यंनन्याश्यतावच्छेदकंतुलघु
त्वाद्विपरीतज्ञानजन्यतावच्छेदकतयापिवैजात्यसिद्धौप्रत्येकमात्रनाश्यसंस्कारेपिप्रत्येकपरीहारेणवर्त्तमानयोस्तयोर्घटस्मर
णपटविपरीतज्ञाननाश्येघटपटगोचरसमूहालंबनसंस्कारेतांकर्यापत्तेः। नचवैजात्यांतरस्वीकारेतिगौरवापत्तेरितिवेद्या
पत्यास्वसमानाधिकरणपादिविशिष्टकालिकविशेषणतयाघटस्मरणविशिष्टसंस्कारनाशत्वमेवमादृशस्मरणजन्यताव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

च्छेदकं दोषकालादीनां चानन्तगतनयानन्तर्घटितं । विपरीतज्ञानस्य च वैजात्यं । न च विनिगमनाविरहः किं स्मरणनाश्य
तावच्छेदकतावच्छेदकं ज्ञानत्वं विपरीतज्ञानत्वं चेति वाच्यं । विपरीतनिश्चयस्य नाश्यकतायां नाशकतावच्छेदकगौरवात् अ
स्य वैशिष्ट्यस्य जन्यतावच्छेदकत्वे कार्य्यतावच्छेदककोटिप्रविष्टविशेषणानां विशेष्यविशेषणभावेन नानाधर्म्मावच्छि
न्नकारणतायाश्चानुल्लापत्तेः न त्वैवं वैजात्यस्य नाश्यतावच्छेदकत्वमिति अथ समूहालंबनसंस्कारस्य प्रत्येको १०
चरस्मरणान्नाशापत्तिः घटपटोभयविषयकसंस्कारस्य घटपटविषयतयानन्नाशकीभूतघटस्मरणस्य सत्त्वात् । न
च पटविषयकसंस्कारनाशे पटस्मरणस्य हेतुत्वात् तस्य पटविषयकत्वेन पटस्मरणरूपनाशकाभावान् न नाश इति वाच्यं
पटस्मरणं विनापि स्वकार्य्यतावच्छेदकावच्छिन्नजननात् अज्ञापितदापत्तिसंभवात् नाशाभ्युपगमे चानन्तरं पटस्मरणा
नुपपत्तिरिति न च चरमस्मृतित्वेन नाशकत्वान्न दोष इति वाच्यं चरमत्वस्य निर्वक्तुमशक्यत्वात् । न च स्वजनकसंस्कार
जन्यस्मृतिप्रागभावविशिष्टान्यत्वं जनकत्वादिकं च फलोपधायकत्वादिरूपं ग्राह्यं । अन्यथा संस्कारान्तरजन्यस्मृतिप्रागभाव

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कालीनस्यापि चरमत्वादुपपत्तिरिति वाच्यं। स्वत्वघटितत्वेननदननुगमात्॥ स्वप्रतियोग्युपधायकसंस्कारोपहितत्वविशि
ष्टकालिकसंबंधेन स्मृतिप्रागभाववैशिष्ट्यं यत्तदन्यतमस्वरूपस्यापि अननुगमोपधायकताघटितत्वात्। प्रथमस्मृतिध्वंससंस्कारं ना
शयित्वा चरमत्वशालिनी न भवति। अंत्यस्मृतिस्तथा भवतीत्यत्र नियामकाभावाच्च। न चैवं आद्यमेव चरमत्वं। तच्च फलबलक
ल्पमेनोनदोष इति वाच्यं। तादृशज्ञाने रेकस्य एव सकलस्मरणानिष्टनाशकत्वविच्छेदकत्वे घटपटौ कुशकुड्मलौ स्मा तादृशसं
स्कार—जनितानि। घटपटविषयकत्वकुड्मलविषयएकस्मरणात्। कुडकुड्मलविषयकसंस्कारनाशापत्तिः घटपटविशि
संस्कारनाशकत्वावरोधेन तादृशज्ञानं ति स्तत्रावश्यं सुपेयात् कुञ्जकुड्मलावित्तिसंस्कारनाशकतावच्छेदकज्ञाने घटसंस्कार
नाशकतावच्छेदकज्ञानमन्यतेन घटसंस्कारनाशकस्मरणात् कुञ्जसंस्कारनाशकस्मरणयोः परस्परपरीहारेण वर्त्तमान
योरुभयसंस्कारनाशकसमूहालंबनं स्मरणेसांकर्यापत्तेः। न च चरमस्मृतित्वं यावद्धर्मस्मृतिसाधारणी एकैवजातिक
र्यकारणभावस्तु नद्विषयकसंस्कारनाशत्वतद्विषयकचरमस्मृतित्वाभ्यामिति नोक्तदोष इति वाच्यं तादृशजातेः प्रथ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मस्मरणेनास्ति किंतु चरमस्मृतौ इत्यत्र अनुगतनियामकाभावात् अननुगतानां तत्तत्क्षणादीनामेव विषयाममंगीकार्यमिति महद्
गौरवं न च अननुगत्या तादृशगौरवसहिष्णुनास्माभिर्वाच्यं गमनंतरस्य दर्शयिष्यमाणत्वात्। इति चेत् अत्र केचित्। घटविषयकसं
स्कारत्वेन नाश्यता स्मरणत्वेन नाशकता· एवं घटपटोभयगोचरत्वेन नाश्यता घटपटोभयसंस्कार
त्वेन नाशकता विशिष्य इति योगिनामपि न तथा हेतुत्वकल्पने अनायत्येत्याहुः। अन्ये तु समूहालंबनज्ञानादपि घटादिप्रत्येकवि-
षयानेव संस्कारान् जायते। ननु समूहालंबनसंस्कारः। तथा च घटस्मरणात् घटसंस्कारो नश्यति नान्यः नच समूहालंबनात्मक ११
संस्कारानभ्युपगमेपि घटवद्भूतलमिति ज्ञानात् विशिष्टविषयक एव संस्कारोऽभ्युपेयः अन्यथा विशिष्टस्मरणानुपपत्तिः।
न तथा च भूतलबोधकविरहकालीनघटमात्रविषयकस्मरणात् विशिष्टसंस्कारनाशापत्तिरिति वाच्यं। घटभूतलविशेष्यक
संस्कारत्वस्यैव घटस्मरणनाश्यतावच्छेदकत्वात्। घटवद्भूतलमिति संस्कारनाशे विशिष्टविषयकस्मृतित्वेन हेतुत्वं तर
स्यावश्यकत्वात् अन्यथाविषयकहितघटभूतलयोः स्मरणात्तथाविधसंस्कारनाशापत्तिः। अथैवमपि घटवद्भूतलपर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वदिति संस्कारस्य घटाभाववद्भूतलमिति विपरीतज्ञानेन नाशे पटवदिति स्मरणानुपपत्तेः। न च यत्र तादृशविशिष्ट्यस्मरण
मुत्पद्यते तत्रापि घटवद्भूतलं पटवद्भूतलमिति संस्कारद्वयमेवाभ्युपेयते न तु विशिष्टविषयताशाली एकः संस्कार इति वाच्यं
कुत्रचिद्विशिष्टविषयकसंस्कारस्य विषयकत्वेन तत्रैव तादृशसंस्कारमन एकधर्मावच्छिन्ने अपरधर्मावच्छिन्नप्रतियोगिता
काभाववत्त्वेन तादृशसंस्कारनाशापत्तेः न चेष्टापत्तिः तादृशविपरीतज्ञानोत्तरं तथाविधविशिष्टस्मरणापलापप्रसंगात् इ
ति चेन्न तादृशोद्भवस्य प्रामाणिकत्वेन तद्धर्मावच्छिन्नप्रकारकसंस्कारनाशत्वावच्छिन्नं प्रति तद्धर्मावच्छिन्नविशेष्याकत
द्धर्मावच्छिन्नाभावप्रकारकज्ञानत्वेन हेतुतान्यानुपपत्तिः। न च तथापि वह्निव्याप्याभाववान्धूम इति ज्ञानकाले वह्निव्या
प्यो धूम इति संस्कारासत्त्वे विपरीतज्ञानरूपकारणबलात् तन्नाशापत्तिरिति वाच्यं तादृशसंस्कारनाशं प्रति तादृशसंस्कारस्या
पि प्रतियोगिविधया हेतुत्वेन तदभावादेव न तथापत्त्यसंभवादिति भावः॥ ॥इति स्मृतिसंस्कारकार्यकारणभाववि
चारः। । ।शुभम्। ।श्रीरस्तु। ।नमोगणेशाय। ।सिद्धिरस्तु। ।श्रीः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ईश्वरमानविचारः

नं० ४३०२ ले० गदाधरः

ईश्वरमानविचारः

श्री ५ को सरकार
राष्ट्रिय संग्रह अभिलेखालय

श्री ५ को सरकार

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ईश्वरमानविचारः

नं० ४३०२ ले० गदाधरः

ईश्वरमानविचारः

श्री ५ को सरकार

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रीगणेशायनमः॥ ॥सांबशिवंनमस्कृत्यमहादेवस्तनोमुदे। तार्किकाभिमतंमानमीश्वरेवक्तितत्वतः॥ १ ॥
अत्रेश्वरेआत्मत्वंजीवभिन्नत्वन्नित्यत्वाजीवभिन्नत्वंज्ञानादिमत्त्वाजगत्सकर्तृकंनवेत्यादिविप्रतिपत्तौईश्वरेप्रमाण
मनुमानमेवेतिनैयायिकाः॥तत्रजगत्सकर्तृककार्यत्वात्घटादिवदित्याकारकं॥नचवेदस्यापीश्वरेप्रमाणत्व
संभवेनकथमनुमानमेवेतिवाच्यं॥वेदस्येश्वरोक्तत्वेनैवप्रामाण्येनेश्वरसिद्धिंविनातस्यप्रमाणत्वासंभवात्॥अ
न्यथाऽन्योन्याश्रयात्॥एतेनेश्वरेवेदोपमानंचप्रमाणं॥उपायस्योपायान्तरदूषकत्वादितिमहतामुक्तिःपरास्ता।
नचात्रघटादेर्जन्यत्वेनपक्षतयाकथंदृष्टान्तत्वमितिवाच्यं॥पक्षैकदेशस्यापिदृष्टान्तत्वेबाधकाभावात्॥साध्य १
साधनवत्तयानिश्चितत्वस्यैवदृष्टान्तत्वेतन्त्रत्वेनपक्षभिन्नत्वस्यतत्रातन्त्रत्वात्॥नन्वत्रसाध्यंसकर्तृकत्वंकृतिम
ज्जन्यत्वंलाघवात्तच्चवैयर्थ्यपरित्यागेनकृतिजन्यत्वपर्यवसितं।तथाचजन्येक्षित्यंकुरपर्वतादावस्मदादिकृतिज
न्यत्वबाधेनयादृशकृतिजन्यत्वंतादृशकृत्याश्रयत्वेनेश्वरसिद्धिरित्यभिमतंतत्रचजन्यत्वरूपपक्षतावच्छेदका

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वच्छेदेन साध्यसिद्धेरुद्देश्यत्वांगीकारेणाजन्यत्वसामानाधिकरण्येन घटादौ सिद्धसाधनस्यादोषत्वेपिजन्यत्वा
वच्छेदेन क्षित्यादिजनकादृष्टजनकास्मदादियागादिगोचरकृतिजन्यत्वमादाय सिद्धसाधनतायांतत्रयोर्दोषत्वंदु
ष्परिहरमेवेतिचेद्नत्रप्राचीनमतानुयायिनः ॥अत्र कृतिजन्यत्वमात्रंनसाध्यंकिंतुस्वोपादानगोचरापरोक्षज्ञा
नचिकीर्षासमानाधिकरणकृतिजन्यत्वंगोचरांतंसमानाधिकरणांतंचकृतिविशेषणंतथासतिनोक्तदोषः॥
यागादिगोचरास्मदादिकृतेः स्वोपादानगोचरत्वाभावात् ॥नचगोचरांतेनैवोक्तदोषवारणेसमानाधिकरणां
तंस्वकृतिविशेषणमनर्थकमितिवाच्यं ॥व्यावर्त्याभावेपिउपरंजकत्वेनैवतथाविधविशेषणस्यसार्थकत्वा
त् ॥उपरंजकत्वंचोद्देश्यीभूतस्वघटितसाध्यसिद्धिविषयत्वं ॥प्रकृते चज्ञानेच्छासमानाधिकरणत्वेनाकृति
सिद्धेरुद्देश्यत्वानुपपन्नं ॥एतदभिप्रायकएवव्यापकेव्यर्थविशेषणाचदोषायेतिप्राचांप्रवादः॥ नचतथा
पिदृष्टांतपक्षसाधारणस्वत्वस्यैकस्याभावान्नघटितधर्मस्यसाध्यत्वंनसंभवतीतिवाच्यं॥प्राचीनमतेस्वत्वस्यै

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्यात्॥अन्यथास्वपितन्मोदशात्क्षणौस्वदारानगच्छेदेवेत्यादौस्वक्षेत्रेनचैत्रादीनांसर्वानुभवसिद्धव्योधस्यानुप
पत्तेः॥समवायसंबंधेनकार्यत्वावच्छिन्नप्रतिविषयताप्रत्यासत्त्यैवोपादानगोचरकृत्यादेर्हेतुतयाविषयता
प्रत्यासत्त्यवच्छिन्नतथाविधकृतिनिष्ठकारणतानिरूपितसमवायसंबंधावच्छिन्नकार्यत्वघटितसाध्याभावा
दितिवाच्यं॥सत्त्वविशिष्टजन्यत्वस्यपक्षतावच्छेदकत्वात्॥नचध्वंसेव्यभिचारः॥भावत्व×स्यतदर्थत्वसंभ
वेनस्वत्वस्यैक्याभावेपिक्षतिविरहाच्च॥नचैवमपिध्वंसेवाधः॥तस्यासमवेतत्वेनसमवायसंबंधावच्छिन्न
कार्यत्व×विशिष्टकार्यत्वस्यहेतुत्वात्॥अतएवात्रजन्यत्वस्यपक्षतावच्छेदकत्वेनकार्यत्वरूपहेतोरपिप्रा
गभावप्रतियोगित्वादिरूपजन्यत्वात्मकत्वेनैक्यात्सिद्धसाधनं॥नचकृतिसाध्यत्वरूपकार्यत्वंहेतुरितिवाच्यं।
असिद्धेरितिपरास्तं॥समानविशेष्यतावच्छेदकताकसिद्धेरेवानुमितिप्रतिबंधकत्वेनसिद्धसाधनाभावा
त्॥केचित्तुकेवलकार्यत्वस्यहेतुत्वेपिनसिद्धसाधनं॥केवलकार्यत्वाधिकरणेव्याप्तिघटकतयाप्रकृतसा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ध्वसिद्धावपि निरुक्तविशिष्टपक्षतावच्छेदकाधिकरणोत्तदसिद्धेः॥ अन्यूनविषयकसिद्धेरेवानुमितिप्रति-
बंधकत्वादित्याहुः॥ तन्न॥ ध्वंसे व्यभिचारेण केवलकार्यत्वस्य हेतुत्वासंभवात्॥ वस्तुतस्तु समवायसंबंधाव-
च्छिन्नकार्यत्वस्य हेतुत्वे नैव व्यभिचारानवकाशः। उक्तं चैतत्तादृशसंबंधघटितकार्यकारणभावस्यैवाद्या-
नुकूलतर्कत्वात्॥ केचित्तु प्रागभावप्रतियोगित्वात्मककार्यत्वघटकप्रतियोगितायां समवायसंबंधावच्छि-
न्नत्वनिवेशान्न व्यभिचारः॥ इह कपाले समवायेन घटो भविष्यति न संयोगेनेत्यादिप्रतीत्या प्रागभावस्यापि
प्रतियोगितावच्छेदकसंबंधांगीकारादित्याहुरिति वदंति॥ नव्यास्तु साध्यं न स्वोपादानगोचरत्वगर्भं किंतु तथा-
विधकृतिनिष्ठजनकतानिरूपितजन्यत्वमात्रं॥ न चोक्तदोषः॥ अदृष्टाद्वारकत्वेन जनकताया विशेषणीय-
त्वादित्याहुः॥ तेषामयमाशयः॥ निरुक्तसमवायसंबंधावच्छिन्नकार्यत्वात्मकत्वोपादानगोचरत्वगर्भ-
साध्यकरणे कार्यसामान्यं प्रतीश्वरकृतिः कारणमिति प्राचीनप्रवादेन संगच्छते समवेतकार्यं प्रत्येव तस्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हेतुतया ध्वंसाजनकत्वेनोपदर्शितप्रमादव्याघातात्॥ अस्मन्मते च ध्वंससाधारणकृतिजन्यत्वस्य साध्यत्वेन
नव्याघाताभावात्॥ न च निर्भक्तिकप्रवादस्याप्रद्वेष्यतया तद्व्याघाते इष्टापत्तिरिति वाच्यं॥ कथंचित्प्राचीन
प्रवादाविरोधेनोपपत्तौ नव्याघाते इष्टापत्तेरसांप्रदायिकत्वात्॥ ननु तथापि ध्वंससाधारणजन्यत्वस्य का
लिकसंबंधावच्छिन्नतथाविधकृतिनिष्ठकारणतानिरूपितकालिकसंबंधावच्छिन्नजन्यत्वात्मकस्य साध्य
त्वेऽदृष्टाद्वारकत्वविशेषणवैयर्थ्यं क्षित्यादिजनकादृष्टजनकयागादिगोचरास्मदादिकृतेः क्षित्याद्यव ३
वहितपूर्वकाले सत्त्वेन कार्यतावच्छेदकसंबंधेन कार्याधिकरणे कारणतावच्छेदकसंबंधेन नियताव्य
वहितपूर्ववर्त्तित्वरूपजनकत्वाभावादेवोक्तदोषानवकाशादिति चेन्न॥ तन्निष्ठतत्संबंधावच्छिन्नजनक
त्वं हि तत्तस्य तेन संबंधेन कार्याव्यवहितपूर्वक्षणावच्छेदेन कार्यतावच्छेदकसंबंधेन कार्याधिकरणे निय
मेन वृत्तित्वं यागादीनामपूर्वादिद्वारा स्वर्गादिकारणत्वानुपपत्तेः॥ अपि तु तद्व्यापारान्तरस्य एवं च तत्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विशेषणवैयर्थ्यं ॥ क्षित्यादिजनकादृष्टजनकयागादिगोचरास्मदादिकृतेः क्षित्याद्यव्यवहितपूर्वक्षणाव
च्छेदेन कार्यतावच्छेदककालिकसंबंधेन क्षित्यादिरूपकार्याधिकरणकाले सत्त्वेपि तद्व्यापारादृष्टस्यास
त्वेन कालिकसंबंधावच्छिन्नजनकतायाः सत्त्वेनार्थान्तरादिदोषस्य तद्विशेषणं विनानुद्धारात् ॥ एवं पूर्व
मते ध्वंसे बाधवारणाय सत्त्वविशिष्टजन्यत्वस्य पक्षतावच्छेदकत्वे गौरवं ॥ अस्मन्मते च ध्वंसे क्षित्यादिव
त् तथाविधसाध्याभावानिर्णये न बाधासंभवात् ॥ शुद्धजन्यत्वस्य पक्षतावच्छेदकत्वेपि न क्षतिरिति लाघवं ॥
एवं ध्वंसे व्यभिचाराभावेन शुद्धकार्यत्वस्यैव हेतुत्वेन लाघवं ॥ न च तथापि पक्षतावच्छेदकहेत्वोरैक्ये न सि
द्धसाधनं दुरुद्धरमेवेति वाच्यं ॥ व्यतिरेकव्याप्तेरेव प्रकृते गमकत्वांगीकारात् ॥ केचित्तु जन्यत्वकार्यत्व
योरभेदेपि जन्यत्वस्य स्वरूपसंबंधविशेषप्रागभावप्रतियोगित्वादिरूपतया नानाविधत्वेनैकविधस्य प
क्षतावच्छेदकत्वेन्यविधस्य हेतुत्वेन सिद्धसाधनमित्याहुः ॥ अथ जनकतायामदृष्टद्वारकत्वनिवेशो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शक्यः ॥ तथा हि ॥ तज्जनकादृष्टजनकत्वे सति तज्जनकत्वमेवादृष्टद्वारकं तज्जनकत्वं वाच्यं ॥ तथा च बा
धः ॥ क्षित्यादिजनकेश्वरकृतेः क्षित्यादिजनकादृष्टस्यापि जनकत्वादिति चेन्न ॥ अभिप्रायानवगमात् ॥
स्वजनकस्वरूपयोग्यादृष्टजनकं यद्यत्तद्भेदकूटविशिष्टं तथाविधकृतिजन्यत्वस्योपदर्शितसाध्यनि
ष्कर्षात् ॥ स्वपदं भेदकूटप्रतियोगिपरं ॥ विशिष्टान्तं कृतिविशेषणं भेदप्रतियोगिनी च यागादिगोचरास्म
दादिकृतिः तस्याः स्वजनकस्वरूपयोग्यादृष्टजनकत्वात्तद्भेदकूटवैशिष्ट्यमीश्वरकृतौ सुलभमिति न बा ४
धः ॥ यत्तु तथाविधभेदकूटस्य दुर्विज्ञेयतया तद्घटितधर्मेण साध्यत्वासंभवादुपदर्शितरीतिरसमं
जसेति तदसत् ॥ कृतावुपदर्शितयुक्त्या ज्ञानचिकीर्षासामानाधिकरण्यमपि निवेशनीयं ॥ तत्र तत्स्वप्र
कारत्वेन निवेशे गौरवात् ॥ लाघवेन स्वजनकस्वरूपयोग्यादृष्टजनकं यद्यत्तद्भेदकूटविशिष्टसामा
नाधिकरण्यसंबंधेन ज्ञानचिकीर्षावैशिष्ट्यं कृतौ निवेशनीयं सामानाधिकरण्ये भेदकूटवैशिष्ट्यं च भे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दीयविशेषणतासामानाधिकरण्यीयविशेषणतोभयघटितसामानाधिकरण्यसंबंधेन ॥ यद्वासा-
मानाधिकरण्यसंबंधेन स्वानन्विकीर्षाविशिष्टयाकृतिस्तद्वत्त्वमेवसाध्यं तद्घटत्वं च स्वजननस्वरूपयोग्या-
दृष्टजनकं यद्यत्तद्भेदकूटविशिष्टत्वनिरूपितजन्यतासंबंधेन ॥ अत्र प्रथमस्वपदं भेदप्रतियोगिपरं ॥
द्वितीयस्वपदं कृतिपरं ॥ तदपि परिचायकं न तु संबंधघटकं अन्यनिरूपितजन्यत्वस्यास्य संबंधत्वा-
भावेनादोषात् ॥ एवं च प्रकारतया जन्यत्वानिवेशेनापि लाघवं ॥ तथा च भेदकूटस्य संबंधविधया निवे-
शेन प्रकारतया अनिवेशान्न दुर्ज्ञेयत्वावकाशः ॥ अत एव दुःखसंततिरत्यंतमुच्छिद्यते संततित्वात् प्र-
दीपसंततिवदिति द्रव्यकिरणावलीस्थमहाप्रलयानुमानस्य दुःखत्वस्य समानाधिकरणदुःखप्रागभा-
वाधिकरणक्षणवृत्तियद्यत्तद्भेदकूटवद्ध्वंसप्रतियोगिवृत्ति आर्यवृत्तिधर्मत्वात् प्रदीपत्ववदित्येतादृशप-
रिष्कारः प्रकाशकाराद्यभिमतः संगच्छते तत्रापि स्वसमानाधिकरणदुःखप्रागभावाधिकरणक्षणवृत्तियद्य

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तद्भेदकूटविशिष्टस्वनिरूपितप्रतियोगितानाश्रयवृत्तित्वसंबंधेन ध्वंसवत्त्वस्यैव साध्यत्वे नभेदकूटस्य संबंध
घटकतयैव निवेशात्। अन्यथा तत्रापि भेदकूटस्य दुर्ज्ञेयत्वया न घटितस्य साध्यत्वासंभवेन तादृशपरिष्का
रं संगतेरिति॥ अथवा स्वसमानाधिकरणादृष्टजनककृतिजन्यत्वं साध्यं एतस्यापि स्वसमानाधिकरणादृ
ष्टजनकं यद्यदित्यादि निरुक्तरीत्या च निष्कर्षो बोध्यः॥ केचित्तु स्वजनकादृष्टजनकजन्यकृत्यजन्यत्वे सति
कृतिजन्यस्वरूपमदृष्टद्वारककृतिजन्यत्वं साध्यमित्याहुः॥ वस्तुतस्तु साक्षात्परंपरासाधारणजनकताया ५
ऐक्याभावात् तत्तद्व्यापारान्तरस्य कार्यनियतान्यवहितपूर्ववर्त्तित्वं न तज्जनकत्वं गौरवात्॥ किंतु साक्षा
द्धेतुतास्थले तत्कारणस्य परंपरास्थले च व्यापारस्य प्रकृते च कालिकसंबंधेन कार्यत्वावच्छिन्नंप्रतिका
लिकसंबंधेन कृतेः साक्षाद्धेतुतया कारणनिष्ठकार्यनियतान्यवहितपूर्ववर्त्तित्वात्मकसाक्षाज्जनकत्वस्य
साध्यघटकतया यागादिगोचरकृतिमादायोक्तदोषासंभवेनादृष्टद्वारकत्वविशेषणमनुपादेयमेव॥ अ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उघटादेर्दृष्टांतत्वायोगेन्तु वेष्टैव दृष्टांतः॥ नच घटादौ व्यभिचारः॥ तस्यापि पक्षत्वात्॥ यद्वा तादात्म्य
संबंधेन कार्यत्वावछिन्नंप्रति साध्यत्वाख्यविषयतासंबंधेन कृतेर्हेतुतया साध्यत्वाख्यविषयतासंबंधा
वछिन्नकारणतानिरूपिततादात्म्यसंबंधावछिन्नजन्यत्वमेव साध्यं अन्यत्सर्वंपूर्ववत्. एवंच ध्वंसेन वाध
व्यभिचारसंभावनापि. नचैवं लाघवात्कृतिसाध्यत्वसाध्यत्वाख्यविषयतासंबंधेन कृतिमत्वमेव वा साध्य
मस्त्विति वाच्यं॥ इष्टत्वात्॥ एतेन क्षित्यंकुरादिजनकतयेश्वरीयकृतिसिद्धावपि तस्याः सविषयकत्वेमा
नाभावः जीवनयोनिकृतिवन्निर्विषयकत्वस्यापि संभवात्॥ एवं क्षित्यंकुराद्यव्यवहितपूर्वकालीनयत्किं
चिज्जोचरकृतिजन्यत्वमादायार्थांतरमपि दुर्वारं॥ नच तत्कालीनपदार्थांतरमादायविनिगमनाविरहे-
णतादृशकृतेर्जनकत्वासंभवान्नदोष इति वाच्यं॥ कार्यत्वेन कृतित्वेन कार्यकारणभावस्यान्वानुकू-
लतर्कत्वेन पदार्थांतरमादायविनिगमनाविरहादिति निरस्तं॥ साध्यत्वाविषयतासंबंधावछिन्नक्षित्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कुलादिजनकतयेश्वरीयकृतिसिद्धौ तस्य धर्मिग्राहकमानेनैव सर्वविषयकत्वसिद्धेः यत्किंचिज्ज्ञोचरकृतेः क्षित्या
द्यविषयत्वेनार्थांतरस्याप्यभावाच्च ॥ केचित्तु यजेतेन हिंस्यादित्यादिकृत्याया गर्हिंसारूपक्रियायामेवेष्टानि
ष्टसाधनत्वं बोध्यते तच्च न साक्षात् किं त्विष्टद्वारेति कल्पमानादृष्टसाधनत्वमपि यागादिक्रियायामेव न तु
यागादिगोचरकृतावप्यदृष्टजनकत्वं मानाभावात् । कृतौष्टसाधनताया विध्यर्थत्वस्य निरस्तत्वात् तथा
च यागादिगोचरास्मदादिकृतेः क्षित्यादिजनकादृष्टजनकत्वाभावेनार्थांतरं नवकाशं नादृष्टद्वारक ६
त्वविशेषणाप्रवेशसंभावनापीत्याहुः ॥ एवं कृतौ ज्ञानचिकीर्षासमानाधिकरण्यत्वमपि विशेषणं नदेय
मेव ॥ न च तदनुपादाने उद्देश्यासिद्धिरिति वाच्यं ॥ प्रकारांतरेणैवोद्देश्यसिद्धेः ॥ तथाहि ॥ उपदर्शितानुमा
नात् कृतिविशिष्टेश्वरसिद्धावीश्वरकर्तृकत्वेन वेदस्य प्रामाण्ये सिद्धे यः सर्वज्ञः स सर्वविदस्य ज्ञानमयं तपः
सोकामयत बहु स्यां प्रजायेयं इत्यादिश्रुतिवाक्येभ्यः सर्वविषयकज्ञानादिसिद्धेः ॥ यत्र प्रकारांतरेणानोद्दे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

णसिद्धिस्तत्रैवोपरंजकस्यसार्थक्यं॥अतएवज्ञानजन्यत्वव्यापकेनार्थविशेषणताबीजाभावादितिपक्ष
धरमिश्राः॥अथतथापिकेवलकृतिजन्यत्वस्यसाध्यत्वेइच्छाजन्यत्वेआदायविनिगमनाविरहइतिचेन्न॥
विनिगमनाविरहेणद्वितयजन्यत्वस्यैवप्रत्येकंसाध्यत्वात्।अतएवज्ञानेच्छाकृतीनांधर्मिग्राहकमानसि
द्धत्वमपिसंगच्छते॥प्रत्येकधर्मिग्राहकानुमानेनप्रत्येकसिद्धेः॥किंचकार्यत्वावच्छिन्नंप्रतिज्ञानेच्छयोरज
नकत्वात्नविनिगमनाविरहः॥अन्वयव्यतिरेकानुविधानाभ्यांकार्यत्वावच्छिन्नंप्रतिकृतित्वेनैवहेतुत्वा
त्॥नचविनिगमनाविरहात्ज्ञानत्वादिनापिहेतुत्वमायास्यतीतिवाच्यं॥ज्ञानेच्छयोःकृत्युपक्षीणत्वेनान्य
थासिद्धतयास्वातंत्र्येणकार्यत्वावच्छिन्नंप्रतिकारणताग्राहकान्वयव्यतिरेकाभावात्॥नचैवंदंडचक्रादे
रपिकृत्युपक्षीणतयाघटादिजनकत्वानुपपत्तिः॥एवंयागादीनामपिअपूर्वोपक्षीणतयास्वर्गादिजन
कत्वानुपपत्तिरितिवाच्यं॥दंडचक्रादेर्विरम्यव्यापारेणाधायकत्वात्फलपर्यंतसत्वस्यावश्यकत्वेनविनिगम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नाविरहादेवतस्य हेतुत्वसिद्धेः। यागादीनां जनकत्वमयानुपपत्त्यैवापूर्वादिसिद्धौपत्तौ व्यविरोधात्तेन यागाद्य
न्यथासिद्ध्यसंभवात्॥ अत एव व्यापारेण व्यापारिणो नान्यथासिद्धिरिति भावः॥ प्रकृते च श्रवणादि कर्मणां
विरम्य व्यापाराभावात् तज्ज्ञानस्येच्छायाः इच्छायाश्च कृत्यानाशेन फलपर्यंतमसत्त्वेन उपजीव्याविरोधेन च
ज्ञानेच्छयोर्हेतुत्वासिद्धेः कृत्या अन्यथासिद्धत्वात्॥ न चात्राप्युपजीव्यविरोधः॥ ज्ञानजनकत्वानुपपत्त्या त
कृतिस्वीकारः प्रत्यक्षेणैव तस्याः सिद्धत्वात् तस्मात्कृतित्वेनैव कार्यत्वावच्छिन्नं प्रति हेतुत्वस्य निर्दुष्टत ७
या कृतिजन्यत्वमेव साध्यमिति सारं॥ अथात्र नांतरीयकेशर्करमध्यस्थितपिष्टभोजनादिकार्यसुखादौ च उप
दर्शितसाध्याभावेन व्यभिचार इति चेन्नस्यापि पक्षतावच्छेदकाक्रांतत्वेन तत्र साध्याभावानिर्णयात् साध्या
भावांशे निर्णयात्मकस्यैव तद्ग्रहप्रतित्वांशे संशयनिश्चयसाधारणव्यभिचारज्ञानस्य व्याप्तिग्रहप्रतिबंधक
त्वात्॥ अथ साध्याभावांशे संशयात्मकस्यापि व्यभिचारज्ञानस्य व्याप्तिग्रहप्रतिबंधकत्वमावश्यकं कथ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मन्यथा करवह्निसंयोगः प्रत्यक्षविषयसंयोग धर्मातिरिक्त धर्मवान्समवायित्वात् घटवदित्यनुमानात्तन्नश
क्तिसिद्धिः॥ तत्र क्वापि हेतुमति साध्याभावानिश्चयेन व्याप्तिग्रहसंभवात्॥ मन्मतेऽपि तत्रपक्षेसाध्यसंदेहेन
पक्षमंतर्भाव्यैवसाध्याभावांशे संशयात्मकव्यभिचारज्ञानसत्वान्न व्याप्तिग्रहसंभवः॥ नचैवं पक्षमंतर्भा
व्यापिव्यभिचारसंदेहस्य व्याप्तिप्रतिबंधकत्वेऽनुमानमात्रोच्छेदः सर्वत्रपक्षमंतर्भाव्य व्यभिचारसंदेहसं
भवादितिवाच्यं॥ अनुकूलतर्कविरहविशिष्टस्यैव व्यभिचारज्ञानस्य व्याप्तिग्रहप्रतिबंधकतयात्रका
र्यकारणभावाद्यनुकूलतर्कसत्वेनादोषादिति चेन्नहि प्रकृतेऽपि कार्यत्वावच्छिन्नप्रतिकृतित्वेन कार्य
कारणभावरूपानुकूलतर्कसत्वेन व्याप्तिग्रहसंभवेनादोषात्॥ अथ कुलालादिकर्तृकघटादीनामपिप
क्षतावच्छेदकाक्रांतत्वे नेश्वरकर्तृकत्वसिद्धौ नेषामुभयकर्तृकतापत्तिरिति चेन्न॥ प्रासादगुरुतरशि
लोद्धरणादिकार्याणां साधारणानेककर्तृकत्ववत्तेषां साधारणासाधारणोभयकर्तृकत्वे बाधकाभावेने

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ष्टापत्तेः॥ इयान् परं विशेषः॥ यत्क्षित्यादीनामनेककर्तृकत्वं प्रत्यक्षगम्यं घटादीनां च कुलालादिकर्तृकत्वं
प्रत्यक्षगम्यमीश्वरकर्तृकत्वं चानुमानगम्यमिति॥ नहि कार्याणामेकजातीयप्रमाणगम्यकारणताक-
सामग्रीजन्यत्वमिति नियमः। मानाभावात् विजातीयप्रमाणगम्यकारणताकसामान्यविशेषकारणकाल-
दंडादिजन्येषु घटादिष्वेव व्यभिचाराच्च॥ ननु तथापि जन्यं कृत्यजन्यं शरीराजन्यत्वादित्यनुमानेन सत्प्र-
तिपक्षसंभवान्नोक्तानुमानेन जन्यमात्रकृतिजन्यत्वसिद्धिः॥ न च प्रत्यनुमाने जन्यत्वसामानाधिकरण्ये ८
न पक्षत्वे सत्प्रतिपक्षासंभवः॥ जन्यत्वावच्छेदेन पक्षत्वे च घटादौ हेत्वसत्त्वेन भागासिद्धिरिति वाच्यं॥ अ-
नुमाने ऽवच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यतया ऽवच्छेदकावच्छेदेन विधित्सावृत्तौ सामानाधिकरण्ये
नापि तदभावव्याप्यवत्ताज्ञानस्य प्रतिबंधकतया प्रत्यनुमाने सामानाधिकरण्येन पक्षतायामपि सत्प्र-
तिपक्षसंभवात्॥ न चाजन्यत्वमात्रस्यैव कृतिजन्यत्वाभावव्याप्यत्वसंभवेन शरीरविशेषणस्य व्यभिचा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रावारकत्वेन व्यर्थतया नीलधूमादेर्विशरीरजन्यत्वस्य व्याप्यत्वासिद्धतया सत्प्रतिपक्षत्वासंभव इति
वाच्यं॥ अधिकोक्तत्वाव्यर्थविशेषणत्वस्य निग्रहस्थानमात्रसंपादकतया नीलधूमादौ व्यर्थविशेषणा
त्वसत्वेपि व्याप्तिसत्वेन व्याप्यत्वासिद्ध्यभावात्॥ ननु धूमसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वत्वा
पेक्षया नीलधूमसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वत्वस्य गुरुतया कथं तदवच्छिन्नप्रतियो
गिताकाभावघटितव्याप्तिसत्वमिति वाच्यं॥ गौरवप्रतिसंधानदशायामपि कंबुग्रीवादिमान्नास्तीत्यादि
प्रतीत्युदयेन विशिष्टसत्वादेर्द्रव्यत्वाद्यव्याप्यतापत्त्याच गुरुधर्मस्याप्यभावप्रतियोगितावच्छेदकत्वांगी
कारात्। नीलधूमत्वघटितनिरुक्तावच्छेदकत्वत्वस्य शुद्धधूमत्वघटितावच्छेदकत्वत्वासमनैयत्या
च॥ अत एव दीधितिकौ[illegible]रस्यापि नीलधूमादेर्वारणीयत्वे त्विति तु राह्वो नानीलधूमादेर्व्याप्यत्वं संभव त
मिति चेन्न॥ प्रत्यनुमानस्यानुकूलतर्काभावेनाप्रयोजकतया: जन्यत्वरूपोपाधिमत्तयां च दुर्बलत्वेनानु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मानस्यकार्यत्वावच्छिन्नंप्रतिकृतित्वेनकार्यकारणभावरूपानुकूलतर्कसत्वेनबलवत्तयासत्प्रतिपक्षासं-
भवात् ॥ एतेनोक्तानुमाने शरीरिकर्तृकत्वं शरीरजन्यत्वं चोपाधिः । न च तस्य क्षित्यंकुरादौ साध्यव्यापकतासं-
देहान्नोपाधित्वमिति वाच्यं ॥ तावतानिश्चितोपाधित्वाभावेपि संदिग्धोपाधित्वे बाधकाभावात् ॥ तथा च त
दाहितव्यभिचारसंशयेन व्याप्तिग्रहप्रतिबंधात्कथमनुमानमित्यपि निरस्तं ॥ पूर्वोपदर्शितरीत्याऽनुकू
लतर्कविरहविशिष्टस्यैव व्यभिचारज्ञानस्य प्रतिबंधकतया प्रकृते चोक्तकार्यकारणभावानुकूलतर्क २
सत्वेनादोषात् । अनुकूलतर्केण कार्यत्वरूपहेतौ कृतिजन्यत्वरूपसाध्यव्याप्यत्वनिर्णये साध्यव्याप्यहेतु
व्यापकत्वेन तत्र साध्याव्यापकतानुमानेन साध्यव्यापकत्वाभावनिर्णये नोपाधित्वासंभवाच्च ॥ अत्रेदं-
बोध्यं ॥ उक्तानुमानेनैव कृतेरेकत्वनित्यत्वे च लाघवमिति लाघवज्ञानसहकारेण कृतावेकत्वनित्यत्वे अपि
सिध्यतः । लाघवज्ञानसहकारेण व्यापकतानवच्छेदकरूपस्याप्यनुमितौ भानात् । एवं कृतिसिद्धसर्वविष

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

यकेश्वरज्ञानेछयोरप्येकत्वनित्यत्वेलाघवादेवसिध्यतः। तयोर्नानात्वेऽत्पत्तिविनाशकल्पनेगौरवात्॥ नचैव
मपिज्ञानादीनां सर्वविषयकत्वासिद्धिः॥ नित्यत्वेनैवतत्सिद्धेः। ज्ञानादेर्नियतविषयकत्वस्यकारणाधी
नत्वेनकारणाभावेननियतविषयकत्वाभावात्॥ नचनत्वसविषयकत्वएवमानाभावइतिवाच्यं॥ कार्य
कारणभावबलेनैवतत्सिद्धेः। अस्मदादिज्ञानेप्रत्यक्षसिद्धस्यसविषयकत्वस्यज्ञानत्वादिनातत्रानुमा
नाच्च॥ एवमुक्तानुमानेननित्यैककृतिसिद्धौ तर्हि। कृतित्वेनविशेषगुणत्वसिद्धौसाकृतिरसमवायसम
वेतानित्यैकविशेषगुणत्वाद्यतिरेके। अस्मदादिज्ञानवदित्यनुमानेनतस्यामसमवायसमवेतत्वसिद्धावस
मवायसमवेतासाकृतिरात्मसमवेताकृतित्वादस्मदीयकृतिवदित्यनुमानेनतादृशकृतिमतएकत्वे
नित्यत्वेचलाघवज्ञानसहकृतेनसमवायातिरिक्तस्यतादृशकृतिमतोनित्यैकस्येश्वरात्मनःसिद्धिः आत्म
त्वादेवचतस्यव्यापकत्वमपिसिध्यति॥ अत्रोक्तयुक्त्यैवनैकत्वादिसिद्धिः किंतुकृतितोपि। एकमेवाद्विती

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यं ब्रह्मेति स विश्वकृद्विश्वविदात्मयोनिर्ज्ञः सर्वगो भुवनस्यास्य गोप्तेति। अत्र विश्वकृदित्यनेन सर्वविषयक
कृतिमत्त्वं॥ विश्वविदित्यनेन सर्वविषयकज्ञानवत्त्वं। सर्वग इत्यनेन व्यापकत्वं सिद्धं। स्वाभाविकी ज्ञानब
लक्रिया चेति। अत्र ज्ञानस्य स्वाभाविकत्वोक्त्या नित्यत्वं एवं नित्यं विज्ञानमानंदं ब्रह्मेति। अत्र ज्ञानविशिष्टस्य
नित्यत्वप्रतिपादने न विशेषणस्य ज्ञानस्यापि नित्यत्वं लभ्यते॥ न चैवमानंदविशिष्टस्य नित्यत्वप्रतिपादने
नेश्वरे नित्यसुखस्यापि सिद्धिः स्यादिति वाच्यं। इष्टत्वात्। एवं विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहु १०
रुत विश्वतस्पात्॥ सं बाहुभ्यां धमति सं पतत्रैर्द्यावाभूमी जनयन् देव एक इति॥ विश्वतश्चक्षुः विश्ववि
षयकसाक्षात्कारवानित्यर्थः॥ विश्वतोमुखः विश्वविषयकवचनवानित्यर्थः॥ विश्वतोबाहुः विश्ववि
षयकप्रयत्नवानित्यर्थः॥ विश्वतस्पात् विश्वव्यापक इत्यर्थः। बाहुभ्यां धर्माधर्माभ्यां अनेनादृष्टस्य सह
कारित्वमुक्तं। पतत्रैः परमाणुभिः सं धमतीति योजना। ततो यावद्वितीयार्थे तेन परमाणून् संयोजयतीत्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

र्थः। किमर्थमित्यत आह। द्यावाभूमी जनयन्निति। द्यावेत्यनेनोर्ध्वलोकसप्तकं। भूमीत्यनेनाधोलोकसप्तक
मुपलक्षितं। एकं संपरं धत्तीत्यनेनाचितं क्षितीपं जनयन्नित्यनेनात्वेति व्यवहिता श्चेति ख्यां दससत्वान्ता
थाच द्यावाभूमीत्व नु ईशलोकान् संसम्यक् ननत्वं व्यानविशेषविशिष्टतया जनयन् सन्नित्यर्थः॥ आरं
भवादेप्येतच्छ्रुतिमूलक एव। अत्रारंभवादश्रुतिपादनात्॥ अत्रश्रुत्यंतरमपि॥ आदिः संयोगनिमित्तहेतुः
परस्त्रिकलादप्यसौ विदृष्ट इति संयोगः पृथिव्यादिचतुर्विधपरमाणूनां संयोगः तं प्रति निमित्तहेतुर्निमित्त
कारणमित्यर्थः॥ एवं छांदोग्ये श्वेतकेतुं प्रत्युद्दालक आह॥ न्यग्रोधफलमत आहरेति इदं भगव इति भिं
धीति भिन्नं भगव इति किमत्र पश्यसीति अण्व्य इवेमा धाना भगव इति आसामंगैकां भिंधीति भिन्ना भग
व इति किमत्र पश्यसीति न किंचन भगव इति तं होवाच यं वै सौम्यैतमणिमानं न निभालयस एतस्य वै
सौम्यैषोणिम्न एवं महान्न्यग्रोधस्तिष्ठतीति। अत्राप्यारंभवादः प्रतीयते। तथाहि। एवं सौम्येमाः प्रजाः स

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्मिन्ने न कार्यमात्रे ईश्वरस्य कारणत्वमुक्तं ॥ अत्रेश्वरस्य निमित्तकारणत्वमेव न तु समवायिकारणत्वमित्याह न्य
ग्रोधकत्वमित्यादि । अतः हृ षात् आहर आनय इदं भगव इति श्वेतकेतो रुक्तिः इदं आनीतं भगवो भगवन्नित्यर्थः
ननु वत्सो हसं वृक्षोऽत्थं दर्शीति हत्वं दैसौम्येतं अणिमानं परमाणुं न निभालयसे न चाक्षुषविषयं करोषि । एत
स्यैति परमाणुत्वेनैकं तथा चैतत्सम्पादेन ब्यणुकादिपरं । परं परं परम्परया महत्तो न्यग्रोधस्यारंभः अतस्ते
षामेव समवायिकारणत्वं न त्वीश्वरस्य तस्य तु निमित्तकारणत्वमेवेति सूचितं । न्यग्रोधपदं कार्यमात्रपरं ॥ ११
न चाणिमपदं ईश्वरपरं दुर्विज्ञेयत्वरूपसूक्ष्मत्वस्य तत्रापि संभवात् एषोणुरात्मा चेतसा वेदितव्य इत्यादा
वणुशब्दस्योक्तसूक्ष्मार्थकत्वस्य सर्वैरङ्गीकारादिति परेषाम तं युक्तं ॥ तत्रागतस्य परमाणुशब्दस्य लक्ष
णयोक्तार्थकत्वेपि प्रकृते मुख्येवाधकाभावे न लक्षणाया अयोगात् ॥ न च तथापि एतच्छ्रुतिपूर्वश्रुतौ स य एष
षोणिमेत्यत्राणिमपदस्येश्वरार्थकतया ऽत्रापि ईश्वरपरत्वं युक्तमिति वाच्यं ॥ एतमणिमानमित्यनेन स्थूला

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वयवभंगेऽन्तरावस्थितसूक्ष्मावयवस्यैवप्रक्रान्तत्वेनएतस्यवैसौम्यैषोणिम्नएदमहान्न्यग्रोधस्तिष्ठतीत्यत्र
त्राणिमशब्देनतत्परामर्शस्यैवौचित्यात्॥एवमन्याःश्रुतयःस्मृतयश्चानुसंधेयाः।ननुईश्वरेतज्ज्ञानादौच
किमेकत्वंनतावत्संख्यायाअव्यावर्तकत्वात्॥ज्ञानादौसाक्षाद्बाधाद्व्यपरंपरयावृत्तौनानात्वाविरोधित्वात्॥नापि
स्वसमानजातीयद्वितीयरहितत्वंतस्यसिद्ध्यसिद्धिपराहतत्वात्॥नचस्वसमानजातीयद्वितीयसहितंयद्यत
द्भेदकूटवत्वंतदतोनोक्तदोषइतिवाच्यं॥भेदकूटस्यदुर्ज्ञेयत्वात्॥अथनित्यज्ञानादिमन्निष्ठभेदाप्रतियोगित्व
मीश्वरेएकत्वंतज्ज्ञानादौचनित्यज्ञानादिमन्निष्ठभेदप्रतियोगितानवच्छेदकत्वं॥स्वेतरज्ञानानाद्यवृत्तिनि
त्यत्ववत्वंवा॥आद्येप्रतियोगितायांव्यासज्यवृत्तिधर्मावच्छिन्नत्वंनिवेशनीयंनातःउभयभेदमादायासंभ
वइतिचेन्न॥नित्यज्ञानादिसिद्धेःपूर्वमेतादृशैकत्वज्ञानासंभवेनोक्तरीत्यालाघवज्ञानसहकारेणानुमितौ
तद्वैशिष्ट्यज्ञानासंभवात्॥विशिष्टबुद्धौविशेषणज्ञानस्यहेतुत्वात्॥यत्तुसामान्यतोविशिष्टबुद्धित्वावच्छि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वं प्रति विशेषणज्ञानत्वेन न हेतुता विशिष्टबुद्धित्वादेरनुगतस्याभावात् । किंतु कदाचित्स्वरूपतो घटत्वादिविशि
ष्टबुद्धिसमयं तेन कदाचिज्जातित्वादिनेति नियमनिर्वाहार्थं स्वरूपतो घटत्वादिविशिष्टबुद्धिं प्रति स्वरूपतो घ
टत्वादिज्ञानत्वेन जातित्वादिना तद्विशिष्टबुद्धिं प्रति जातित्वादिना तज्ज्ञानत्वेन हेतुता कल्प्यते न तु जात्यतिरिक्त
पदार्थमंतर्भाव्यापि तथा हेतुत्वं कल्पने प्रमाणाभावात् ॥ एवं च प्रकृते एकत्वविशिष्टबुद्धिं प्रति एकत्वज्ञान
हेतुत्वस्याभावेनैकत्वज्ञानं विनाप्युक्तरीत्यैकत्वविशिष्टानुमितिसंभवेन नोक्तदोष इति तत्त्व । उक्तरीत्या वि
शिष्टबुद्धिविशेषणज्ञानयोर्घटत्वपटत्वादिभेदेनानंतहेतुमद्भावकल्पने गौरवेणालाघवान्निरवच्छिन्न १२
प्रकारतासंबंधेन ज्ञानं प्रति निरवच्छिन्नविषयतासंबंधेन ज्ञानत्वेन सावच्छिन्नप्रकारतासंबंधेन ज्ञानं
प्रति सावच्छिन्नविषयतासंबंधेन ज्ञानत्वेन हेतुत्वद्वयकल्पनस्यैवौचित्येनैकत्वज्ञानं विना तद्विशिष्टा
नुमितेर्दुर्लभत्वोऽपि दुरुपपादत्वादिति चेन्न । अत्राहुः । आत्मानात्मोभयावृत्तिदुःखासमानाधिकरणहित्वभू

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्यत्वमीश्वरैकत्वं तादृशावच्छिन्नासमानाधिकरणत्वं एतादृशैकत्वं च नित्यज्ञानादिसिद्धेः पूर्वं गुणादौ गृहं भि
न्नात्मसमानाधिकरणं तं क्रमेणेश्वरघटादिवृत्तित्वमीश्वरजीववृत्तित्वं चादायासंभववारणाय॥ तादृशं च
घटपटादिवृत्तित्वमेव प्रसिद्धमिति न क्षतित्वं॥ एतादृशैकत्वस्य जीवात्मसाधारण्येन वृत्तित्वाविरोधित्वात्। वस्तु
तस्तु सामानाधिकरण्यवैयधिकरण्योभयसंबंधेनात्मावच्छिन्नत्वे सति दुःखावच्छिन्नं यत् तद्वृत्तित्वं समवायेन तत
द्वृत्त्यत्वमीश्वरैकत्वसामानाधिकरण्येन तद्वृत्त्यत्वं च न ज्ञानाद्येकत्वमिति न त्वं। न चैवं जन्यं शरीरजन्यं
कार्यत्वाद् घटवदित्यनुमानेन क्षित्यङ्कुरादिजनकशरीरसिद्धावीश्वरस्य शरीरित्वापत्तिः॥ न चाप्रयोजक
त्वं। विशिष्य घटत्वपटत्वावच्छिन्नं प्रत्येव स्वप्रयोज्यविजातीयसंयोगसंबंधेन कुलालादिशरीरत्वेन हे
तुतया कार्यत्वावच्छिन्नं प्रति शरीरत्वेन हेतुत्वाभावादिति वाच्यं॥ तुल्ययुक्त्या कृतित्वेन कार्यत्वावच्छिन्नं प्र
ति हेतुत्वासिद्ध्या कृतीश्वरसिद्ध्यनापत्तेः। यदि च विशिष्य घटपटादिभेदेनानन्तकुलालादिकृतिहेतु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वे गौरवात् लाघवे न कार्यत्वावच्छिन्नं प्रत्येव कृतित्वेन हेतुत्वं कल्प्यते ॥ शरीरलाघवमपेक्ष्य संग्राहकलाघवस्य ब-
लवत्त्वात् ॥ न चैतादृशहेतुत्वस्वीकारे क्षित्यादिकर्तृत्वेनेश्वरस्य तत्र ज्ञानेच्छाकृतीनामीश्वरे चानन्तसंयोगानां
कल्पने गौरवमिति वाच्यं ॥ तादृशगौरवस्य फलमुखत्वेनादोषत्वादिति विभाव्यते तदापूर्वकृतेऽपि तुल्यमिति
चेन्न ॥ ईश्वरे शरीराभावव्यतेतदापूर्वकृतेऽपि तुल्यमिति चेन्न। ईश्वरे शरीराभावबोधकेनापाणिपादो जवनो
ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्ण इत्यादिश्रुतिसहस्रेण शरीरनियतभोगाभावेन च शरीराभावसिद्धौ
बाधेनेश्वरशरीरस्य असंभवात्। ईश्वरे शरीराभावसिद्धावपि त्वं कुलाले व्यभिचारेणागत्या घटत्वपटत्वाद्य- १३
वच्छिन्नं प्रत्येव न तु शरीरत्वेन हेतुता कार्यत्वावच्छिन्नं प्रति शरीरत्वेन हेतुत्वस्यासिद्धावुक्तानुमानस्याप्र-
योजकत्वाच्च ॥ ईश्वरसाधकपूर्वोपदर्शितानुमाने तु न कोपि दोषः क्वापि व्यभिचारानिर्णये न लाघवात्कार्य-
त्वावच्छिन्नं प्रतिकृतित्वेन हेतुत्वसिद्धावप्रयोजकत्वाभावात् बाधाद्यभावाच्च ॥ न चैवं कार्यत्वावच्छिन्नं प्र-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तिचेष्टात्वेन हेतुत्वमपि न स्यात्. शरीराभावे चेष्टाया असंभवेन क्षित्यंकुरादावेव व्यभिचारादिति वाच्यं ॥ अग
त्या घटत्वपटत्वाद्यवच्छिन्नं प्रति कुलालादिचेष्टाया विजातीयचेष्टात्वेन हेतुत्वाभ्युपगमेन तादृशहेतुत्वाभा
वे क्षतिविरहात् । न च घटत्वाद्यवच्छिन्नं प्रत्यपि चेष्टाशरीरयोः कथं हेतुत्वं संसर्गाद्यकालीनघटादौ व्यभिचारादि
ति वाच्यं ॥ विजातीयघटत्वावच्छिन्नं प्रत्येव स्वप्रयोज्यविजातीयसंयोगसंबंधेन तयोर्हेतुत्वात् ॥ यत्तु अर
ण्यादौ तृणादिके दृष्टे तत्कर्तुरदर्शनेन च इदं तृणादिकं केनचिच्छरीरिणा कृतमित्यनुमीयते नत्वंकुरपर्व
तादावित्यनुभवसिद्धमिति शरीरिकर्तृककार्यसमहे शरीरिकर्तृकत्वानुमापकः कश्चन धर्मो विलक्षणः स्वरूप
मुपेयः स च धर्मो जातिरूपाधिर्वेत्यन्यदेतत् ॥ एवं च तादृशधर्म एव चेष्टाशरीरयोर्जन्यतावच्छेदकः ॥ ताव
तैव क्षित्यंकुरादौ व्यभिचारवारणात् ॥ न चैवं लाघवात्कार्यत्वावच्छिन्नं प्रति कृतित्वेन हेतुत्वानुपपत्तिः तत्तत्ता
दृशधर्मविशेषस्य जन्यतावच्छेदकत्वेपि लाघवानपायादिति वाच्यं ॥ कार्यत्वस्य संग्राहकत्वेन तस्यैव जन्यताव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

च्छेदकत्वे संभवति तस्यागामित्वविरोधात्। लाघवेप्यपि संग्राहकलाघवस्य बलवत्वादिति॥ तन्न। तादृशविलक्ष
णधर्मे मानाभावात्॥ न च तादृशधर्माभावे कथं शरीरिकर्तृकत्वानुमानमिति वाच्यं॥ तत्र घुण्क्षीत्वादिनैव तद
नुमानात्। न चाप्रयोजकत्वं। निरुपाधिसहचारस्यैवानुकूलतर्कत्वात्॥ एतेन वल्क्षीत्वादिनैवांकुरत्वादिना
पि तदनुमानापत्तिरित्यपि निरस्तं॥ अंकुरत्वादौ तत्सहचाराग्रहात्॥ न च निरुपाधिसहचारस्यानुकूलतर्क
त्वे मानाभाव इति वाच्यं। ज्ञात्वादिना सनाद्यनुमानान्यथानुपपत्तेरेव मानत्वादिति सांप्रदायिकाः। नवीनास्तु
अपाणिपाद इत्यादिश्रुतीनामस्मदादिशरीरसंस्थानतुल्यसंस्थानशरीराभावमात्रबोधकत्वेन भोग
स्यशरीरनियतत्वे मानाभावेनचेश्वरे शरीराभावासिद्ध्या बाधाभावेन क्षित्यंकुरादौ व्यभिचारानिर्णये
न कृतेरिव चेष्टाशरीरयोरपि लाघवात्कार्यत्वावच्छिन्नं प्रत्येव हेतुतया ऽप्रयोजकत्वाभावेन चोक्तानु
मानादीश्वरशरीरसिद्धौ बाधकाभावे नेश्वरस्य शरीरित्वमेव॥ अत एवेश्वरोक्तत्वेन वेदप्रामाण्यसिद्धिः १४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वरसत एव संगच्छते ॥ अन्यथेश्वरस्य शरीराभावे वक्तृत्वासंभवेन वेदप्रामाण्यस्य भूतावेशन्यायाद्यनु
सरणक्लेशसाध्यतापत्तेः । तच्च शरीरं नित्यं लाघवात् । न चेश्वरस्य शरीरित्वेन ज्ञानादीनां जन्यत्वापत्तिः ॥
तत्कारणशरीरादेः संभवादिति वाच्यं ॥ लाघवादेव तेषां नित्यत्वसिद्धेः । न चैवं तच्चेष्टाया अपि नित्यत्वाप
त्तिः ॥ इष्टत्वात् । न चैवं ज्ञानत्वादेर्नित्यसाधारणत्वेन शरीरादिजन्यतावच्छेदकत्वानुपपत्तिर्जन्यत्वादे
र्निवेशे च गौरवमिति वाच्यं । तस्य फलमुखत्वेनादोषत्वात् ॥ नित्यसाधारणधर्मस्यापि कार्यतावच्छेदक
त्वे बाधकाभावाच्च ॥ अथेश्वरस्य स्थूलशरीरांगीकारे तस्य पाषाणमध्यवर्त्तिकीटशरीरकर्तृत्वानुपप
त्तिः ॥ तत्राभग्नस्य स्थूलशरीरस्य प्रवेशासंभवात् ॥ अणुशरीराभ्युपगमे न च सकलकार्यकर्तृत्वानुप
पत्तिरिति चेन्न ॥ तस्याचिंत्यालुप्तशक्तिकत्वेनाभग्नस्यापि तच्छरीरस्य पाषाणादौ प्रवेशसंभवात् । नाना
ऽणुशरीराभ्युपगमाद्वा । यद्वा परमाणव एव प्रयत्नवदीश्वरात्मसंयोगजन्यचेष्टावंतः ईश्वरस्य शरीराणि ·

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नचैवं चेष्टाया अनित्यत्वे सर्वदाऽसंभव इति वाच्यं ॥ अनित्यचेष्टाया अपि सर्वदासंभवात् । न च परमाणूनां चेष्टा
वदंत्यावयवित्वरूपशरीरत्वासंभव इति वाच्यं । चेष्टाजनकतावच्छेदकजातिविशेषस्यैव शरीरत्वरूपत्वात् ॥
न च तेजस्त्वादिना सांकर्यात्कथं शरीरत्वस्य जातिरूपतेति वाच्यं ॥ उपाधिसांकर्यस्येव जातिसांकर्यस्यापि प्रमा
णाभावेनादोषत्वात् ॥ न च चेष्टात्वस्याननुगतस्याभावात्कथं तदवच्छिन्नजनकतावच्छेदकत्वं शरीरत्वस्ये
ति वाच्यं ॥ तस्यापि प्रयत्नजन्यतावच्छेदकशरीरत्वं ॥ अत एव सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपादि
त्यादिश्रुतयो भ्रामयन्सर्वभूतानीत्यादिस्मृतयश्च साधु संगच्छंते ॥ यत्तु शरीरेण चेष्टानुमाय कार्यत्वा १५
दात्कार्यत्वावच्छिन्नं प्रति चेष्टात्वेन हेतुत्वस्यावश्यकत्वेन चेष्टोपक्षीणस्य शरीरस्य कार्यत्वावच्छिन्नं प्र
ति हेतुत्वासिद्ध्योक्तशरीरजन्यत्वानुमानान्नेश्वरशरीरसिद्धिः संभवतीति । तन्न । तथापि जन्यत्वानुमा
नेनैव क्षित्यंकुरादिजनकचेष्टासिद्धौ तज्जनकतयेश्वरकृतिशरीरयोः सिद्धौ शरीरीश्वरसिद्धेराव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रूपकत्वात्॥ नचैवमनंतशरीरकल्पनागौरवेण लाघवात्कार्यत्वावच्छिन्नंप्रतिचेष्टीयहेतुत्वासिद्ध्याकथ
मीश्वरशरीरसिद्धिरितिवाच्यं। तादृशगौरवस्यफलमुखत्वेनादोषत्वात्॥ अथतथापिचेष्टायांघटादौ
स्वप्रयोज्यविजातीयसंयोगसंबंधेनतध्वंसादौचस्वप्रयोज्यविजातीयसंयोगध्वंसादिसंबंधेनहेतुतयाऽ
नुगतसंबंधाभावात्कथंकार्यत्वावच्छिन्नंप्रतिहेतुत्वमितिचेन्न। संबंधाननुगमस्यादोषत्वेनसर्वत्रस्वप्रयो
ज्यध्वंसवत्त्वसंबंधेनैवचेष्टायाहेतुत्वाभ्युपगमेनवाऽदोषात् प्रतिक्षणंकिंचिद्विनश्यतीतिनियमेनतद्वि
नाशस्यचांततईश्वरीयचेष्टाप्रयोज्यत्वेनक्वापिव्यभिचाराभावात्। अतएवरामकृष्णादिशरीरेचेष्टावि
शेषहेतुकृत्याश्रयत्वेनापीश्वरसिद्धिर्बोध्या॥ अथसमवायेननानाविधविजातीयचेष्टायामवच्छेदकतया
नानाविधकृतेर्हेतुतयैवविधनित्यकृतेस्तद्धेतुत्वासंभवः। नचैकस्यापिनित्यकृतेर्नानाशरीरावच्छिन्नत्वो
पगमेननानाशरीरहत्तिनानाशरीरहत्तिनानाविधविजातीयचेष्टाहेतुत्वेबाधकाभावइतिवाच्यं॥ तथास

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तिनानाविधप्रजातीयचेष्टाया देशनियमानुपपत्तेरिति चेन्न· कमवायेन विजातीयतत्तच्चेष्टां प्रति स्वीयद्विजाती
यतत्तच्चेष्टाहेतुप्रकारतानिरूपितविशेष्यतासंबंधेनल्पकल्पाऽवकृतेर्हेतुत्वेपि देशनियमोपपत्तेः। नचैव
मपिकृतेर्निमित्ततया चेष्टायाः कालनियमासंभव इति वाच्यं॥ समवायेन तत्तत्कालीनविजातीयतत्तच्चेष्टां प्रति
स्वीयतत्तत्कालीनविजातीयतत्तच्चेष्टाहेतुविघटितोपदर्शितसंबंधेन कृतेर्हेतुत्वोपगमेन चेष्टायाः काल
नियमस्याप्युपपत्तेः॥ नचैवं दीधितिकारस्य विंशसंगुल्यवच्छेदेन नानाचेष्टानुरोधेन विंशतिप्रयत्नस्वी १६
कारस्यासंगतत्वापत्तिः। उक्तरीत्या तत्राप्येकेनैव प्रयत्नेन नानाचेष्टोपपादनस्य संभवादिति वाच्यं॥ ता
वताक्षतेरभावात्। नचैवं जीवात्मनि कृत्यंगीकारे व्यर्थः। अस्मदादिशरीरचेष्टाया अपीश्वरकृत्यैव संभवा
दिति वाच्यं॥ करं करोमीत्यादिप्रत्यक्षबलादेव तदंगीकारात्। नचैवमपि जीवनयोनिकृतिकार्यस्येश्वरकृ
त्यैव निर्वाहे तदंगीकारो व्यर्थः स्यादिति वाच्यं॥ इष्टापत्तेरिति वदंति। स्यादेतत्। कार्यत्वावच्छिन्नं प्रति कृतिसा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मान्यहेतुत्वेमानाभावः। अतिप्रसंगभंगायघटत्वावच्छिन्नंप्रतिविजातीयविजातीयकृतित्वादिना कुलाला-
दिकृत्यादीनांविशिष्यहेतुत्वस्यावश्यकतयोक्तत्वाघटाभावात्॥ नचयद्विशेषयोः कार्यकारणभावोऽसति
बाधकेतत्सामान्ययोरपीतिन्यायेनतत्सिद्धिः॥ अन्यथासर्वत्रसामान्यकार्यकारणभावमात्रस्योच्छेदप्रसं-
गादितिवाच्यं॥ कार्यत्वस्याननुगतस्यदुर्वचतयातादृशसामान्यहेतुत्वस्यासंभवदुक्तिकत्वात्॥ नचप्रा-
गभावप्रतियोगित्वमेवतदितिवुक्तं। प्रतियोगित्वस्यस्वरूपसंबंधात्मकतयाननुतत्प्रतियोगिरूपत्वेना-
ननुगमात्॥ नचस्वाश्रयप्रतियोगित्वसंबंधेनप्रागभाववत्त्वमेवकार्यत्वमथवाविषयतादिवदति-
रिक्तमेवप्रतियोगित्वमंगीकार्यमतोनोक्तदोषइतिवाच्यं॥ प्रागभावत्वस्यदुर्वचत्वात्॥ नचध्वंसप्रतियो-
ग्यभावत्वंप्रागभावत्वमितिवाच्यं॥ ध्वंसत्वस्यप्रागभावप्रतियोग्यभावत्वरूपतयाऽन्योन्याश्रयात्॥ नच
ध्वंसत्वप्रागभावत्वयोरखंडोपाधित्वान्नदोषः॥ प्रागभावानंगीकारेतथाप्यनिस्तारात्॥ ध्वंसप्रतियोगि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तस्य ध्वंसादृत्तित्वेन तस्यापि कार्यत्वरूपत्वासंभवात्॥ न चोत्पत्तिमत्त्वमेव कार्यत्वं उत्पत्तेरतींद्रियतयालौ
किकप्रत्यक्षाभावेप्यलौकिकप्रत्यक्षत्वानपायादिति वाच्यं॥ आद्यक्षणसंबंधरूपायास्तस्या अथननुगमा
त्॥ अत एव न स्वरूपसंबंधविशेषोपीति॥ मैवं॥ उत्पत्तिमत्त्वस्यैव कार्यत्वरूपत्वसंभवात्॥ विषयतात्वादि
वत्कार्यत्वस्याप्यतिरिक्तत्वेनादोषाच्च॥ न चाननुगमः। स्वाधिकरणसमयध्वंसवत्त्वसंबंधावच्छिन्नस्वनिष्ठप्र
तियोगिताकाभाववत्त्वावच्छिन्नकालिकविशेषणतासंबंधेन वृत्तित्वरूपस्य तस्यानुगतत्वात्॥ अत्र च स्वपद १७
स्य लक्ष्यपरत्वात्॥ अत्र केचित्॥ कार्यत्वावच्छिन्नं प्रति कृतित्वादिना सामान्यहेतुत्वाभावेपि न क्षतिः। पी-
पाकवादिमते विक्रमते पाकजघटादौ खंडघटादौ सर्गाद्यकालीनघटादौ च कुलालादिकृतिजन्यत्वबाधेन घ
टत्वादिहेतुना कृतिजन्यत्वसाधने मतभेदेन शरीरीयं शरीरीश्वरसिद्धेर्निष्प्रत्यूहतादि विशेषहेतुत्वस्यैवानुकूल
तर्कत्वात्। यत्तु कुलालादिकृतेः स्वप्रयोज्यविजातीयसंयोगसंबंधेन कालनिष्ठप्रत्यासत्त्या हेतुत्वेन न तत्र कृ

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लालादिकृतिजन्यत्वबाधः पाकजघटादिस्थले प्राक्तनपरमाणुद्वयसंयोगध्वंसघटाणुकादिध्वंसानामुत्तरसंयोगध्वंसघटाणुकाद्यावत्ततः कालोपाधितयापि जनकत्वेन पाकजघटोत्पत्तिप्राक्कालावच्छेदेन तदधिकरणकाले कुलालादिकृतेः पाकद्वारा स्वप्रयोज्यविजातीयसंयोगेन सत्त्वात्॥ एवं खण्डघटोत्पत्तिप्राक्कालावच्छेदेनापि तदधिकरणकाले कुलालादिकृतेरवस्थितकपालद्वयसंयोगरूपस्वप्रयोज्यविजातीयसंयोगेन सत्त्वादिति। तन्न। चेष्टादण्डादेर्लघुसंबन्धान्तरेण हेतुत्वासंभवेन घटत्वाद्यवच्छिन्ने स्वप्रयोज्यविजातीयसंयोगेन हेतुत्वेपि कुलालादिकृतेर्विजातीयकृतित्वेन लाघवाद्विषयतयैव हेतुत्वात्॥ एवमपि सर्गाद्यकाले स्वप्रयोज्यविजातीयसंयोगेन कुलालादिकृतेः कथमप्यसत्त्वेन सर्गाद्यकालीनघटकर्तृत्वेनेश्वरसिद्धेरभवायाच्च॥ अत एव घटाद्युत्कुलविजातीयकृतिमत्त्वादेरेव कुलालत्वादिरूपत्वेनेश्वरस्याद्य(कुलालादिरूपतया नमः कुलालेभ्यः कर्मारेभ्यश्चेति श्रुतिरपि साधुसंगच्छते कर्मारो लोहकार इति भट्टभास्क

रः॥ नचैवं तत्र जगत्कर्तृत्वमसिद्धं॥ कस्येव न सिद्धेः॥ अथ घटत्वावच्छिन्नं प्रति विजातीयकृतित्वेन हेतुता॥
एवं पटत्वावच्छिन्नं प्रति विजातीयकृतित्वेन। एवमन्यत्रापि। तथा चेश्वरकृतेः सर्ग - कालीनघटपटादिजन
कत्वे सांकर्यं। कुलालादिकृतौ घटजनकतावच्छेदकं तत्त्वं न पटजनकतावच्छेदकं कुविंदकृतौ च पटजनकता
वच्छेदकं तत्त्वं न घटजनकतावच्छेदकं एकस्यामीश्वरकृतौ तयोः समावेशादिति चेन्न। उपाधिसांकर्यस्येव जा
तिसांकर्यस्याप्यदोषत्वात्॥ यत्तु घटत्वाद्यवच्छिन्ने विजातीयचेष्टाया हेतुत्वावश्यकत्वेन विजातीयकृते- १८
र्विषयतया स्वप्रयोज्यविजातीयसंयोगेन वा हेतुत्वे मानाभावः॥ वस्तुतस्तु कृतेश्चेष्टात्तया विजातीयसंयो
गस्तेन च घटादीननुभवेन घटत्वाद्यवच्छिन्नं प्रति विजातीयसंयोगत्वादिनैव हेतुत्वं न तु चेष्टायामपि ता
वतैव निर्वाहः तथा च नोक्तरीत्येश्वरसिद्धिः संभवतीति तन्न। एवमपि सर्गाद्यकालीनो घटो विजाती
यसंयोगजन्यः घटत्वादिदानींतनघटवदित्याद्यनुमानेन सर्गाद्यकालीनघटादिजनकविजातीयसं

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDI

योगसिद्धौ तज्ज्ञानकफलाश्रयत्वेन शरीरीश्वरसिद्धेरक्षुण्णत्वात्॥ यदपि एवं स्वर्गीयकालीनघटं प
क्षीकृत्य दंडजन्यत्वसाधकघटत्वहेतुकानुमानबलाज्जन्यदंडजन्यत्वबाधेन नित्यदंडजन्यत्वस्यापि त
त्सिद्ध्यापत्तिः॥ यद्विवसमान्यतो घटत्वावच्छिन्नंप्रति दंडत्वेन न हेतुता किं तु तद्व्यक्तिवैजात्यमं
गीकृत्य तदवच्छिन्नंप्रत्येव हेतुत्वं तथा चानुकूलतर्कविरहेणोक्तानुमानान्न नित्यदंडजन्यत्वसिद्धिरि
ति विभाव्यते तदा तादृशवैजात्यावच्छिन्नं प्रत्येव विजातीयसंयोगत्वादिना हेतुत्वोपगमान्नोक्तरीत्येश्व
रसिद्धिरिति॥ तदपि मंदं॥ घटत्वाद्यवच्छिन्नं प्रति विजातीयसंयोगत्वादिना हेतुत्वेनैव निर्वाहे दंडादेर
पि स्वप्रयोज्यविजातीयसंयोगेन हेतुत्वे मानाभावादिति वदंति। तच्चिंत्यं। दंडकृत्यादीनां विरम्य व्यापारेण
धायकत्वे न फलपर्यंतं सत्वस्यावश्यकत्वे न विनिगमनाविरहादेवं तेषां हेतुत्वस्यावश्यकत्वादिति। इ
दं तु चिंत्यते। जन्यत्वस्य जनकताघटितत्वं जनकतायाश्च स्वजनकतावच्छेदकनिष्ठकार्यतावच्छेदकाव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

छिन्नव्यापकतावच्छेदकत्वघटितत्वमिति नियमः॥ एवं चात्र कृतित्वनिष्ठकार्यत्वावच्छिन्नव्यापकतावच्छेदक
त्वघटितजनकताघटितकृतिजन्यत्वं साध्यं तच्चनाद्यः॥ कृतित्वे कार्यत्वावच्छिन्नव्यापकतावच्छेदकत्वस्यासि
द्धतयातद्घटितजनकताघटितकृतिजन्यत्वस्य साधनासंभवात्। नांत्यः। अभिव्याप्तिसामानाधिकरण्येन सा
ध्यसिद्धेस्तद्रूपत्वे सिद्धसाधनात्॥ अवच्छेदकावच्छेदेन साध्यसिद्धेस्तद्रूपत्वे च बाधात्॥ न च समवायेन का
र्यत्वावच्छिन्नं प्रति विषयतया कालिकसंबंधेन कार्यत्वावच्छिन्नं प्रति कालिकसंबंधेन तादात्म्यसंबंधेन १२
कार्यत्वावच्छिन्नं प्रति साध्यत्वाद्विषयतया कृतित्वेन हेतुत्वमिति पक्षत्रये यथाक्रमं विषयतया कृति
मदन्यास्मिन्समवायेनावृत्तित्वरूपं कालिकसंबंधेन कृतिमदन्यास्मिन्कालिकसंबंधेनावृत्तित्वरूपं साध्य
त्वाद्विषयतया कृतिमदन्यास्मिन्तादात्म्येनासंबद्धत्वरूपं च कृतिजन्यत्वं जनकत्वाघटितमेव साध्यम
तो नोक्तदोषप्रसक्तिवाच्यं। आद्ये सिद्धसाधनात्। आद्ययोर्नैयायिकानामप्रसिद्धेः। ईश्वरकृते सर्वविषयक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त्वात्सार्वदिकत्वाच्च॥ नच कालिकसंबंधेन कृतिमदन्यत्वं नित्यगगनादावेव प्रसिद्धमिति वाच्यं॥ तत्र का
लिकसंबंधेन वृत्तित्वस्याप्रसिद्धेः॥ नच कालिकसंबंधावच्छिन्नवृत्तितीयस्वरूपसंबंधावच्छिन्नप्रतियो
गिताकः कालिकसंबंधेन कृतिमदन्यवृत्तित्वाभावस्साध्यस्तत्र च व्यधिकरणसंबंधावच्छिन्नप्रतियोगि
ताको घटादौ प्रसिद्ध एवेति वाच्यं॥ एवं सति सिद्धसाधनार्थान्तरयोरापत्तेः। तस्माज्जनकत्वघटितमति
रिक्तमेव जन्यत्वमित्यभिप्रायेणैवोक्तानुमानावतारो द्रष्टव्यः॥ वस्तुतस्तु साध्यताख्यविषयतासंबंधेन कृ
तिमान् कार्याव्यवहितपूर्वकालत्वात्कालत्वाद्घटाद्यव्यवहितपूर्वकालवत् जन्यविषयतासंबंधेन
स्वाव्यवहित × मत्वमेव जन्यत्वाघटितं साध्यं लाघवादिति पूर्वमेवोक्तं नत्र च नोक्तदोषः॥ अपरे तु जन्या
व्यवहितसर्वकालः कालिकसंबंधेन कृति × पूर्वकालीनकृतिमत् कार्यत्वात् घटादिवत् जन्यस्वा
व्यवहितोत्तरक्षणोत्पत्तिकत्वविषयत्वोभयसंबंधेन कृतिमत्कार्यत्वाद्घटादिवदित्यनुमानानि प्रसिद्ध

साध्यकानि दुष्टकानीश्वरसाधकत्वव्यवसेयानीत्याकूतमलमतिसूक्ष्मविचारेण । अत्र केचित् । उक्तानुमाने
नक्षित्यंकुरादिजनककृतिसिद्धावपि न तदाश्रयतयेश्वरसिद्धिः । तस्याः शरीरादिजनकगगनादिवन्निरा
श्रयत्वस्यापि संभवेन तदाश्रये प्रमाणाभावात् ॥ कृतिर्द्रव्याश्रिता गुणत्वादित्याद्यनुमानानामप्रयोजकत्वात्
गुणत्वसाधकानुमानस्याप्यप्रयोजकत्वेन तत्र गुणत्वे मानाभावाच्च ॥ अन्यथा गगनादिकं द्रव्याश्रितं गुणज
नकत्वाद्घटादिवदित्यनुमानेन गगनाद्याश्रयसिद्धिप्रसंगात् ॥ न च परमाण्वादौ व्यभिचारः । तस्य पक्षस २०
मत्वादिति वदंति । तच्चिंत्यं । निरुपाधिकसहचाररूपानुकूलतर्कसत्त्वेनोक्तानुमाने नैव तस्याऽव्याप्तितत्त्वसि
द्धेः । अन्यथा तन्मात्रबलब्धहृद्यानां अज्ञत्वादिना सत्ताद्यनुमानानां विलयापत्तेः । विपक्षभिन्नत्वस्योपाधितया गग
नादिपक्षकानुमानान्न गगनाश्रयसिद्धिः । किंच घटादिरूपकार्यैकुलालादिरूपकर्तुरपि जनकतयोक्त
रीत्या कर्तृजन्यतानुमानात्क्षित्यंकुरादिकर्तृत्वेनेश्वरसिद्धिर्दुराराधैव । अत्र वदंति । घटादिहन्निविषय

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तासंबंधेन ज्ञानंप्रति घटादिवृत्तिविषयतासंबंधेन ज्ञानंप्रति घटादिवृत्तिविषयतासंबंधेन ज्ञानस्य हेतुत्वा
वश्यकतया घटादिनिर्विकल्पकात्पूर्वं तादृशहेतुसंपत्त्यर्थमीश्वरज्ञानस्वीकार आवश्यकत्वदाश्रयत्वे
नचेश्वरसिद्धिः॥ तथाहि घटादिचाक्षुषे घटादिचक्षुःसंयोगस्य संनिकर्षविधया हेतुत्वं निर्विवादं। तच्चा
त्मनिष्ठप्रत्यासत्त्यान संभवति चक्षुःसंयोगस्यात्मन्यसत्त्वादतो विषयनिष्ठप्रत्यासत्त्यैव तद्वाच्यं॥ नच
स्वाश्रयीभूतचक्षुःसंयुक्तमनःप्रतियोगिकविजातीयसंयोगेन तस्यात्मनि सत्त्वमस्त्येवेति वाच्यं॥ तथा
पि घटादौ चक्षुःसंयोगदशायां संयुक्तसंबंधेन चक्षुःसंयोगस्यात्मनि सत्त्वे न घटादिचाक्षुषापत्त्या घटा
दिचाक्षुषं प्रति घटादिचक्षुःसंयोगस्योक्तगुरुसंयोगेन विषयभेदेनानंतहेतुत्वस्यावाच्यतया तदपेक्ष
ऽव्यवृत्ति लौकिकविषयतासंबंधेन चाक्षुषत्वावच्छिन्नं प्रति समवायेन चक्षुःसंयोगस्य विषयमनिवेश्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विषयनिष्ठमत्यासत्याहेतुत्वस्यैवलाघवेनोचितत्वात्॥ नचविषयनिष्ठप्रत्यासत्याहेतुत्वेप्येवपुरुषीयच
क्षुःसंयोगदशायामन्यपुरुषस्यचाक्षुषापत्तिवारणायतत्पुरुषीयत्वनिवेशेनगौरवमितिवाच्यं॥ विष
यापेक्षयापुरुषाणामल्पत्वात्। एवंचयत्रघटादावेवचक्षुःसंयोगस्तत्रसमवायेनात्मनिघटादिचाक्षु
षापत्तिः। नचघटादिचाक्षुषत्वस्यैकस्यचित्कार्यतानवच्छेदकतयानतदवच्छिन्नापत्तिरितिवाच्यं॥ घटा २१
दिचाक्षुषत्वस्यचघटादिचाक्षुषेच्छाविरहविशिष्टभिन्नविषयकानुमितिसामग्र्यभावस्यैवकार्यताव
च्छेदकतयासद्दलानवच्छिन्नापत्तिसंभवात्॥ नचतदितरसंबंधेनकार्योत्पादकसामग्रीविशिष्टायाए
वतत्संबंधेनकार्योत्पादकसामग्र्याएककालीनत्वसंबंधेनैववैशिष्ट्यस्यनिवेशनीयतयातत्सामग्र्यंतदा
नींपटादौसत्त्वेनैववैशिष्ट्यस्यतत्रसत्त्वात्। अतोघटादिहृन्निविषयतासंबंधेनज्ञानंप्रतितेनसंबंधेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ज्ञानस्य हेतुत्व वाच्यं तथा सति नोक्तापत्तिः। समवायेन घटादिचाक्षुषोत्पादकसामग्र्या घटादिवृत्तिविषय-
तासंबंधेन ज्ञानविशिष्टचक्षुःसंयोगरूपविषयतासंबंधेन घटादिचाक्षुषसामग्र्या एककालीनत्वसंबं-
धेनाप्यभावात्॥ तदानींतादृशसामग्र्याः क्वाप्यसत्वात्। न च ज्ञानत्वावच्छिन्नस्य विषयभेदेनानंतहेतुतानां
सन्निकर्षस्य च भिन्नहेतुतायाः कल्पनापेक्षया सन्निकर्षस्यैवात्मनिष्ठप्रत्यासत्त्या विषयभेदेन हेतुता कल्प-
नमेवोचितमिति वाच्यं॥ इंद्रियभेदेन लौकिकालौकिकप्रत्यक्षभेदेन च विभिन्नसन्निकर्षहेतुतायां विषयानंत-
र्भावमपेक्ष्य विषयभेदेन ज्ञानहेतुतायां भिन्नसन्निकर्षहेतुतायां च लाघवात्॥ न चोक्तापत्तिवारणार्थं घ-
टादिवृत्तिविषयतासंबंधेन ज्ञानं प्रति तादात्म्येन घटत्वादिना घटरूपविषयस्यैव हेतुतास्तु तथा च नोक्त-
रीत्येश्वरसिद्धिः संभवतीति वाच्यं॥ एवमपि यत्र पटत्वादावेव चक्षुःसंयुक्तसमवायस्तत्रोपदर्शितरीत्या
समवायेनात्मनि घटत्वादिचाक्षुषापत्तिवारणाय घटत्वादिवृत्तिविषयतासंबंधेन ज्ञानं प्रति तेन संबंधे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नघटत्वादिज्ञानहेतुतायाः आवश्यकत्वेन घटत्वादिनिर्विकल्पकात्पूर्वं तादृशाकारणसंपत्त्यर्थमीश्वरज्ञान
स्वीकारस्यावश्यकत्वात्। न च तत्रापि घटत्वादिवृत्तिविषयतासंबंधेन ज्ञानत्वावच्छिन्नं प्रति घटत्वत्वादिना
घटत्वादेर्हेतुतयैवापत्तिकरणसंभवतीति वाच्यं॥ घटेतरावृत्तित्वविशिष्टसकलघटवृत्तित्वरूपघटत्व
त्वादिना हेतुत्वपिक्षया घटत्वादिवृत्तिविषयतासंबंधेन ज्ञानत्वेन हेतुतायां लाघवात्॥ न च घटत्वादि
निर्विकल्पकात्पूर्वमपि कस्यचित्पुरुषस्यावश्यं घटत्वादिज्ञानसत्त्वान्नेश्वरज्ञानस्यावश्यकतेति वाच्यं २२
एवमपि सर्गाद्यकालीनघटत्वादिनिर्विकल्पकपूर्वं पुरुषांतरीयघटत्वादिज्ञानाभावेन तादृशाकारण
संपत्त्यर्थमीश्वरज्ञानस्वीकारस्यावश्यकतया तत्प्रायपत्त्वेनेश्वरसिद्धेर्दुःप्रणापि वारयितुमशक्यत्वा
दिति। अत्रेदमवधेयं। कार्यत्वहेतुकपूर्वोपदर्शितानुमानादिव आयोजनत्वादिहेतुकानुमानादपीश्वर
सिद्धिः॥ न उक्तमाचार्यैः॥ कार्यायोजनधृत्यादेः पदात्प्रत्ययतः श्रुतेः। वाक्यात्संख्याविशेषाच्च साध्यो वि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्च विदव्यय इति। अत्र कार्येत्यादौ भावप्रधानो निर्देशः। प्राचीनमते तादात्म्यसंबंधस्य व्याप्यतानवच्छेद
कत्वेन यथाश्रुतेऽनुपपत्तेः। पंचम्यर्थः प्रयोज्यत्वं अन्वयश्चास्य साध्यपदार्थानुमितिविषयैकदेशानु
मितौ तथा च कार्यत्वायोजनत्वधृतित्वादिपदत्वप्रत्ययत्वश्रुतित्ववाक्यत्वसंख्याविशेषत्वात्मकब
हुविधहेतुप्रयोज्यानुमितिविषयो विश्वविषयकनित्यज्ञानाश्रयो नित्येश्वर इति कारिकार्थः॥ अथायो
जनपदार्थः करणाद्युत्पत्त्या कर्म धृतित्वादौ त्वादिपदार्थो नाशत्वं पदपदार्थः पद्यते वाच्यतेऽनेने
नेति व्युत्पत्त्या व्यवहारः प्रत्ययपदार्थः प्रमासंख्याविशेषो द्वित्वादिः। एवं च जन्यं सकर्तृकं कार्यत्वाद्घ
टवत् सर्गाद्यकालीनं ब्रह्माण्डकारंभपरमाणुसंयोगजनकं कर्म प्रयत्नजन्यं कर्मत्वात्। अस्मदादिशरीरक्रि
यावत् ब्रह्माण्डादिधृतिः प्रयत्नजन्या धृतित्वात् आकाशे पक्षिधृतिवत् ब्रह्माण्डादिविनाशः प्रयत्नजन्यः
नाशत्वात् पाट्यमानपटनाशवत् सर्गाद्यकालीनघटपदजन्यपनादिव्यवहारः प्रयत्नजन्यः व्यवहारत्वात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इदानींतनघटपटानयनादिव्यवहारवत्। वेदजन्यप्रमा गुणजन्या प्रमात्वात् प्रत्यक्षप्रमावत् वेदः पौरुषे
यो वेदत्वात् यन्नैवं तन्नैवं यथा गगनादि वेदः पौरुषेयो वाक्यत्वात् भारतवत् सर्गाद्यकालीनद्व्यणुकपरि
माणजनकद्वित्वसंख्या अपेक्षाबुद्धिजन्या द्वित्वत्वात् अस्मदाद्यपेक्षाबुद्धिजन्यद्वित्ववदित्याद्यनुमानैरीश्व
रसिद्धिरिति भावः। न चाद्यायोजकत्वमिति वाच्यं। सर्वज्ञं ततो निरूपाधिसहचारस्यैवानुकूलतर्कत्वात्।
वेदत्वं च न जातिः कत्वादिना संकरात्। किंतु विजातीयधर्मजनकाध्ययनप्रतियोगित्वं। लौकिकवाक्यभिन्न २३
वाक्यत्वं वा मणिकृन्नोक्तं शब्दशास्त्रोपजीविप्रमाणातिरिक्तप्रमाणाजन्यप्रमितिविषयार्थकत्वे सति शब्दज
न्यवाक्यार्थज्ञानाजन्यप्रमाणशब्दत्वं वेदत्वं। अत्र स्वर्गादिसाधनत्वविशिष्टयागादिरूपस्य स्वर्गकामो य
जेतेत्यादिवेदार्थस्य स्वघटकीभूतालौकिकस्वर्गादेः शब्दशास्त्रोपजीविप्रमाणाभ्यामतिरिक्तेन प्रत्यक्षादि
प्रमाणेनाग्रहणान्न वेदे निरुक्तप्रमाणाजन्यप्रमितिविषयार्थकत्वमिति मन्तव्यं॥ घटोनास्तीत्यादिलौकिक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वाक्यस्यैव तदन्यत्वं शब्दजन्यवाक्यार्थज्ञानजन्यभारतस्य त्यादिवाक्यान्यत्वं प्रमाणशब्दत्वं च वेदेऽस्तीति ल
क्षणसमन्वयः घटोऽस्तीत्यादिलौकिकवाक्येऽतिव्याप्तिवारणाय पदस्यं तं॥ वेदात्मकशब्दप्रमाणेन साध्यादि
सिद्धिनिर्वाहकशब्दोपजीविनायागः स्वर्गसाधनं स्वर्गसाधनतावच्छेदकरूपवत्त्वादित्यनुमानादिप्रमाणे
न च वेदार्थस्य ग्रहणादसंभव इति शब्दशब्दोपजीविप्रमाणातिरिक्तत्वं प्रमाणविशेषणं घटोऽस्तीत्यादि
वाक्यार्थस्यापि शब्देन तदुपजीविनाऽनुमानेन च ग्रहणादतिप्रसंगतादवस्थ्यमिति भेदद्वयघटनं। न च
चक्षुरादेरदृष्टद्वारा शब्दोपजीवित्वेन तद्ग्राह्यार्थकलौकिकवाक्यातिव्याप्तिरस्त्येवेति वाच्यं॥ शब्दसहकृ
तेन येन प्रमितिर्जन्यते तत्त्वस्य शब्दोपजीविप्रमाणपदेन विवक्षणात्। अत एव तादृशार्थलाभायैव प्रमा
णपदमपि सार्थकं। द्वितीयप्रमाणपदं चासंभववारणाय वेदस्य मानार्थकस्मृतिभारतादिवाक्येऽतिव्या
प्तिवारणाय शब्दजन्येत्यादिदलं। जन्यवाक्यार्थज्ञानाजन्यत्वं तु वेदे मीमांसकनैयायिकोभयसाधारणं वेद॰

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वस्य निर्वक्तव्यतया मीमांसकमते ज्ञानजन्यत्वस्याप्रयोजकतया जन्यवाक्यार्थज्ञानजन्यत्वस्याभावप्रतियो
गितावच्छेदकत्वेन तदवच्छिन्नभेदरूपतादृशवाक्यार्थज्ञानाजन्यत्वस्य प्रसिद्धिरिति ज्ञाने शब्दजन्यत्व
विशेषणं ॥ अत्र शब्दजन्यत्वं शब्दप्रयोज्यत्वं स्मृत्यादिरूपवाक्यार्थज्ञानजन्यस्मृत्यादावतिव्याप्तितादवस्था
न। ऋषेर्वह्निमानित्यादिवाक्यवारणाय तत्तीर्थप्रमाणपदं। मननसाधारणाय चरमशब्दत्वोपादानं ॥ ननु
चक्षुरादिना घटादिस्मृत्यादिरूपलौकिकवाक्यार्थज्ञानजननेपि कुत्रचिद्विशेषणज्ञानद्वाराविशेषणबोधक २४
शब्दस्य सहकारित्वेन चक्षुरादिमात्रगृहीतार्थके लौकिकवाक्येऽतिव्याप्तिः॥ न च शब्दसहकारेणैव येन प्र
मितिर्जननेन तत्त्वस्य विव× चक्षुरादेरपि निरुक्तशब्दोपजीवित्वसत्त्वेन तादृश× प्रमाणत्वोक्तदोषस्यति
वार्यं॥ तथा सति स्वर्गसाधनत्वाद्यनुमापकस्वर्गसाधनतावच्छेदकयागविशेषत्वादिरूपलिंगात्मका
नुमानेन स्वलिंगकगुणत्वाद्यनुमितिजनने शब्दस्य सहकारितया तादृशानुमानस्य शब्दोपजीविप्रमाणा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तिरिक्तत्वेन तच्छास्त्रार्थकत्वस्य वेदे सत्त्वेनासंभवापत्तेरिति चेन्न ॥ शाब्दसहकारेणैव येन स्वजन्यज्ञानसमा
नविषयकप्रमितिर्जन्यते तदन्यप्रमाणागम्यार्थकं यच्च त्वं तदन्यत्वनिवेशेनोक्तदोषाभावात् ॥ गुणत्वा
द्यनुमितिर्वेदजन्यज्ञानसमानविषयकत्वाभावात् ॥ तत्समानविषयकानुमित्यादेश्चोक्तानुमाने न जनने
शाब्दस्य सहकारितानियमेन वेदस्य लेऽङ्गानुमानादेः शाब्दोपजीवित्वात् ॥ एतेनाचक्षुरादिजन्यवेदार्थ
गोचरोपनीतभानादिकमादायासंभव इत्यपि परास्तं । तादृशोपनीतभानादिजनकचक्षुरादेरपि वेदस्व
पदेनोपादाने नोक्तरीत्या शाब्दोपजीवित्वसत्त्वात् ॥ नन्वेवमपि यादृशचक्षुरादिव्यक्त्या शाब्दजन्यविशे
षणज्ञानसहकारेणैव यादृशवाक्यार्थज्ञानं जनितं तादृशचक्षुरादिमात्रगृहीतार्थकतादृशशब्दार्थ
कवाक्येऽतिव्याप्तिरत्स्येवेति वाच्यं ॥ तादृशवाक्यजनकवक्तृवाक्यार्थज्ञानस्यापि शाब्दप्रयोज्यत्वेन त
स्य शाब्दजन्यवाक्यार्थज्ञानाजन्यत्वदलाभावेनैवातिव्याप्तिवारणात् । शाब्दजन्यपदस्योक्तरीत्या शाब्दप्रयो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्यार्थकतायाआवश्यकत्वेनप्रत्यक्षरूपवक्तृवाक्यार्थज्ञानस्यशाब्दजन्यत्वेपिशाब्दाधीनविशेषणज्ञानजन्य
त्वेनशाब्दप्रयोज्यत्वात्॥ एतेननात्रशाब्दोपजीवीत्वेनेनशाब्दजन्यवाक्यार्थज्ञानोपजीवित्वंविवक्षितं।अ
न्यथायत्रप्रत्यक्षेणशाब्दंध्रुत्वाचैत्रःशाब्दवानित्युपनीतभानात्मकंतरं चैत्रःशाब्दायतेइतिप्रत्ययेगतस्तत्र
शाब्दघटितार्थबोधकवाक्येवाक्यार्थप्रत्यक्षजन्येऽतिव्याप्त्यापत्तेरित्यपिपरास्तं॥नत्रशाब्दप्रयोज्यवा
क्यार्थप्रत्यक्षजन्यत्वेनशाब्दजन्येत्यादिदलाभावादेवातिव्याप्त्यनवकाशात्।वेदवाक्यार्थज्ञानंविनैव २५
शाब्दजन्यतादृशवाक्यार्थघटकविशकलितस्वर्गादिपदार्थोपस्थितितोवेदार्थगोचरानुमानसंभवेना
संभवापत्तेश्च॥नचतथाप्यग्निर्हिमस्यभेषजंज्वरहरणकामोदशमूलीकषायंपिबेदित्यादिदृष्टार्थक
वेदेऽव्याप्तिरितिवाच्यं॥गुरुविप्रतपस्विदुर्गतानांप्रतेकुर्वीतभिषक्स्वभेषजैरित्याद्येकवाक्यतयाऽग्नि
भेषजपानादिनागुर्वादीन्प्रतिकुर्वीतेत्यलौकिकादृष्टसाधनत्वाद्यर्थस्यैवततात्पर्यविषयत्वादितिव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दंति। तन्न। वेदसमानार्थकवेदविपरीतानुपूर्वीकमुकादिवाक्यादावतिव्याप्तेर्गौरवाच्च॥ एतेन मंत्र-
ब्राह्मणान्यतरत्वं वेदत्वमित्यपि प्रत्युक्तं॥ ननु त्वाप्यवान्तरत्रसरेणावेव विश्रामेण परमाणुद्व्यणुकयोरेव प्र-
माणाभावे न कथं च परमाणुमानस्येश्वरसाधकत्वमिति चेन्न। परमाणुद्व्यणुकयोरनंगीकारे घटादेस्त्र-
सरेणुपुंजस्वरूपत्वे वाधकाभावे नातिरिक्तावयविविलोपापत्तेः। तदंगीकारे तु परमाण्वोरतीन्द्रियतया
घटादेः परमाणुपुंजस्वरूपत्वानुपपत्त्याऽतिरिक्तावयविसिद्धेः सुलभत्वात्॥ न च घटादेस्त्रसरेणुपुंजस्व-
रूपत्वे स्पार्शनप्रत्यक्षानुपपत्तिरिति वाच्यं॥ त्रसरेणोः स्पार्शनप्रत्यक्षाभ्युपगमात्॥ अत एव दीधि-
तिकृतापि त्रुटेरस्पार्शनत्वे तुप्रकृष्टमहत्त्वमपि तथात्वे त्वत्रुटिशब्देनाभ्युपगमः सूचितः। न च तयोरं-
गीकारेपि घटादेस्त्रसरेणुपुंजस्वरूपत्वे वाधकाभाव इति वाच्यं। तथात्वेपि निरवयवत्वप्रसंगाभावा-
त्। त्रसरेणुपुंजस्य चतुरणुकादिपुंजस्य वा घटादिस्वरूपत्वेपि तत्र विनिगमकाभावे नातिरिक्तावय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

विसिद्धेर्निष्प्रत्यूहत्वाच्च। न च तयोरभंगीकारेपि उत्कटीत्वादिविनिगमकाभावेनातिरिक्तावयवविसिद्धिः संभवत्येवेति
वाच्यं॥ त्रसरेणोः प्राथम्यस्यैवोणुरपीतिन्यायेन विनिगमकत्वात्। वस्तुतस्तु तयोरंगीकारे समवेतचाक्षुषत्वा
वच्छिन्नं प्रति चक्षुःसंयुक्तसमवेतसमवायत्वेनैकहेतुतयैव निर्वाहः। तयोरनंगीकारे तु त्रसरेणौ तद्रूपादिचा
क्षुषानुरोधेन द्रव्यचाक्षुषे चक्षुस्संयोगस्य द्रव्यसमवेतचाक्षुषे चक्षुःसंयुक्तसमवायस्यानंतप्रत्यक्षभेदभि
न्नहेतुत्वमधिकं कल्पनीयमिति युक्तस्तयोरंगीकार आवश्यकः। यत्तु तयोरंगीकारेपि न त्रुटितत्सन्निक २६
र्षीतत्तदीयरूपत्वादिचाक्षुषवारणाय चक्षुस्संयुक्तसमवेतसमवायत्वेन हेतुतायां महत्वादिकमवश्यं
निवेशनीयं तथा च त्रसरेणौ तद्रूपादिचाक्षुषव्यभिचारेण द्व्यान्यस्मिन्स्तत्समवेतं तच्चाक्षुषत्वस्यैव तज्जन्य
तावच्छेदकतया त्रसरेणौ तद्रूपादिचाक्षुषानुरोधेनोक्तकार्यकारणभावद्वयमावश्यकमिति लाघवाभावे
न तयोरनंगीकार एवोचित इति नवीनैरुक्तं। तन्न विचारसहं। अतींद्रियगुरुत्वादीनां प्रत्यक्षवारणाय लो

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

किंकृत्यक्षत्वावच्छिन्नं प्रति लौकिकं कृत्यक्ष[illegible]व[illegible]त्वं रूपविषयत्वेन हेतुत्वस्यद्रूपत्वतया व्यक्तिं विना जाते रभानेन च तद्घटित सन्निकर्षान्तरीयरूपत्वादिच्चाक्षुषकारणसंभवेन चक्षुः संयुक्तसमवेतसमवाय हेतुतायां महत्वनिवेशं विनैवोपपत्तेरिति। केचित्तु आम्नाभिप्रायो विध्यर्थः पाकं कुर्याः पाकं कुर्यामित्यादि मध्यमोत्तमपुरुषयोः तिङो इच्छाविशेषात्मकाज्ञाध्येषणानुज्ञाप्रश्नप्रार्थनार्थकतया प्रथमपुरुषेच्छा यामेव शक्तेरुचितत्वात्॥ भयेजनकाहि इच्छा आज्ञा अध्येषणीयप्रयोक्तुरनुग्रहयोनिकेच्छा अध्येषणा निषेधाभावव्यंजकेच्छानुज्ञाऽज्ञप्रयोजिकेच्छा प्रश्नः। प्राप्तीच्छा प्रार्थनेति विवेकः। स्वर्गकामनिष्ठतया आप्रेच्छाविषय इत्यादिशाब्दबोधः। वेदे चाप्तो भगवानेव यस्तु वेदे पौरुषेयत्वं नांगीकरोति तन्मते विधेरेवगर्भ इवश्चातिकुमार्याः पुंयोगेमातं। तथा चेच्छायाविध्यर्थत्वेन वैदिकविधिप्रतिपाद्येच्छा आत्मसमवेता इच्छा।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वात् लौकिकविधिप्रतिपाद्यात्मसमवेतेच्छावदित्याकारकावच्छेदकावच्छेदेनात्मसमवेतत्वसाध्यकानुमाना
दीश्वरसिद्धिरित्याहुः॥ तन्न शोभनं। कृत्यसाध्यत्वनिष्फलत्वानिष्टसाधनत्वाज्ञानकाले प्रवृत्तिवारणाय वृ
त्तिं प्रति कृतिसाध्यत्वेष्टसाधनत्वबलवदनिष्टाननुबंधित्वज्ञानस्य हेतुतया प्रवर्त्तनाविषयस्येव विध्य
र्थतया कृतिसाध्यत्वादीनां विध्यर्थत्वस्यावश्यकत्वेन आत्माभिप्रायस्य विध्यर्थत्वे प्रमाणाभावात्॥ अ
थ कृत्यसाध्यताज्ञानकाले प्रवृत्तिवारणाय साध्यतासंबंधेन कृतिप्रकारकज्ञानमेव प्रवर्त्तकमुच्यते ला ३७
घवात् न तु कृतिसाध्यताज्ञानं तथा तस्य तथात्वे प्रवृत्तिकारणतावच्छेदककोटौ साध्यत्वस्यापि संबंधनि
वेशे गौरवात्॥ तथा चाख्यातस्य लक्षणया कृतिसामान्यशक्त्यैव निर्वाहे लिङादिविधेः कृतिसाध्यत्वेन
स्वातंत्र्येण शक्तिरिति चेन्न॥ आख्यातत्वेनाख्यातार्थकृतेः क्रियाविशेष्यत्वेनैवान्वयबोधस्योपपत्तौ त्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दौ व्युत्पन्नत्वे न क्रियाविशेषणतया बोधासंभवेन लिङादिभिः स्वातंत्र्येण कृतिसाध्यत्वे शक्तिकल्पनस्याव
श्यकत्वात्॥ न च व्युत्पत्तिभेदकल्पनान्न दोष इति वाच्यं॥ शक्तिभेदं विना व्युत्पत्तिभेदकल्पने प्रमाणाभावेन
व्युत्पत्तिभेदसूचनायैव शक्तिभेदस्यावश्यकत्वात्॥ किंचाख्यातत्वस्यैकस्याभावेन तिप्त्वतस्त्वादीनामेव कृ
तिशक्ततावच्छेदकतयाऽकॢप्तशक्तिकस्य लिङादिविधेः कृतिसाध्यत्वे स्वातंत्र्येण शक्तिकल्पनमावश्यकं·
न चास्तु स्वातंत्र्येण शक्तिस्तथापि लाघवात्कृतित्वावच्छिन्न एव कल्प्यतां न तु कृतिसाध्यत्वत्वावच्छिन्ने गौर
वादिति वाच्यं॥ यस्मात्पदाद्यादृशधर्मप्रकारेण नियतोपस्थितिस्तत्पदस्य तादृशधर्म एव शक्यतावच्छेद-
कत्वस्यानुभवानुरोधेन कल्पनीयतया लिङादिविधितो नियमतः कृतिसाध्यत्वत्वावच्छिन्नोपस्थितेस्तद्ध-
र्मावच्छिन्नशक्तिकल्पनीयतया लिङादिविधितो नियमतः कृतिसाध्यत्वत्वावच्छिन्नोपस्थितेस्तद्धर्मावच्छि
न्नशक्तिकल्पनागौरवस्यादोषत्वात्॥ अन्यथा वेदपदस्वर्गपदादीनामपि गुरुधर्मावच्छिन्नशक्तिविलोपा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पत्तेः। ननु कृतिसाध्यताज्ञानस्य प्रवृत्तित्वे मानाभावः। कृत्यसाध्यताज्ञानकाले प्रवृत्तिवारणाय यावत्स्वरूपकृत्प्रवृत्तिय
त्पूर्वं प्रवृत्तिताकस्य कृत्यसाध्यताज्ञानाभावस्यैव प्रवृत्तिहेतुत्वौचित्यादिति चेन्न। कृत्यसाध्यताज्ञानाभावस्य
सर्वदा सत्त्वेन सर्वदा प्रवृत्त्यापत्तेः। कृत्यसाध्यताज्ञानाभावत्वेन हेतुतावच्छेदकगौरवेणालाघवेन कृति
साध्यताज्ञानत्वेनैव हेतुत्वौचित्याच्च॥ अथ कृत्यसाध्यताज्ञानाभावस्य हेतुत्वे प्रवृत्तिप्रतिदेशः कृत्यसाध्यपा
कवानित्यादि कृत्यसाध्यत्वविशिष्टवैशिष्ट्यावगाहि अनुमितिसामग्र्याः प्रतिबंधकत्वाकल्पनेन लाघवं। २८
ताद्दशानुमितिसामग्रीकाले विशेषणतावच्छेदकप्रकारकनिर्णयविधया कृत्यहेतुताकस्य कृत्यसाध्य
तानिश्चयस्यावश्यकतया कृत्यसाध्यताज्ञानाभावाभावेनैव प्रवृत्त्यनुत्पत्तिनिर्वाहादिति चेत्मैवं॥ कृतिसा
ध्यताज्ञानस्य हेतुत्वेपि वक्ष्यविधलाघवसंभवात्॥ तथाहि॥ कृतिसाध्यताज्ञानस्य हेतुत्वे कृतिसाध्यत्वप्रका
रकपाकादिविशेष्यकज्ञानत्वावच्छिन्नाभावमात्रसंप्रतिपाकादिगोचरप्रवृत्तिसामग्र्याः प्रतिबंधकत्वं न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कल्प्यते। तादृशप्रवृत्तिसामग्रीकाले पाकादिविशेष्यककृतिसाध्यत्वप्रकारकज्ञानस्यावश्यकत्वेन कृति
साध्यत्वप्रकारकपाकादिविशेष्यकज्ञानाभावमानसत्वरूपसत्याकादिविशेष्यककृतिसाध्यत्वज्ञानस्या
वश्यकक्लृप्तप्रतिवंधकत्वेनैवोपपत्तेः। मन्मते तादृशमानसं प्रति तादृशप्रवृत्तिसामग्र्याः प्रतिवंधकत्वक-
ल्पनेन महद्गौरवं॥ एवंअप्रामाण्यग्रहविशिष्टकृतिसाध्यत्वप्रकारकपाकविशेष्यकज्ञानवानहमित्या
दिमानसे पाकादिगोचरप्रवृत्तिसामग्र्याः प्रतिवंधकत्वं मया न कल्प्यते॥ तादृशविशिष्टविषयताशालि-
मानससामग्रीकाले अप्रामाण्यज्ञानानास्कंदितकृतिसाध्यत्वप्रकारकपाकादिविशेष्यकज्ञानस्यावश्यक
त्वेनाप्रामाण्यज्ञानानास्कंदितकृतिसाध्यत्वप्रकारकपाकादिविशेष्यकज्ञानघटितप्रवृत्तिसामग्र्या अभा
वे तादृशप्रवृत्तिसामग्रीतादृशमानससामग्र्योर्मिलनस्यैवासंभवात्॥ भवन्मते कृत्यसाध्यत्वप्रकारकपाका
दिविशेष्यकज्ञानाभावघटिततादृशप्रवृत्तिसामग्रीतादृशमानससामग्र्योर्मिलने वाधकाभावेन तादृशमानसं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रतिताद्दशप्रवृत्तिसामग्र्याः प्रतिबंधकत्वकल्पनस्यावश्यकत्तयामहगौरवापत्तेः।अनयैवचरीत्या इष्टसा
धनत्वज्ञानभावस्यवलवदनिष्टानुबंधित्वज्ञानाभावस्यचनप्रवृत्तिहेतुत्वंकिंतु इष्टसाधनताज्ञानस्यवल
वदनिष्टाननुबंधित्वज्ञान

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDE

नं० ४३०४ वाधरहस्यम् लेखकः — महामहोपाध्याय-गदाधर-भट्टाचार्य चक्रवर्ती

श्रीसिद्धेश्वर्यै नमः॥ ॥तद्धर्मावच्छिन्नविशेष्यताकतदभाववत्तानिर्णयकाले तद्धर्मावच्छिन्नविशेष्यता-
कतद्विशिष्टबुद्धेरनुदयात् पर्वतत्वावच्छिन्नविशेष्यताकसंयोगादिसंसर्गकवह्नित्वाद्यवच्छिन्नप्रकारताका-
लौकिकज्ञानत्वावच्छिन्नं प्रतिपर्वतत्वावच्छिन्नविशेष्यताकदैशिकविशेषणतासंसर्गकसंयोगादिसंस-
र्गावच्छिन्नवह्नित्वाद्यवच्छिन्नप्रतियोगिताकाभावप्रकारकानाहार्याप्रामाण्यज्ञानानास्कन्दितनिर्णयत्वेन
प्रतिबंधकत्वं कल्प्यते पर्वतत्वावच्छिन्नविशेष्यताकतदभाववत्तानिर्णयकाले ऽन्यधर्मावच्छिन्नविशेष्यता-
कतद्विशिष्टबुद्ध्युदयात् प्रतिबध्यतावच्छेदककोटौ पर्वतत्वावच्छिन्नविशेष्यताकत्वनिवेशः संयोगादिसं-
बंधावच्छिन्नप्रतियोगिताकाभाववत्तानिर्णयकाले समवायादिसंसर्गकविशिष्टबुद्ध्युदयात् संयोगादि-
संसर्गकत्वनिवेशः॥ ॥अथ संयुक्तसंयोगादिसंसर्गकज्ञानस्यापि संयोगसंसर्गकतया संयोगादिसंबं-
धावच्छिन्नप्रतियोगिकाभाववत्तानिर्णयदशायां तदनुदयप्रसंगः॥ किं चित्संसर्गिकविषयतानवच्छिन्नसं-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वा·वु·वा

योगादिसांसर्गिकविषयताकत्वनिवेशपरत्वारणो चावच्छेदकावच्छिन्नवह्निमत्तान्तानाद्यसंग्रहः तत्रावि
शेष्यतावच्छेदकावच्छिन्नसंयोगादीनामेवसंसर्गतया किंचित्सांसर्गिकविषयतानवच्छिन्नसंयोगादि
सांसर्गिकविषयताकत्वाभावात्पर्वतत्वाद्यवच्छिन्नत्वानिरूपितसांसर्गिकविषयतानवच्छिन्नसंयोगादि
सांसर्गिकविषयतानिवेशोपि कालिकविशेषणतादिविशिष्टसंयोगादिसंसर्गकज्ञानं दुःसंग्रहमेवेतिचे
न्नपर्वतत्वाद्यवच्छिन्नविशेष्यतानिरूपितायासंयोगादिसांसर्गिकविषयतायान्निरूपितवह्नित्वाद्यवच्छि
न्नप्रकारताकत्वनिवेशात्संयुक्तसंसर्गादिस्थले च पर्वतत्वावच्छिन्नविशेष्यतानिरूपितसंयोगादिनिष्ठ १
सांसर्गिकविषयतायावद्वह्न्यादिप्रकारतानिरूपितसांसर्गिकविषयताभिन्नतया नुपपत्त्यभावात्· पर्वतोव
ह्न्यभाववानित्यादिनिर्णयकालीनपर्वतोऽग्निमानित्याकारकज्ञानानां दशायां वह्नित्वाद्यवच्छिन्नप्रकारताकत्व
निवेशः॥ आनुमानिकभिन्नेन्द्रियाजन्यबाधबुद्धिदशायां लौकिकसन्निकर्षजन्यविशिष्टबुद्ध्युदयाल्लौकि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

कत्वनिवेशः॥अलौकिकत्वं तु न सामान्यतो लौकिकसन्निकर्षजन्यभिन्नत्वं अन्यांशे लौकिकवह्न्याद्युपनी
तमानासंग्रहप्रसंगात्। किंतु वह्न्यादिवृत्तिलौकिकसन्निकर्षजन्यभिन्नत्वं वह्न्याद्यभाववत्तानिर्णयप्रति
बंध्यतावच्छेदककोटौ निवेश्यं॥ न च चक्षुःसंयोगत्वकसंयोगसाधारणलौकिकत्वस्य दुर्वचत्वात् कथं लौकि
कसंनिकर्षजन्यभिन्नत्वस्य तथात्वमिति वाच्यं। वह्न्यादिसंयोगजन्यभिन्नत्वस्यैव तथात्वात्। उपनीतभा
नस्य च वह्न्यादिसंयोगाजन्यत्वे नानुपपत्त्यभावात्। लौकिकसन्निकर्षजन्यज्ञाने उपनीतभानादिविषय
ताविलक्षणालौकिकविषयताविशेषस्वीकारे तु वह्न्यादिवृत्तिलौकिकविषयताकान्यत्वं ज्ञानांशे वह्न्या
दिप्रकारतायां वा लौकिकविषयताभिन्नत्वं निवेश्यं न तु लौकिकसन्निकर्षजन्यभिन्नत्वं गौरवात्॥ अथ
लौकिकसन्निकर्षजन्यज्ञाने व्यभिचारवारणाय अलौकिकत्वनिवेशे बाधकाले लौकिकसन्निकर्षजन्य
संशयापत्तिः। न च संशयत्वस्यार्थवशात्समाजगनस्ततया कस्यचिज्ज्ञन्यता नवच्छेदकत्वात्तस्यापादनमश

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विशेष्यक वह्निविशिष्टबुद्धित्वंतथाविधवह्न्यभावविशिष्टबुद्धित्वावच्छिन्न २

बाधबुधि क्यतद्विशिष्टबुद्धित्वं तु निर्णयात्मकं जायत एवेति न त्रेष्टापत्तिरिति वाच्यं ॥ संशयत्वस्य किंचिज्जन्यतानव-
च्छेदकत्वेपि पुत्येकसामग्रीबलात् पर्वतत्वावच्छिन्नंस्यापत्त्यैव फलतः संशयापत्तेः ॥ यत्तु ॥ लौकिकसन्नि
कर्षजन्यसंशयसाधारणं लौकिकनिर्णयान्यज्ञानत्वमेव बाधप्रतिबध्यतावच्छेदककोटौ निवेश्यं अतो न
बाधकाले लौकिकसन्निकर्षजन्यसंशयापत्तिरिति ॥ तदसत् ॥ संशयसाधारणतादृशधर्मस्य बाधप्रति
बध्यतावच्छेदकत्वेपि ऽपदर्शितस्थले लौकिकसन्निकर्षादिसामान्यसामग्रीबलाद्वह्निविशिष्टबुधित्व २
तदभावविशिष्टबुद्धित्वावच्छिन्नोत्पत्तौ बाधकाभावेन फलतः संशयापत्तेर्वारयितुमशक्यत्वात् तादृश
सामान्यसामग्र्याच तादृशप्रतिबध्यतावच्छेदकानाक्रांतस्य निर्णयस्यैव फलजनने बाधाभावरूपविशेषसा
मग्रीविरहस्य किंचित्करत्वात् ॥ निर्णयस्थले तादृशविशेषसामग्र्यंतराभावात् ॥ एतेन संशये लौकिकवि
षयतानभ्युपगमेन लौकिकसन्निकर्षकालीनसंशयोपि लौकिकविषयताऽन्यज्ञानत्वरूपबाधप्रतिब

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ध्यतावच्छेदकाक्रांतत्वमेवेति न वाधकालेऽनापत्तिः॥ ॥अथ संशये लौकिकविषयतानभ्युपगमे तस्य लौ
किकसन्निकर्षजन्यतावच्छेदकानाक्रांतत्वप्रसंग इति चेत् का क्षतिः ज्ञानसन्निकर्षादेव तदुपपत्तेः॥ अत एव
वह्न्यादिसंदेहानंतरं न वह्निं साक्षात्करोमीति आकारकसाक्षात्कारित्वग्रहः लौकिकविषयतायाः साक्षा
त्कारित्वव्यंजकत्वादिति न च लौकिकसन्निकर्षादिकालीनसंशयस्य लौकिकविषयतावत्त्वे वाधकाभाव
इति वाच्यं॥ न हि लौकिकत्वावच्छिन्नं प्रतिनत्कोटिकसंशयसामग्र्या अनायत्त्या प्रतिवंधकत्वकल्पनात् सं-
शयसामग्रीदशायां लौकिकविषयताशालिज्ञानस्यैव वाधकत्वात्॥ ॥अथवा लौकिकान्यविषयतैव
वाधप्रतिवध्यतावच्छेदका लौकिकसन्निकर्षजन्यसंशये च लौकिकालौकिकविषयतैव स्वीक्रियते
अतो भवति सोऽपि वाधप्रतिवध्यः॥ युक्तं चैतत् पूर्वकल्पे लौकिकविषयताशालिज्ञानं प्रति संशयसामग्र्याः
प्रतिवंधकत्वकल्पने गौरवात् साक्षात्कारित्वग्रहं प्रति निर्णयत्वेन हेतुत्वं स्वीकृत्यैव संशयसाक्षात्कारित्वग्रहवार

वादबुद्धि

णासंभवेनाप्यथानुपपत्त्यभावात् सामग्रीप्रतिबंधकल्पनापेक्षया च निर्णयत्वेन हेतुतायां लाघवस्यातिस्फु
टत्वादित्यादिकमप्यूह्यं ॥ एतावतापि वह्न्यभावादिनिर्णयानंतरं लौकिकसन्निकर्षादिघटितसामग्रीब-
लाद्वह्न्यादिभाने बाधकाभावेनार्थिकसंशयस्य दुर्वारत्वादिति चेन्मैवं ॥ पर्वतत्वाद्यवच्छिन्नविशेष्यतानिरू
पितवह्न्यादिलौकिकप्रकारताशालिज्ञानं प्रति पर्वतत्वाद्यवच्छिन्नविशेष्यतानिरूपितवह्न्यभावादिप्रकार
ताशालिज्ञानसामग्रीत्वेन प्रतिबंधकता कल्प्यते। एवं च वह्न्यभाववत्तानिर्णयानंतरं वह्नितदभावोभयसा ३
मग्रीकाले वह्न्यादिलौकिकप्रकारताशालिज्ञानं नापादयितुं शक्यते एतादृशप्रतिबंधकस्य प्राक् सत्वात्
नापि अलौकिकवह्न्यादिप्रकारताशालिज्ञानं तत्प्रतिबंधकबुद्धेः सत्वात् ॥ अन्यादृशं तद्विषयताशालिज्ञानं
त्वलीकमेवेति नानुपपत्तिः गंधोपि लौकिकसन्निकर्षजन्यज्ञानस्य बाधसामान्याप्रतिबध्यतया तदिंद्रियज-
न्यज्ञानवारणाय लौकिकान्यत्वमपि निवेश्य चाक्षुषादिविशिष्टबुद्धौ चाक्षुषादिबाधबुद्धेः पृथगेव प्रतिबंधकत्वं

कल्पनीयं। शंकितो नपीतः अयं मोरग इत्यादिबाधबुद्धिदशायामपि मंडूकजवसांजनादिदोषवशात् शंखं वं
शादौ पीतिमोरगत्वाद्यारोपोदयात् तत्र तत्र व्यभिचारं तादृशतादृशदोषविशेषाजन्यत्वमपि बाधसामान्याभा
वकार्यतावच्छेदककोटौ निवेशनीयं। केचित्तु। दोषविशेषजन्यज्ञानेपि लौकिकविषयता [redacted] पगम्वा
भ्युपगमादलौकिकत्वेनैव तत्र व्यभिचाराऽसंभवाद्दोषविशेषाजन्यत्वस्य न प्रतिबध्यतावच्छेदककोटौ प्रवेशः।
न च लौकिकसन्निकर्षविनैव तादृशाऽन्यथाख्यातिरोपोदयात्कथं लौकिकविषयताशालित्वं तस्येति वाच्यं।
लौकिकसन्निकर्षवद्दोषविशेषस्यापि तादृशविषयतानियामकत्वाभ्युपगमात्॥ न चैवमपि तत्र लौ
किकसन्निकर्षस्य व्यभिचारप्रसंग इति वाच्यं॥ तादृशारोपानंतरं पीतं साक्षात्करोमीत्यनुव्यवसायोद
येन तत्र तादृशविषयतायाः प्रामाणिकत्वाद्व्यभिचारवारणाय नायत्या दोषविशेषाजन्यत्वस्य कारण
व्यवहितोत्तरत्वस्यैव वा सन्निकर्षजन्यतावच्छेदककोटौ निवेशनीयत्वादित्याहुः॥ प्रतिबंधकतावच्छेद

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बाधबुद्धि कत्वोपेविशेष्यतावच्छेदकधर्मस्यविशेष्यनिवेशात् उक्तं नवह्निमदित्यादिवादबुद्धेर्नपर्वतोवह्निमानित्यादि
ज्ञानविरोधिताकालिकसंबंधेनतदभाववज्ज्ञानस्याविशेषितयादैशिकविशेषणतासंसर्गकत्वनिवेशः।
उद्देश्यतावच्छेदकसामानाधिकरण्यमात्रावगाहित्वाबाधबुद्धेस्तादृशाविशिष्टबुद्ध्यविरोधितयापर्वतत्वा
वच्छिन्नत्वीयसांसर्गिकविषयतावच्छिन्नत्वंविशेषणताविशेषीयसांसर्गिकविषयतायांनिवेशनीयं।
एवंचपर्वतत्वाद्यवच्छिन्नविशेषणतायामहानसत्वाद्यवच्छिन्नविशेष्यताकविशिष्टबुद्धौसंसर्गत्वान ४
भ्युपगमेपर्वतत्वाद्यवच्छिन्नत्वंविशेष्यतायांननिवेशनीयंप्रयोजनाभावात्॥ किंतुपर्वतत्वावच्छिन्नवि
शेषणतावत्त्संयोगित्वादिरूपपरंपरासंबंधावगाहिज्ञानवारणायविशेष्यतानिरूपितत्वमात्रंतादृशविशे
षणताविशेषीयसांसर्गिकविषयतायांनिवेशनीयं।वस्तुतोवास्तवपर्वतत्वव्यापकत्वविषयतानिवेशेय
त्रपर्वतहृदत्वभावप्रतियोगितावच्छेदकत्वाभावेनाभावांतरावगाहिज्ञानंतदसंग्रहः।तादृशज्ञानस्यपर्वत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हृत्वभावप्रतियोगितावच्छेदकत्वाभावघटितव्यापकत्वानवगाहित्वात्। एवं यत्र पर्वतत्वादिना वा महानस
मेव संसर्गघटकतभातं तस्याप्य संग्रह इति पर्वतत्वावच्छिन्नसांसर्गिकविषयतावच्छिन्नाया आधेयत्वसांस
र्गिकविषयता इत्येवं रीत्या ज्ञापकताघटकपदार्थकूटविषयता एवं निवेशनीयाः॥ इत्थं च तादृशसांसर्गिक
विषयतायां विशेष्यतायां वा पर्वतत्वावच्छिन्नत्वं निवेश्यत इत्यत्र विनिगमकाभावेनोभयत्रैव तन्निवेश इति
ध्येयं॥ नीलपर्वतत्वावच्छेदेन वह्न्यभाववत्तानिर्णयस्य शुद्धपर्वतत्वसामानाधिकरण्येन विशिष्टबुद्धिप्र
त्यविरोधितया पर्वतत्वाद्यधर्मानवच्छिन्नत्वं तादृशसांसर्गिकविषयतायां विशेष्यतायां वा निवेश्य॥ न चैवं
सामानाधिकरण्यमात्रावगाहिवह्न्यभाववत्ताज्ञानस्यैतादृशप्रतिबंधकतावच्छेदकानाक्रांततया तादृशज्ञा
नदशायामवच्छेदकावच्छेदेन वह्न्यादिविशिष्टबुद्ध्यापत्तिरिति वाच्यम्। अवच्छेदकावच्छेदेन वह्निविशिष्ट
बुद्धिं प्रति सामानाधिकरण्यावगाहिबाधनिर्णयप्रतिबंधकत्वांतरस्य कल्पनीयत्वात्॥ संयोगादिसंसर्गक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विशिष्टबुद्धौ समवायादिसर्वधावच्छिन्नप्रतियोगिताकाभाववत्तानिर्णयस्य वह्नित्वादिना वह्न्यादिविशिष्टबु
द्धौ वह्निघटोभयत्वाद्यवच्छिन्नप्रतियोगिताकाभावस्य चाविरोधितया संयोगादिसंसर्गावच्छिन्नव
ह्नित्वाद्यवच्छिन्नप्रतियोगिताकत्वनिवेशः। इत्थंता वच्छिन्नाभाववत्तानिर्णयस्य तत्तदभावव्याप्यवत्तानि
र्णयस्य चैव वह्नित्वादिना वह्न्यादिविशिष्टबुद्धौ विरोधिता॥ न च महानसीयवह्नित्वाद्यवच्छिन्नप्रतियो
गिताया अपि वह्नित्वावच्छिन्नतया महानसीयवह्न्यभाववानित्याकारकज्ञानविरोधित्वापत्तिरिति वाच्यं॥ ५
वह्नित्वावच्छिन्नेत्यस्य वह्नित्वातिरिक्तधर्मानवच्छिन्नेत्यर्थकत्वात्॥ न च वह्न्यभावत्वादिना घटाभावावगा
हिनो ज्ञानस्य वह्न्यादिविशिष्टबुद्धिं प्रत्यविरोधित्वप्रसंगः तस्य वह्नित्वाद्यवच्छिन्नप्रतियोगिताकाभावा
प्रकारकत्वादिति वाच्यं॥ वह्नित्वाद्यवच्छिन्नप्रतियोगिताकत्वसंसर्गावच्छिन्नप्रकारतानिरूपिताभावत्वा
वच्छिन्नप्रकारताया एव प्रतिबंधकतावच्छेदकत्वात्· तादृशप्रकारताप्रमात्मकबाधबुद्धेर्वास्तवतादृशाभा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वानवगाहित्वेपि क्षतिविरहात् वह्नित्वाद्यवच्छिन्नतया घटत्वाद्यवच्छिन्नप्रतियोगितायाः संसर्गतयाभाना
भ्युपगमे तु तत्संग्रहाय वह्नित्वविषयतावच्छिन्नावच्छिन्नप्रतियोगित्वविषयतात्वे नैव तादृशप्रतियो
गित्वविषयता निवेशनीयाः॥ ननु वास्तववह्नित्वाद्यवच्छिन्नप्रतियोगित्वविषयतात्वे नैं अत एव कं
बुग्रीवादिमत्त्वावच्छिन्नप्रतियोगिताया अप्रसिद्धावपि कंबुग्रीवादिमत्त्वादिना घटादिविशिष्टबुद्धेः कं
बुग्रीवादिमान्नास्तीत्याकारकबाधबुद्धिप्रतिबंधकतायां तानुपपत्तिः। आहार्यबाधबुद्धेरविरोधित
या अनाहार्यत्वनिवेशः। न चाहार्यज्ञानस्यापि विरोधितया कथमनाहार्यत्वनिवेश इति वाच्यं॥ यत्त आ
हार्यज्ञानस्य विरोधित्वे आत्मतत्वविवेकटीप्पण्यां प्रतियोग्यारोपहेतुताखंडने अनाहार्यारोपस्य हेतुतां
खंडयित्वा आहार्यज्ञानस्याविरोधितया तद्धेतुत्वं स्यादित्याशंक्य आहार्यस्याभावबुद्धेः प्रागसंभवादित्य
नेन तद्धेतुत्वखंडनं दीधितिकारस्यासंगतत्वापत्तेः॥ अथ किं तावदाहार्यत्वं वह्न्यभावादिबुद्धेर्नता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

बा·बु

वदव्यवहितोत्तरोत्पत्तिकत्वसंबंधेनवह्न्यादिनिर्णयवत्त्वंवह्निव्याप्यवत्तानिर्णयकालीनेच्छाधीनवह्न्यभा
ववत्ताज्ञानस्यानाहार्यत्वापत्तेः॥नापितादृशसंबंधेनवह्न्यभाववत्ताज्ञानविरोधिज्ञानवत्त्वं इच्छादिविर
हविशिष्टवह्न्यादिमत्ताज्ञानस्यैववह्न्यभावादिमत्ताज्ञानविरोधितयेच्छाकालीनवह्न्यादिमत्ताज्ञानस्यत
थात्वेनाहार्यज्ञानस्यविरोधिज्ञानत्वाभावात्परोक्षज्ञानप्रतिबंधकतायामिच्छाया उत्तेजकतयेच्छा
कालीनज्ञानस्यापिपरोक्षवह्न्यभाववत्ताज्ञानंविरोधित्वान्नानुपपत्तिरितिचेदेवमपिबाधतदभावव्याप्य ६
वत्ताज्ञाननिष्ठानामवच्छेदकभेदेनभिन्नानांविरोधितानामनुगमकरूपेणानुगतरूपेणानिवेशनम
शक्यमेव॥नचबाधतदभावव्याप्यवत्ताज्ञानकालीनाहार्यज्ञानसाधारणानुगताहार्यत्वस्यदुर्वचत्वेपि
अप्रामाण्यज्ञानानास्कंदितवह्निमत्तानिर्णयविशिष्टावत्तादृशतदभावव्याप्यप्रकारकनिर्णयविशि
ष्टत्वाद्यवच्छिन्नप्रतियोगिताकभेदकूटवत्त्वस्यप्रतिबंधकतावच्छेदकत्वान्नदोषइतिवाच्यं॥एवम

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्यानुमानिकबाधतदभाववव्याप्यवत्ताज्ञानकालीनलौकिकसन्निकर्षजन्यज्ञानस्याविरोधित्वप्रसंगात्
तादृशबाधादिविशिष्टलौकिकज्ञानभिन्नत्वानिवेशे तदिंद्रियजन्यबाधादिकालीनलौकिकसन्निकर्षज
आहार्य३ न्यज्ञानस्यापि प्रतिबंधकत्वापत्तेः तस्यालौकिकज्ञानभिन्नत्वात्तदिंद्रियजन्यबाधविशिष्टतदिंद्रियजन्यज्ञा
नभेदस्यापि स्वातंत्र्येण निवेशान्नेयमनुपपत्तिरिति चेदेवमप्याहार्यवह्न्यादिनिर्णयकालीनवह्न्यभावव
वत्ताज्ञानस्याविरोधित्वप्रसंगो दुर्वार एव न चा[illegible]नाहार्यवह्निमत्तानिर्णयविशिष्टान्यत्वनिवेशान्न दोष
इति वाच्यं वह्निमत्ताज्ञाननिष्ठानाहार्यत्वस्यानाहार्यवह्न्यभाववत्तानिर्णयविशिष्टान्यत्वरूपं विनाऽन्य
धर्मस्य दुर्वचत्वात्। न च तादृशानाहार्यत्वस्यैव निवेशनीयतया तस्य वह्न्यभाववत्ताज्ञानीयानाहार्यत्व
घटितत्वेनान्योन्याश्रयप्रसंगात्। यत्तु। आहार्यज्ञाने इच्छाया हेतुत्वोपगमाज्जन्यतासंबंधेन इच्छावत्त्वमे
वाहार्यत्वमिति। तदसत्। इच्छाविरहविशिष्टानुमितिसामग्रीत्वादिनाभिन्नविषयकप्रत्यक्षादिकं प्रति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रतिबंधकत्वापेक्षया तादृशसामग्रीकालीनप्रत्यक्षादौ इच्छाया हेतुत्वस्यैव लाघवसंभवेन स्वीकारात् भिन्न
विषयकानुमितिसामग्रीकालीनेच्छाधीनवह्न्यादिप्रत्यक्षस्यापीच्छाजन्यतया आहार्यत्वप्रसंगात्॥ एवं इच्छा
जन्यतावच्छेदकं यदि इच्छाविशिष्टवह्न्यभावादिप्रकारकप्रत्यक्षत्वं तदा त्वबाधशून्यकालीनेच्छाविशिष्टज्ञा
नस्यापि तत्कालत्वेनेच्छाजन्यतया तस्यापिँहार्यत्वप्रसंगः बाधविशिष्टत्वस्य जन्यतावच्छेदककोटिप्रवेशेप्या
हार्य्यवह्निमत्तानिर्णयकालीनेच्छाविशिष्टज्ञानस्य तथात्वं दुर्वारम् इत्यनाहार्यवह्न्यादिमत्तानिर्णयविशि
ष्टज्ञानत्वं वह्न्यभावप्रत्यक्षे इच्छाजन्यतावच्छेदकं वाच्यं॥ वह्निमत्ताज्ञाननिष्ठानाहार्यत्वमपि जन्यतासंबंधेनेच्छा
विशिष्टभिन्नत्वरूपमेव निवेश्यं तादृशज्ञानगोचरेच्छाया अपि कार्यतावच्छेदकं अनाहार्यवह्न्यभावादिनि
र्णयविशिष्टवह्न्यादिप्रत्यक्षत्वं वाच्यं॥ अन्यथा उक्तरीत्या अनुपपत्तितादवस्थ्यात्॥ एवं च वह्निमत्ताज्ञान
निष्ठानाहार्यत्वज्ञाने तद्घटितधर्मावच्छेदेन वह्न्यभावज्ञाने इच्छाजन्यत्वसंग्रहः॥ तदुहेव तद्घटितवह्न्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भाववत्ताज्ञानीयानाहार्यत्वसंग्रहः॥तद्ग्रहे च तद्वृत्तिधर्मावच्छेदेन वह्निमत्ताज्ञाने इच्छाजन्यत्वग्रह इति
दुर्वार एव दुर्ज्ञेयतादोष इति॥ यत्तु॥ आहार्यवह्न्यभाववत्ताज्ञानादौ वह्न्यादेरपि भाने बाधकाभावात् सर्व
त्रसंशयात्मकमेवाहार्यज्ञानं॥ एवं च निर्णयत्वनिवेशे नैवाहार्यज्ञानवारणसंभवात्॥ अनाहार्यत्वनिवे
श एव नास्ति किं तन्निर्वचनायासेनेति। तदसत्। यत्र भिन्नेन्द्रियादिजन्योपेक्षाबुध्यात्मकवह्न्यभाववत्ता
निर्णयद्वितीयक्षणे वह्निमत्तानिर्णया लौकिकसन्निकर्षजन्यस्तदनंतरं चाहार्यवह्न्यभावप्रत्यक्षं तत्
पूर्वक्षणे वह्न्यभाववत्तानिर्णयरूपप्रतिबंधकसत्वेन वह्निभानासंभवान्निर्णयात्मकस्यैवाहार्यज्ञानस्य
संभवेनाहार्यनिवेशस्यावश्यकत्वात्॥ न चाहार्य्यवह्न्यभाववत्ताज्ञानमपि नेष्यत एवेति वाच्यं। इच्छारूपो
त्तेजकसत्वे तदुत्पत्तौ बाधकाभावात्॥ न च बाधप्रतिबंधकतायां इच्छायाऽत्तेजकत्वं न स्वीक्रियते किंत्वि
च्छाजन्यभिन्नत्वमेव प्रतिबध्यतावच्छेदककोटौ निवेश्यते इच्छाजन्यतावच्छेदकं इच्छाविशिष्टसंशयत्वमे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वह्न्यत्वैककोटिज्ञानस्य बाधप्रतिबध्यतावच्छेदकाक्रांततया न तदैककोटिकज्ञानमप्यनुमर्हतीति वा
च्यं। जन्यतायाश्चाक्षुषत्वादिरूपावच्छेदकभिन्नत्वेन इच्छाजन्यतावच्छिन्नप्रतियोगिताकैकभेदनिवेशा-
संभवेन भेदकूटस्यैव निवेशनीयतया विनिगमनाविरहेण कार्यकारणभावबाहुल्यात्। इच्छाया उत्तेज
कत्वकल्पस्यैवान्यत्र व्यवस्थापिततत्वादुपदर्शितस्थलेऽनुभवसिद्धस्याहार्यज्ञानस्यापलापानर्हत्वाच्चेति
तस्मादाहार्यत्वस्य दुर्वचतया कथमनाहार्यत्वेन प्रतिबंधकत्वमिति। मैवं। अनुगताहार्यत्वस्य दुर्वचत्वे ८
पि अनायत्याश्चाहार्यज्ञानानां तत्तद्व्यक्तित्वेन भेदकूटस्यैव प्रतिबंधकतावच्छेदककुक्षौ निवेशनीयत्वा
त्॥ केचित्तु॥ आहार्यज्ञाने यावदप्रामाण्यं न गृह्यते न भवत्येव तावद्विशिष्टबुद्धिरित्यनाहार्यत्वस्य निवे
श एव नास्तीत्याहुः। अप्रामाण्यज्ञानास्कंदितज्ञानस्याविरोधितया अप्रामाण्यज्ञानास्कंदितत्वनिवेशः। त
त्समानाधिकरण्यविशेष्यतोभयसंबंधावच्छिन्नप्रतियोगिताकाप्रामाण्यग्रहाभाववत्त्वं। भाविज्ञाना-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दिविशेष्यकाप्रामाण्यग्रहकालीनज्ञानस्य विरोधित्वोपपत्तये विशेष्यत्वनिवेशः। विशेष्यतावाप्रामाण्य
प्रकारतानिरूपिताग्राह्यापुरुषांतरीयाप्रामाण्यग्रहविषयीभूतज्ञानस्य विरोधित्वोपपत्तये सामाना॰
धिकरण्यनिवेशः। नचाप्रामाण्यज्ञानाभावस्य प्रतिबंधकतावच्छेदककोटिनिवेशे आहार्यज्ञानभेदकू
टैः सहविशेषणविशेष्यभावेविनिगमनाविरहप्रसंगादप्रामाण्यग्रहानंतरत्वस्य प्रतिबध्यतावच्छे
दककोटौनिवेशनमेवोचितमिति वाच्यं॥ तथासत्यप्रामाण्यग्रहविशिष्टस्याप्रामाण्यग्रहानास्कंदितवा
धबुद्धिदशायामापत्तिवारणाय तत्राप्रामाण्यग्रहहेतुताकल्पनप्रसंगात्॥ अप्रामाण्यज्ञानास्कंदितवा
धबुद्धिद्वितीयक्षणे तदनास्कंदितवाधबुद्धौसत्यां तदनंतरं अप्रामाण्यग्रहरूपकारणसत्तातद्विशिष्ट
बुद्ध्यापत्तेश्च. तस्मात्तदुत्तेजकत्वमावश्यकमेव। अप्रामाण्यग्रहवदव्याप्यहानित्वस्याप्युत्तेजकत्वस्वी
करणीयं॥ अतः समुच्चयोत्तरं संशयेन व्यभिचारः। नच संशयवारणाय बहुलाद्यप्रकारकत्वरूपनिर्णा

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वा॰वु

यत्वस्य प्रतिबंधकतावच्छेदककोटाववश्यंप्रविष्टितया तत्तया समुच्चयात्मकवह्न्यभावादिबुद्धेश्च वह्निप्रकार
कत्तया तदुत्तरोत्पन्नसमुच्चयात्मकवह्न्यादिविशिष्टबुद्धौ न व्यभिचार इति वाच्यं विनश्यदवस्थाव्याप्यवृत्ति
त्वज्ञानजन्यसमुच्चयानंतरं संशयादिवारणाय समुच्चयसाधारणस्य विरोधसंसर्गावच्छिन्नवह्न्यादिप्रका
रताभ्रमत्वस्यैव प्रतिबंधकतावच्छेदककोटौ निवेशनीयत्वात्समुच्चयोत्तरं समुच्चये व्यभिचारस्य दुर्वार
त्वात् । केचित्तु समुच्चयोत्तरसमुच्चये व्यभिचारवारणाय विरोधविषयताबाधाभावजन्यतावच्छेदककोटौ २
निवेशनीया ॥ ननु प्रतिबंधकतावच्छेदककोटावव्याप्यवृत्तित्वज्ञानाभावः गौरवात् ॥ न चैवं संशयात्मक
विशिष्टबुद्धेरप्रतिबध्यत्वमुपपद्यते ननु निश्चयस्य विरोधाविषयकत्वात् ॥ न च प्रत्यक्षात्मकनिर्णय
स्य विरोधसंसर्गकत्वसंभवेपि भूतलसंयोगादिघटितव्यापकत्वावगाहिपरामर्श इति वाच्यं ॥ निर्णयात्मक
ज्ञानेपि वह्न्यभाववद्वृत्तिसंयोगादीनामेव संसर्गतया भानाभ्युपगमेन तस्यापि विरोधविषयकत्वात् मर्शा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दिजन्मानुमितेर्विरोधावच्छिन्नसंयोगादिसंसर्गकत्वासंभवेन बाधकालेन तदापत्तिरिति वाच्यं ॥ तादृशानुमि
त्यादावपि बाधाभावादिवलाद्विरोधभाने बाधकाभावात्. न च विरोधावच्छिन्नसंयोगादिसंसर्गकानुमि
तौ तेन संबंधेन व्यापकत्वावगाहिपरामर्शस्य हेतुतया तदभावेऽविरोधभाने बाधक इति वाच्यं ॥ तथाविध
परामर्शजन्यतावच्छेदककोटौ तथाविधपरामर्शेतरत्वस्य अन्यलिंगकानुमितौ व्यभिचारवारणाय अ-
वश्यनिवेशनीयतया तदुत्तरानुमितौ विरोधभाने तादृशाभावस्याकिंचित्करत्वात्. न चैवं भूतलसंयो-
गादिसंसर्गघटितव्यापकत्वाहिपरामर्शजन्यानुमितौ बाधाभावादिवलात्संयोगित्वादात्म्यादेरपि संसर्ग
तयाभानप्रसंग इति वाच्यं ॥ तेन संबंधेन व्यापकताज्ञानशून्यकाले तत्संसर्गकानुमितेरनुदयेन तादृ
शसंसर्गघटितव्यापकत्वावगाहिपरामर्शमात्रस्यैव बाधाभावादिना संयोगित्वादात्म्यसंसर्गकानुमिति-
जनने विशेषसामग्रीत्वाभ्युपगमेन तादृशपरामर्शादिशून्यकालेन तदापत्त्यसंभवात्. अत्र तु भूतलसंयोगादि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

घटितव्यापकत्वावगाहिपरामर्शादपि विरोधावच्छिन्नसंयोगादिसंसर्गकानुमित्यभ्युपगमे नैतादृशपराम-
र्शस्यापि बाधाभावादिनाऽतादृशानुमितिजनने पृथक्विशेषसामग्रीत्वोपगमेनानुपपत्त्यभावात्॥ न च भृ-
ङ्गसंयोगादिघटितव्यापकत्वावगाहिपरामर्शजन्यानुमितौ विरोधावच्छिन्नसंयोगादीनां संसर्गतयाऽभाना-
भ्युपगमे अव्याप्यवृत्तित्वतात्कालीनविरोधसंसर्गकैककोटिकवस्त्वाद्यनुमित्यनन्तरं नदव्याप्यवृत्तिज्ञान-
नाशे भृङ्गसंयोगघटितव्यापकत्वतानास्तु नरनुमितिप्रसङ्गः॥ भृङ्गसंयोगपर्याप्तसांसर्गिकविषयताया १०
एव भृङ्गसंयोगसंसर्गिकसिद्धिप्रतिबध्यतावच्छेदकतया विरोधावच्छिन्नसंयोगसंसर्गकानुमितेस्तत्प्र-
तिबध्यत्वादिति वाच्यं॥ तादृशपरामर्शजन्यविरोधावच्छिन्नसंयोगादिसंसर्गकानुमितौ भृङ्गसंयोगादिप-
र्याप्तसांसर्गिकविषयताया अपि स्वीकारेणातादृशानुमितेः भृङ्गसंयोगादिसंसर्गकसिद्धिप्रतिबध्यत्वाक्षतेः
न च तथाविधविषयताया बाधप्रतिबध्यतावच्छेदकत्वेऽव्याप्यवृत्तिविरोधत्वज्ञानकालीनदशायां विरोधाविष-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यकज्ञानवारणायतत्राव्याप्यवृत्तित्वज्ञानहेतुतास्वीकारणीयेतिगौरवमितिवाच्यं ॥अव्याप्यवृत्तित्वज्ञाना
भावस्यप्रतिबंधकतावच्छेदककोटिप्रवेशेऽप्रामाण्यग्रहाभावादिभिर्विशेषणविशेष्यभावेविनिगमना
विरहेणप्रतिबध्यप्रतिबंधकभावबाहुल्यप्रसंगात्तदपेक्षयाऽव्याप्यवृत्तित्वज्ञानहेतुतायाएवोचि-
तत्वादित्याहुः तदसत् ।अव्याप्यवृत्तित्वादिविषयकनिरवलम्बमुद्रयास्यतानेविरोधाभानाभ्युपगमे
तथाविधनिखिलज्ञानानामेवप्रमात्वापत्तेः॥ नचैतत्कल्पितमभ्युपैतीत्यव्याप्यवृत्तित्वज्ञानस्योत्तेजकत्व
माबश्यकमेवेति॥ संशयोत्तरोत्पन्नसंशयेऽनुमित्सादौचव्यभिचारवारणायनिर्णयत्वस्यप्रतिबंधक
तावच्छेदककोटिनिवेशनं॥अथनिर्णयत्वंयदिपर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्न्यादिप्रका
रताशून्यत्वंतदाप्रमेयत्वादिनावह्न्यादिप्रकारकज्ञानासंग्रहः॥ यदिचतादृशवह्नित्वावच्छिन्नप्रकार
ताशून्यत्वंतदावह्न्यभावाभावत्वादिनावह्निकोटिकवस्तुभाववान्नवेतिसंशयस्यापिविरोधित्वापत्ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वा·बु

रिति चेन्नाअनापत्ता वह्नित्वावच्छिन्नप्रकारत्वाभावस्य वह्न्यभावाभाववत्त्वावच्छिन्नप्रकारत्वाभावस्य निवेशेना
नुपपत्त्यभावात् ॥ केचित्तु ॥ प्रमेयत्वादिना वह्न्यादिप्रकारकज्ञाने वह्न्यभावाधिकरणवृत्तित्वरूपविरोधो
न संसर्गतया भासते किंतु वह्नित्वप्रभावाभाववत्त्वावच्छिन्नप्रकारताकज्ञान एव ॥ इत्थं च तादृशप्रकारत्वे तथा
विधविरोधसंसर्गावच्छिन्नप्रकारतात्वेनानुगमय्य एकएवाभावो निवेशनीय इत्याहुः ॥ अथावच्छेदकाव
च्छेदेन विशिष्टबुद्धिं प्रतिबाधनिर्णयस्य प्रतिबंधकतायां कीदृशनिर्णयत्वं निवेश्यते यदि पर्वतत्वावच्छिन्न १०
विशेष्यतानिरूपितवह्न्यादिप्रकारताभिन्नत्वं तत् तदानीं सपर्वतो वह्निमान्न वा पर्वतो वह्न्यभाववानिति ज्ञा
नासंग्रहः ॥ भूरुपर्वतत्वावच्छिन्नविशेष्यताघटितनिर्णयत्वनिवेशे च नीलपर्वतो वह्निमान्न वेति संशयस्या
पि भूरुपर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्निप्रकारताभिन्नत्वात् प्रतिबंधकत्वप्रसंगादिति चेन्न ता
दृशप्रकारताभिन्नभूरुपर्वतत्वावच्छिन्नविशेष्यताकवह्न्यभाववत्ताज्ञानविरोधित्वेनानुपपत्त्यभावात् ॥ न

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

चैवं सति नीलपर्वतो वह्न्यभाववानित्येतादृशनिर्णयदशायामपि पर्वतत्वावच्छेदेन वह्निमत्ताज्ञानप्रसंग
इति वाच्यं ॥ नीलपर्वतत्वावच्छेदेन वह्निविशिष्टबुद्धौ नीलपर्वतत्वावच्छिन्नविशेष्यताकबाधबुद्धेः प्रतिबंध
कत्वेकल्पनीये शुद्धपर्वतत्वावच्छेदेन वह्निविशिष्टबुद्धिसाधारण्यस्य नीलातिरिक्तत्वे सति यत्पर्वतत्वाति
रिक्तं तदनवच्छिन्नविशेष्यतानिरूपितावच्छिन्नसंयोगसंसर्गावच्छिन्नवह्निप्रकारताशालिज्ञानत्वस्य प्र
तिबध्यतावच्छेदकत्वोपगमात्तन्न तथा च नीलपर्वतो वह्न्यभाववानिति बाधकाले शुद्धपर्वतत्वावच्छेदे
न वह्निमत्ताज्ञानस्यापि वारणसंभवात् ॥ न च नीलपर्वतत्वव्यापकतायाः संसर्गतयोऽवश्यं निवेशनीय
तया शुद्धपर्वतत्वावच्छेदेन वह्निमत्ताज्ञानस्य च तादृशव्यापकत्वानवगाहितया कथं तत्संग्रह इति वा
च्यं ॥ नीलपर्वतत्ववृत्त्यभावप्रतियोगितानवच्छेदकधर्मवत्त्वरूपनीलपर्वतत्वव्यापकताघटकपदार्थवि
षयतानां नीलान्यपर्वतत्वान्यधर्मानवच्छिन्नाया पर्वतविषयतानवच्छिन्नाया आधेयत्वविषयतायां

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्येवंक्रमेण निवेशात्॥ शुद्धपर्वततत्त्वव्यापकत्वावगाहित्वात्तस्यापि च तादृशावच्छेद्यावच्छेदकभावापन्नवि
षयताशालित्वेन तत्संसर्गग्रहाभावात् सामानाधिकरण्यमात्रेण वह्निव्याप्यभावोभयकोटिकज्ञानस्याविरोधि
त्वोपपत्तये अवच्छिन्नसंयोगादिसंसर्गावच्छिन्नवह्निप्रकारताशून्यत्वमेव सामानाधिकरण्यावगाहिज्ञा
नप्रतिबंधकतायां निवेश्य॥ एवं च पर्वतत्वसामानाधिकरण्यमात्रेण वह्निमद्वच्छेदेन च वह्न्यभावमवगाह
मानस्य संशयस्य वारणाय शुद्धविशेषणतासंसर्गकत्वमेव निवेशनीयं अवच्छेदकावच्छेदेन वह्न्यभाव
वत्ताज्ञाननिरूपितसामानाधिकरण्यावगाहिज्ञाननिष्ठप्रतिबध्यतावच्छेदककोटौ च संसर्गांशे पर्याप्त्य ११
निवेशात् प्रतिबध्यतावच्छेदकसामानाधिकरण्यमात्रावगाहितद्वच्छेदकत्वावगाहिज्ञानसाधारण्येन तया
नावच्छेदकावच्छेदेन बाधकाले अवच्छेदकावच्छेदेन वह्निविशिष्टबुद्ध्यापत्तिरित्यवधेयं॥ अथवा धर्म्मद्वे
निर्णयत्वेन प्रतिबंधकत्वे संशयोत्तरं विनेव विशेषदर्शनं प्रत्यक्षनिर्णयापत्तिः। अन्नोपाध्यायमतानु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यापिनः तत्प्रकारकनिर्णयत्वावच्छिन्नप्रतिसंशयसाधारणतदभावप्रकारकज्ञानत्वेन प्रतिबंधकत्वांत
रकल्पनान्न संशयानंतरं निर्णयापत्तिः। अयं पुरुषो न वेति संशयदशायां पुरुषत्वव्याप्यकरादिमत्तानिर्ण
यसत्वे अयं पुरुष इत्यादिनिर्णयोत्पत्त्या विशेषदर्शनस्योत्तेजकत्वस्वीकरणीयम्॥ तथा च तद्व्याप्यवत्तानि
र्णयो भावविशिष्टतदभावप्रकारकज्ञानत्वेन प्रतिबंधकतेति पर्यवसितं संशये व्यभिचारवारणाय प्रति
बध्यतावच्छेदककोटौ निर्णयत्वनिवेशनं॥ न च तदभावाप्रकारकप्रत्यक्षत्वं॥ अतो न योग्यतासंशयकाले न
शाब्दबोधादौ व्यभिचारः॥ आनुमानिकादिबाधकाले विनैव विशेषदर्शनं लौकिकसंनिकर्षजन्यज्ञानोदया
त्तत्र व्यभिचारवारणाय लौकिकान्यत्वमपि निवेशनीयं॥ एवं च तदिंद्रियजन्यसंशयदशायां विना विशेष
दर्शनं तदिंद्रियजन्यलौकिकप्रत्यक्षवारणाय तत्प्रकारकचाक्षुषनिर्णयत्वाद्यवच्छिन्नप्रतिविशेषदर्शना
भावविशिष्टतदभावप्रकारकचाक्षुषत्वादिना संशयसाधारणमेव प्रतिबंधकत्वं स्वीकरणीयं॥ एवं च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निर्णयत्वं प्रतिबंधकतावच्छेदककोटौ निवेश्य तदिंद्रियस्थलीयप्रतिबंधकत्वांतरं न कल्प्यते प्रयोजनाभा
१ वात् । परंतु बाधिताशालिज्ञानत्वावच्छिन्नं प्रति तदभावप्रकारकनिर्णयत्वेन सामान्यप्रतिबंधकत्वमेवं बा
धनिर्णयकाले संशयशाब्दबोधानुमित्यादिवारणाय लौकिकान्यतमप्रकारकत्वं कल्पनीयं यथा बाधनिर्णयदशायां वि
शेषदर्शनसत्त्वे प्रत्यक्षनिर्णयस्य प्रामाणिकत्वेन प्रत्यक्षनिर्णयान्यज्ञानत्वमेव बाधनिर्णयप्रतिबध्य
तावच्छेदकं वाच्यं । संशयसाधारणप्रतिबंधकतायै बाधनिर्णयकाले प्रत्यक्षनिर्णयापत्तिवारणसंभ १२
वात् ॥ न च विपरीतज्ञानशून्यदशायां प्रत्यक्षनिर्णयोत्पद्यमाने प्रत्यक्षनिर्णयान्यज्ञानत्वावच्छिन्नाति
विपरीतज्ञानाभावरूपप्रकारणबलादिति वाच्यं ॥ प्रत्यक्षनिर्णयसामग्रीदशायां प्रत्यक्षनिर्णयान्यज्ञान
त्वावांतरसंशयत्वानुमितित्वाद्यवच्छिन्नसामग्रीविरहेणान्यदवच्छिन्नापत्त्यभावात् अंधकारे भूतले दीप
रादिसंशये व्यंजकविरहदशायां कुंकुमादौ संदेहे च सत्यालोकादिव्यंजकसमवधाने तन्निर्णयोदया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विशेषदर्शनवदालोकसमवधानादीनामपि तदींद्रियस्थलीयप्रतिबंधकतायामुत्तेजकत्वं स्वीकार्यं. न
चालोकसमवधानादीनामुत्तेजकत्वे यत्रालोकसमवधानादिसत्त्वे एव दूरत्वादिप्रयुक्तः संशयः तत्र विशे-
षदर्शनं विनैव निर्णयापत्तिरितिवाच्यं॥ विपरीतज्ञानदशायां यत्र यदालोकसंयोगव्यक्तिसत्त्वे निर्णयः
तेषामेव तत्तद्व्यक्तित्वेनोत्तेजकत्वोपगमात्॥ तत्र यत्रांधकारप्रयुक्तसंशयानंतरं आलोकसमवधाना
न्निर्णयः तदनंतरं च तादृशनिर्णयः प्रामाण्यग्रहाधीनो दूरत्वादिप्रयुक्तः पुनः संशयः तदुत्तरं निर्णयाप
त्तिः पूर्वनिर्णयानुरोधेन कॢप्तोत्तेजकताकस्यालोकसंयोगस्य सत्त्वादितिवाच्यं॥ तादृशालोकस्य तत्क्ष
णावच्छिन्नस्यैवोत्तेजकत्वोपगमात्॥ आलोकसंयोगादीनां न स्वावच्छेदकावच्छिन्नसंयोगवद्वृत्तिः संयुक्त
मनःप्रतियोगिकविजातीयसंयोगरूपपरंपरासंबंधत्वावच्छिन्नप्रतियोगिताकाभावो विपरीतज्ञाने
सामानाधिकरण्यसंबंधेन निवेशनीयः। अन्यथा विषये आलोकसमवधानदशायामपि समवायादिना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तदभावस्यामनिसत्वेन निर्णयानुदयप्रसंगात् ॥ अथवा तत्र चालोकसमवधानादिकालीनात्ममनोयोगादि
व्यक्तीनामिव समवायेनोत्तेजकत्वमभ्युपगतोपदार्थान्तरसंयोगमादायविनिगमनाविरहस्योभयत्र तुल्यत्वात्
इत्याहुः ॥ मिथ्यास्तु ॥ लौकिकान्यविशिष्टबुद्धित्वावच्छिन्नं प्रतिविपरीतनिर्णयत्वेनैव विरोधिता संशयोत्तरं
विनाविशेषदर्शनं निर्णयापत्तिवारणाय च विपरीतज्ञानोत्तरप्रत्यक्षत्वावच्छिन्नं प्रतिविशेषदर्शनत्वेन
हेतुता कल्प्यते ॥ विनैव विशेषदर्शनं विपरीतज्ञानानन्तरप्रत्यक्षस्य योग्यतासंशयोत्तरस्थाणुत्वो धादेः सं
शयोत्तरसंशयस्याचोत्पत्त्या तत्र व्यभिचारवारणाय विपरीतज्ञानोत्तरत्वे प्रत्यक्षत्वनिर्णयत्वादीनां का
र्यतावच्छेदककोटिनिवेशनं भिन्नेन्द्रियजन्यसंशयकालेविनाविशेषदर्शनं लौकिकनिर्णयोत्पत्त्या लौ
किकान्यत्वमपि निवेशनीयं । इत्थं च तदिन्द्रियजन्यसंशयकाले विनाविशेषदर्शनं लौकिकनिर्णयवार
णाय चाक्षुषविपरीतज्ञानोत्तरचाक्षुषनिर्णयत्वावच्छिन्नं प्रति विशेषदर्शनस्य हेतुत्वं तरणिकल्प ९३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नीयानि॥ एवं च तदिंद्रियस्थलीयप्रतिवध्यप्रतिवंधककभावोपि न कल्प्यते· तदिंद्रियजन्यवाधकाले का
रणविरहेणैव लौकिकप्रत्यक्षापत्त्यसंभवादित्याहुः॥ सति च विशेषदर्शने तदिंद्रियजन्यवाधनिर्णयेपि त
दिंद्रियजन्यनिर्णयस्येष्टत्वात्॥ अत्रेदं विचारयामः॥ संशयादितद्धारणालौकिकान्यविशिष्टबुद्धित्वावच्छि
न्नं प्रतिविपरीतनिर्णयत्वेन प्रतिवंधकत्वोभवमतेपि तुल्यैव। किंतु प्रत्यक्षनिर्णयस्थले लघुतरविशेषद
र्शनत्वेन हेतुता मिश्रमते ऽपाध्यायमते तु विशेषदर्शनाभाववद्विशिष्टविपरीतज्ञानाभावत्वरूपगुरुधर्मे
णेति विशेषः। नचैतन्मते कारणतावच्छेदकगौरवसत्वेपि विपरीतज्ञानाभाववहितोत्तरत्वघटितगुरुतरवि
शेषदर्शनजन्यतावच्छेदकापेक्षया लौकिकान्यप्रत्यक्षनिर्णयत्वरूपतादृशविपरीतज्ञानाभावजन्यतावच्
छेदकस्य लघुशरीरतया नोपाध्यायमते गौरवावकाश इति वाच्यं। विशेषदर्शनस्योत्तेजकहस्यते ऽप्रामा
ण्यग्रहाभावादिभिर्विशेषदर्शनाभावस्य विशेषणविशेष्यभावे विनिगमनाविरहेण कार्यकारणभाववाहु

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वा॰बु स्यप्युक्तगौरवस्तुल्यत्वेपि दुरुद्धरत्वात्। नचाप्रामाण्यज्ञानानास्कंदितविपरीतज्ञानदशायांविनैवविं
शेषदर्शनंप्रत्यक्षनिर्णयोदयेनाप्रामाण्यज्ञानाभाववैशिष्ट्यविपरीतज्ञानोत्तरप्रत्यक्षत्वमेवविशेषदर्शन
जन्यतावच्छेदकंमिश्रमतेवाच्यं॥ इत्थंचाप्रामाण्यग्रहाभाववैशिष्ट्यविपरीतज्ञानोत्तरप्रत्यक्षंप्रतिविशे
षदर्शनत्वेनविशेषदर्शनाभाववैशिष्ट्यविपरीतज्ञानोत्तरप्रत्यक्षंप्रतिअप्रामाण्यग्रहत्वेनवाहेतुत्वेत्य
त्रविनिगमनाविरह इतिवाच्यं॥ अप्रामाण्यग्रहस्यहेतुत्वेभाविज्ञानादिविषयकाप्रामाण्यग्रहकालीनतद्
विषयकबाधबुद्धिदशायांविनैवविशेषदर्शनंतादृशाप्रामाण्यग्रहबलान्निर्णयापत्तेरेवविनिगमक १४
त्वात्॥ अथविशेषदर्शनंविनापिविपरीतज्ञानदशायामिच्छयामाहार्यप्रत्यक्षनिर्णयोत्पत्त्याव्यभि
चारवारणायेच्छाविरहविशिष्टविपरीतज्ञानोत्तरप्रत्यक्षत्वावच्छिन्नंप्रतिविशेषदर्शनत्वेनहेतुतावाच्या
तथाचविशेषदर्शनाभाववैशिष्ट्यविपरीतज्ञानोत्तरप्रत्यक्षेप्रतिइच्छात्वेनहेतुतामादायविनिगमनाविर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ह इति चेदत्त्वेन ताद्दशविनिगमनाविरहादिच्छाया अपि हेतुत्वं। एवमपि इच्छाभावविशेषदर्शनाभावानां पर
स्परविशेषणविशेष्यभावे विनिगमनाविरहेणायावंतः कार्यकारणभावास्तदपेक्षया कार्यकारणभावस्य ला
घवस्यानपायात्॥ न च ताद्दशाभावकूटविशिष्टविपरीतज्ञानाभावस्यास्वंऽस्य तत्तद्व्यक्तित्वेनैव हेतुत्वोपग
मात्कार्यकारणभावबाहुल्यसंभावनापीति वाच्यं॥ अभावस्य तत्तद्व्यक्तित्वेन हेतुतायाः सिद्धांतविरुद्धत्वात्.
तथात्वे वा ताद्दशविपरीतज्ञानघटपटान्यतरत्वावच्छिन्नाभावानामपि तत्तद्व्यक्तित्वेन हेतुतामादाय विनिगम
नाविरहप्रसंगाच्च। यत्तु। मिश्रमतेपि विपरीतनिर्णयत्वेन प्रतिबंधकतायां विशेषदर्शनस्य हेतुत्वमाव
श्यकं अन्यथा विपरीतनिर्णयकाले विशेषदर्शनसत्त्वेपि प्रतिबंधकसत्त्वेन तत्प्रत्यक्षनिर्णयानुदयापत्तेः
न च तत्र विपरीतनिर्णयविनष्टेपव प्रत्यक्षमुत्पद्यते न तु तदव्यवहितक्षण इति वाच्यं॥ तथा सति भ्रमा
नरप्रत्यक्षविशेषदर्शनस्य हेतुतापादोक्षितिकारेणा भ्रमसंशयोत्तरप्रत्यक्षं प्रतिविशेषदर्शनहेतुता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वा॰वु मतेइत्यादिग्रंथतत्कथनस्यासंगतत्वापत्तेः तस्मात्कुलाघवमुपाध्यायमतापेक्षयेतितदसत्॥ प्रत्यक्षनि
र्णियात्मज्ञानत्वस्यैवविपरीतनिर्णयप्रतिबध्यतावच्छेदकत्वोपगमाद्विपरीतनिर्णयदशायांसतिवि
शेषदर्शनेप्रत्यक्षोत्पत्तौबाधकाभावात्॥ एवमुपाध्यायमतेप्राथमिकसंशयोत्पत्तिकालेप्रत्यक्षनिर्णी
यत्वावच्छिन्नापत्तिः॥ विशेषदर्शनाभावविशिष्टविपरीतज्ञानाभावस्यप्राक्सत्वात्॥ अतस्तद्धारणा
यत्वावच्छिन्नंप्रतिसंशयसामग्र्याः प्रतिबंधकत्वंकल्पनीयमितिगौरवं। मिश्रमतेतुविशेषदर्शनजन्य १५
तायामेवनिर्णयत्वस्यसत्वात्विशेषदर्शनेतरकारणबलात्तदवच्छिन्नापत्तिः संभवतिविशेषद
र्शनदशायांतुसंशयानुदयेनतदवच्छिन्नोत्पत्तिरिष्टैव॥ नचोपाध्यायमतेपिताद्दशविपरीतज्ञानाभावस्य
कावकालवृत्तित्वहेतुत्वोपगमात्संशयोत्पत्तिकालेचतदभावान्ननिर्णयत्वावच्छिन्नापत्तिरितिवाच्यं। एव
मपिअप्रामाण्यज्ञानास्कंदितसंशयोत्पत्तिकालेअप्रामाण्यग्रहाभावविशिष्टविपरीतज्ञानाभावरूपकारण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सत्त्वेन निर्णीयत्वावच्छिन्नापत्तेर्दुर्वारत्वात् ॥ न च संशयोत्तरसंशये व्यभिचारवारणाय तदभावभासक
सामग्र्या हि विशेषदर्शन हेतुत्वे जनकत्वमुपेयते तेन तु निर्णीयत्वस्य जन्यतावच्छेदकत्वमिति न निर्णीयत्वाव-
च्छिन्नापत्तिरिति वाच्यं· तथा सत्येतादृशगौरवस्याधिक्यात् ॥ अथ पुरुषत्वव्याप्यकरवान् तथाविधवर
णवान् इत्यादिनानाविधविशेषदर्शनानामनुगतरूपेण हेतुतान संभवति व्याप्यत्वरवच्छेदकादिभेदेन
भिन्नतया पुरुषत्वव्याप्यवत्तात्तानस्याननुगतत्वादिति विशेष्यैव हेतुता वाच्या तथा च परस्परजन्यप्र स
क्षेपरस्परेषां व्यभिचारेण कथं हेतुता । न च पुरुषत्वाभाववत्ताज्ञानविरोधित्वेन तथाविधसकलविशेष
दर्शिवानामनुगमः संभवतीति वाच्यं । विरोधितायाविरोधिता या वा विरोधितावच्छेदकघटितत्तयाकरवत्ता
तानत्वादिरूपविरोधितावच्छेदकभेदेन भिन्नतया ऽननुगमतादवस्थ्यात् एवं विनापि विशेषदर्शनमंध
कारादौ घटादिसंदेहे आलोकसमवधानाद्य धनिनिर्णयो सत्त्वात् व्यभिचारः ॥ विपरीतज्ञानविरोधितया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्साधारण्यपि विशेषदर्शनालोकसंयोगसाधारणप्रतिबंधकतावच्छेदकसंबंधस्यैकस्य दुर्वचत्वात्॥ नच
विशेषदर्शनविरहप्रयुक्तविपरीतज्ञानांतरप्रत्यक्षत्वं विशेषदर्शिजन्यतावच्छेदकं उपदर्शितस्थले चालोक
संयोगविरहप्रयुक्तमेव विपरीतदर्शनं न तु विशेषदर्शनविरहप्रयुक्तं अतो न व्यभिचार इति वाच्यं। विशे
षदर्शनविरहप्रयुक्तत्वस्य दुर्वचत्वादिति चेन्न। विशेषदर्शिजन्यतावच्छेदककोटौ अव्यवहितोत्तरत्वसंबं
धेन विशेषदर्शिना वैशिष्ट्यानिवेशनीयतया कुत्रापि व्यभिचाराभावात् इत्थं च विपरीतज्ञानवैशिष्ट्यमपि
न निवेश्यते प्रयोजनाभावात् एतेन विपरीतज्ञानभ्रमकाले विशेषदर्शनरूपकारणबलाद्विपरीतज्ञानो
त्तरप्रत्यक्षत्वावच्छिन्नापत्तिः न कारणप्रविश्रमते विपरीतज्ञानोत्तरप्रत्यक्षत्वावच्छिन्नं विपरीतज्ञानत्वेन
हेतुता वाच्या। एवमानुकादिविपरीतज्ञानकाले विशेषदर्शनबलात् चाक्षुषविपरीतज्ञानांतरचाक्षुषवि
षयत्वावच्छिन्नापत्तिवारणाय तत्र चाक्षुषविपरीतज्ञानत्वादिनापि हेतुत्वांतरं कल्पनीयमिति विपरीत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ज्ञानस्यसत्यकार्यकारणभावानामाधिक्यमित्यपिप्रयुक्तं।विपरीतज्ञानोत्तरत्वस्यकार्यतानवच्छेदकत्वेन
तदवच्छिन्नापत्त्यभावात्एवंविशेषदर्शनस्योपनीतभानसामान्यचाक्षुषस्पार्शनादिभेदेनकारणतावा
हुल्यमपिनास्तिलौकिकान्यत्वंकार्यतावच्छेदककोटौवनिवेश्यलौकिकालौकिकसाधारणनिःशेषद
र्शनविशिष्टप्रत्यक्षत्वावच्छिन्नंप्रतिविशेषदर्शनस्यहेतुतयैवोपपत्तिः।।अथविपरीतज्ञानोत्तरप्रत्यक्षत्वा
वच्छिन्नंप्रतिविशेषदर्शनविशिष्टप्रत्यक्षत्वावच्छिन्नंप्रतिवाविशेषदर्शनत्वेनहेतुत्वकल्पनेपिविपरीत
ज्ञानकालेविनाविशेषदर्शनंप्रत्यक्षनिर्णयापत्तिःसामान्यसामग्रीबलादस्त्येव।नचसामान्यसामग्र्यावि
शेषदर्शनरूपविशेषसामग्रीसमवहितायाएवंफलजनकतयातांविनाकथमापत्तिरितिवाच्यं।विशे
षदर्शनंविनापिसामान्यसामग्र्याविपरीतज्ञानानुत्तरनिर्णयोत्पादेनविशेषदर्शनाघटिततत्सामग्र्या
एवंफलव्याप्यत्वस्वीकरणीयतयातादृशसामग्र्याविपरीतज्ञानकालेपिसत्वेनापत्तिसंभवादितिचेन्न

वा॰वु

विपरीतज्ञानानन्तरप्रत्यक्षत्वावच्छिन्नंप्रतिविपरीतज्ञानाभावस्यापिहेतुत्वोपगमाद्विशेषदर्शनविपरी
तज्ञानाभावान्यतरविशेषसामग्रीसह कृतायाएवसामान्यसामग्र्याःफलोपधायकत्वोपगमेनविपरी
तज्ञानकालेविशेषदर्शनासत्वेतदन्यतरासंभवेनापादानासंभवात् ॥नचैवमथानुमानिकादिविपरी
तज्ञानोत्तरलौकिकचाक्षुषादेविपरीतज्ञानोत्तरत्वेनविपरीतज्ञानाभावस्यजन्यतावच्छेदकानाक्रांतया
विशेषदर्शनानन्तरत्वेनचविशेषदर्शनजन्यतावच्छेदकानाक्रांतयाचक्षुषादिविपरीतज्ञानकालेनै ७
वविशेषदर्शनानन्तरत्वेनचविशेषदर्शनतावच्छेदकानाक्रांतयाचाक्षुषादिविपरीतज्ञानकालेविनैव
विशेषदर्शनयापत्तिरितिवाच्यंचाक्षुषविपरीतज्ञानानन्तरचाक्षुषत्वावच्छिन्नंप्रतिचाक्षुषविपरीतज्ञाना
भावत्वादिनाहेतुत्वोपगमात्‌तादृशज्ञानस्यचचाक्षुषादिविपरीतज्ञानाभावजन्यतावच्छेदकाक्रांततया
तादृशकारणविरहेणचाक्षुषादिविपरीतज्ञानकालेतदापत्त्यसंभवात्नचैवंविपरीतज्ञानाभावस्यसस

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कार्यकारणभावानांमिश्रमतेप्यावश्यकतयालाघवानवकाशइतिवाच्यंउपाध्यायमतेतादृशसमकार्य
कारणभावेविशेषदर्शनाभावकूटनिवेशेनैवापरस्परंअप्रामाण्यग्रहादिभिन्नविशेष्यविशेषणाभावेविनि
गमनाविरहेणानंत्यात्। मिश्रमतेचएकैकविधविशेषदर्शनस्यहेतुतायाकल्पनेनलाघवस्यानपायात्
एतेनकार्यतावच्छेदककोटौविपरीतज्ञानानंतरत्वादिनिवेशप्रयुक्तगौरवमकिंचित्करमेव॥ नवाव्यवहितो
त्तरत्वस्यानुगततस्यदुर्वचतयातत्रव्यक्तिविश्रांतइतिवाच्यं॥ अनुगततन्निर्वचनौदर्शितत्वात्॥ अत्रवदं स्योप. ५
ति॥ विपरीतज्ञानोत्तरप्रत्यक्षविशेषदर्शनस्यहेतुत्वंनाधिकंकिंतुपुरुषत्वाद्यनुमितौपुरुषत्वादिव्याप्यव
त्तानिर्णयस्यहेतुतायाआवश्यकत्वात्तच्चतादृशनिर्णयविशिष्टत्वनिवेशस्यावश्यकतयाप्रयोजनाभावे
नानुमितित्वाद्यनिवेशात्तादृशकार्यकारणभावेनैवोपपत्तेः नचतत्रानुमितित्वनिवेशोआवश्यकः अन्य
थासिध्यादिकालेपितादृशपरामर्शादिजन्यतावच्छेदकाक्रांततत्प्रत्यक्षानुत्पत्त्यासिध्यभावंसहकृततस्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

या.वु पिकव्याप्यतायाः स्वीकरणीयतया त्वात्तिच्छिकाले अनुमित्यापत्तिरिति वाच्यं ॥ अनुमितित्वस्य जन्यतान
वच्छेदकत्वेन तद्दलादनुमितित्वावच्छिन्नाया दनासंभवात्. तादृशपरामर्शविशिष्टत्वावच्छिन्नस्य च प्रत्य
क्षादेरेवोत्पत्त्या तत्रैवापत्तिरिति ॥ तच्चिंत्यं ॥ पुरुषत्वव्याप्यकरादिकरादिमांश्चायमित्याकारकज्ञानद्वया
८ दित्तोपि विपरीतज्ञाने नँ निर्णयोत्पत्त्या करत्वाद्यवच्छिन्नविशेष्यतापुरुषत्वादिव्याप्तिज्ञानविशिष्टकारादि
मत्ताज्ञानत्वेन विशेषदर्शनस्य विशिष्टपरामर्शहेतुताविलक्षणहेतुताया आवश्यकत्वात् तन्न चतादृशज्ञान १८
द्वयादिकाले विपरीतज्ञानदशायां प्रत्यक्षं संजायत एवेति वाच्यं । तादृशज्ञानद्वयादेरपिमादिविरोधितयात ५४
त्सत्वे प्रत्यक्षनिर्णयोत्पादस्य भ्रमविरोधित्वेन विशेषदर्शनस्य हेतुता लिखितदीधितिकारस्य संमतत्वात्
नवीनास्तु ॥ प्रत्यक्षनिर्णये विशेषदर्शनाभावविशिष्टविपरीतज्ञानाभावस्य विशेषदर्शनस्य हेतुत्वे माना
भावः । नच तदकल्पने संशयोत्तरं विनैव विशेषदर्शनं निर्णयापत्तिः संभवति निर्णयत्वस्य पुरुषत्वाभा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वाध्यप्रकारकपुरुषत्वप्रकारकज्ञानत्वादिरूपस्यनीलोत्तरघटत्वादिपदार्थसमाजग्रस्ततर्थ समाजग्रस्ततया
कस्यचिज्ज्ञानस्य तानवच्छेदकतयातदवच्छिन्नापादकाभावात्॥ पुरुषत्वप्रकारकप्रत्यक्षत्वावच्छिन्नं न संश
यात्मकमेव जायते तदभावस्याप्युपस्थितत्वात्तज्ज्ञाने बाधकाभावात्॥ न च संयोत्तरं विशेषदर्शनोत्प ग्र २
त्तिक्षणे निर्णयोर्थवशादेवोत्पद्यतां तदभाववत्ताज्ञानेन घ्रा। प्यवत्ताज्ञानस्य कार्यकालवृत्तितया प्रतिबंध
कत्वात्॥ न चानीतदभावस्याभानासंभवादिति वाच्यं॥ तादृशास्य लेनिर्णयस्येष्टत्वात्॥ तद्द्वितीयक्षणे नि-
र्णयोत्पादस्य सर्वमतसिद्धतया पूर्वक्षणे तत्स्वीकारे क्षतिविरहात्॥ न च भ्रमोत्तरं विशेषदर्शने प्रत्यक्षनि
र्णयोदयात्प्रत्यक्षनिर्णयोन्यज्ञानत्वं बाधप्रतिबध्यतावच्छेदकमवश्यं वाच्यं॥ तथाच बाधनिर्णयकाले
विनाविशेषदर्शनं प्रत्यक्षनिर्णयवारणाय विशेषदर्शनादिहेतुत्वमावश्यकमिति वाच्यं॥ भ्रमकाले
विशेषदर्शने सत्यपि भ्रमनाशोत्तरमेव निर्णयोपगमात् प्रत्यक्षनिर्णयान्यत्वस्य बाधप्रतिबध्यतावच्छेद

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वा॰तु ककोटावनिवेशादित्याहुः॥ तत्र ब्रूमः॥ विपरीतज्ञानोत्तरप्रत्यक्षत्वावच्छिन्नं प्रति विशेषदर्शनस्य हेतुत्वे
नायं पुरुष इत्याद्याकारकशाब्दबोधसामग्र्या अयं पुरुष इत्यादिमानसं प्रति प्रतिबंधकतानकल्पते इति॥
लाघवं तादृशशाब्दसामग्रीदशायां इदं त्वावच्छिन्नविशेष्यकपुरुषत्वाभावप्रकारयोग्यताज्ञानसत्ताया आवश्य
कत्वात् तदुत्तरविशेषदर्शनरूपकारणाविरहेणैवायं पुरुषप्रतिबंधकसत्त्वेन शाब्दबोधनवलामकालेतादृ
शमानसवारणायतथाविधसामग्रीकाप्रतिबंधकत्वकल्पनमावश्यकं इति गौरवं॰ सामग्र्या एवाभावात्॥ १९
अपि पुरुष इत्यादिमानसस्येष्टत्वात्॰ विशेषदर्शनाहेतुत्वमते च संशयात्मकयोग्यताज्ञानघटिततादृशशाब्द
निर्णय प्रत्येकविशेषदर्शनस्य हेतुतया तादृशशाब्दसामग्रीकाले मानससंशयवारणाय तादृशसामग्र्याः प्रति
बंधकत्वकल्पनमावश्यकमिति वाच्यं॰ पुरुषत्वाद्यभाववद्विषयकमानसं तत्पाऽभयमतसिद्धत्वात् ज्ञानासं
भवेन संशयायसंभवात् पुरुषत्वाभाववमानसेच्छासत्त्वे च तादृशेच्छाविशिष्टमानससामग्रीरूपप्रतिबंध

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

काभावघटितशाब्दसामग्र्याः सत्वेन संशयस्येष्टत्वात्, नच विशेष्यतावच्छेदकसामानाधिकरण्यमात्राव
गाहिविपरीतज्ञानोत्तरं तादृशे प्रत्यक्षे विशेषदर्शनस्याहेतुतया तथाविधयोग्यताज्ञानघटितादृशसामग्री
कालेतथाविधमावारणाय शाब्दसामग्री प्रतिबंधकत्वकल्पनमावश्यकमेवेतिवाच्यं। तादृशयोग्यताज्ञान
घटितसामानाधिकरण्यमात्रावगाहिशाब्दसामग्र्याः सामानाधिकरण्यमात्रावगाहिमानसंप्रत्ययविरोधित्वे
पिअवच्छेदकावच्छेदेनयोग्यताज्ञानघटितावच्छेदकत्वावगाहिशाब्दसामग्र्याः विरोधित्वाकल्पनेनला
घवसंभवात् नचमन्मतेपि तादृशशाब्दसामग्र्याः प्रतिबंधकत्वंनास्तिवाधनिर्णयाभावरूपकार्यसहभावेन
विशिष्टबुद्धिप्रतिहेतुतया कार्यकालेतादृशशाब्दबोधोत्पत्त्यावाधनिर्णयाभावविरहे तौ व तथाविधमानसवा
रणासंभवादितिवाच्यं यत्र तादृशशाब्दसामग्रीकालेतादृशाभावविशिष्टज्ञानेमप्रमेत्यमाणप्रग्रहस्तत्रतादृ
शबोधोत्पत्तिक्षणेऽप्रामाण्यग्रहाभावविशिष्टवाधनिर्णयाभावरूपकारणसत्त्वे न तादृशमानसापत्तिसंभवा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बाध त ॥ अथास्त्वेतादृशालाघवं तथापि विशेषदर्शनहेतुतामते ऽयं पुरुषस्यैतादृशलौकिकप्रत्यक्षसामग्र्याः
स्तथाविधशाब्दबोधादिप्रतिबंधकतायां विशेषदर्शनवैशिष्ट्यं निवेशनीयं. अन्यथा तादृशप्रत्यक्षजनकी-
भूतलौकिकसन्निकर्षादिसत्वे योग्यतासंशयादिसत्वे विशेषदर्शनासत्वे शाब्दबोधानुदयप्रसंगात् ॥ तथा
च विपरीतज्ञानभ्रमकाले तादृशप्रत्यक्षेउत्पाथमाने तथाविधशाब्दबोधापत्तिवारणाय विपरीतज्ञानाभा
वं निवेश्य विशेषदर्शनमनिवेश्य प्रत्यक्षसामग्र्याः प्रतिबंधकत्वांतरं कल्पनीयंमन्मते विशेषदर्शनादिकम २०
निवेश्य एकमेव प्रतिबंधकत्वं कल्पनमिति लाघवं इति चेत् न मन्मतेपि विशेषदर्शनादिकमनिवेश्य एकप्र-
तिबंधकताया एकल्पनीयतया उपदर्शितस्थले भवतेव मयाविशाब्दबोधानंगीकारात्. किंतु तादृशप्रत्य-
क्षसंशये एव तज्ञोपेयते ॥ अथवा लौकिकप्रत्यक्षस्यजे विशेषदर्शनादिहेतुत्वं मयापि नोपपन्नं अतो लौकि-
कप्रत्यक्षसामग्रीप्रतिबंधकतायां भवन्मताविशेषएव उपनीतभानसामग्र्यास्तु विशेषदर्शनविपरीतज्ञानाभा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वोपथक्पृथक्निवेश्यप्रतिबंधकताद्वयंनाशकनीयंतस्यास्वभावतोदुर्बलोयाइच्छाविशिष्टत्वेनैवविरो
धितायाइच्छासत्वविशेषदर्शनादिसत्वासत्वयोरकिंचित्करतयात्तदनिवेश्यएकप्रतिबंधकतायाएवक
ल्पनात्तस्माद्विशेषदर्शनहेतुतामतेतथाविधमानसेतथाविधशाब्दसामग्रीप्रतिबंधकत्वाकल्पनेनला
घवंदुष्परिहरमेव॥अथशब्दमानसंप्रतिताद्दशशाब्दसामग्र्याःप्रतिबंधकत्वेकल्पनीयेविषयमनिवे
श्यमानसत्वस्यैवप्रतिबध्यतावच्छेदकत्वोपगमात्ततएवोपपन्नौनायंपुरुषइत्यादिमानसेनायंपुरुष
इत्यादिशाब्दसामग्र्याःप्रतिबंधकत्वमधिकं॰नन्वघटमानसंजायतामित्याकारकविषयमिश्रभेच्छायाउत्ते
जकत्वात्तेधेनविशिष्यघटमानसत्वादिकमेवप्रतिबध्यतावच्छेदकंवाच्यं॥तथाचकथमेकप्रतिबंधकतयै
वोपपत्तिरितिवाच्यं॥सामग्रीकालीनत्तानेच्छायाहेतुत्वापगमेनेच्छायाउत्तेजकत्वानभ्युपगमात्सामग्र्युत्तर
त्वस्यैवसामग्र्यभाववज्ज्यतावच्छेदकत्वापगमेनेच्छाकालीनज्ञानेसामग्र्यभावस्यव्यभिचाराभावात्॥नचैवम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ता·वु पितादृशसामग्रीकालीनज्ञानइदंत्वावच्छिन्नविशेष्यकपुरुषत्वादिमानसेच्छायाहेतुत्वमेवाधिकमिति
वाच्यंविरोधिसामग्र्यंतरकालीनतथाविधमानसेतादृशेच्छाहेतुत्वेकल्पनीयेतत्तादृशसामग्रीवैशिष्ट्यमनिवे
श्यतथाविधमानसेच्छाविशिष्टमानतत्त्वसत्त्वस्यैवतादृशजन्यतावच्छेदकत्वोपगमात्तादृशकारणानयैवो
पपत्तेस्तथाविधशाब्दसामग्रीकालीनमानसेच्छाहेतुत्वांतरकल्पनादितिचेन्नएवंसतिविशेषदर्शनस्य
हेतुतामतेपिगौरवानवकाशः॥अनुमितिपरामर्शस्थलीयपरामर्शहेतुतयैवोपपत्तौविशेषदर्शनहेतु २१
करादि तायाअतिरिक्तत्वाभावात्॥नचपुरुषत्वव्याप्यकरादिमांश्चायमित्येतादृशज्ञानत्वादिहेतुताकल्पन
मधिकमितिवाच्यं॥पुरुषत्वव्याप्यंनस्याकरादिःस्यात्कारकापत्त्यात्मकतानेतादृशव्याप्तिज्ञानस्यापंकरा
नास्यादित्यतादृशापत्तौचायंकरादिमानित्यादिज्ञानस्यापाद्यव्यतिरेकनिर्णयमुड्याहेतुत्वेकल्पनीयेता
दृशापत्त्यादिकमनिवेश्यतादृशनिर्णयविशिष्टान्यक्षत्वस्यैवजन्यतावच्छेदकत्वोपगमात्तादृशकार

णज्ञानद्वयेनैवोपपन्नेस्तथाविधज्ञानद्वयादिहेतुतायाअप्यतिरिक्तत्वाभावात्॥नचतादृशप्रत्येकज्ञानद्वया
तादृशापत्तुद्वयादयंपुरुषइत्याकारकनिर्णयस्याप्युत्पादप्रसंगवारणायान्नतादृशव्याप्तिज्ञानविशिष्टक
रादिमत्तानिर्णयत्वादिनैवहेतुत्वंवाच्यंतत्त्वाधिकमितिवाच्यं·तादृशकारणद्वयस्यप्रत्येकंतथाविधायति
द्वयोसाधकत्वेपिप्रकृतस्थलेदंडचक्रचीवरादिवन्मिलितस्यैकफलोपधायकत्वोपगमेनप्रत्येकज्ञानाता
दृशनिर्णयापत्त्यभावात्॥नचतादृशापत्तिस्थलीयकार्यकारणभावेनादृशनिर्णयाव्यवहितोत्तरत्वनिवे
शादेवगौरवंएतन्मतेमन्मतेतादृशव्याप्यभावादिगोचरापत्तित्वस्यजन्यभावच्छेदकत्वेनैवोपपन्नौतादृश
निर्णयाव्यवहितोत्तरत्वानिवेशादितिवाच्यं॥व्याप्यभावाभाववानित्याद्याकारकबाधजन्यापत्तौव्यभिचार
वारणायतादृशनिर्णयाव्यवहितोत्तरत्वनिवेशावश्यकत्वात्॥एवंविपरीतज्ञानानन्तरप्रत्यक्षेविपरीतज्ञा
नाभावस्यापत्तिवादककारणतायाआधिक्यान्नैरवमित्यपिनाशंकनीयेतादृशहेतुताकल्पनेनापपुरुषइ

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDE
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वा॰प्र त्यादिशाब्दसामग्रीप्रतिबंधकतायांप्रत्यक्षत्वाभावादिप्रयोज्यकताज्ञाननिवेशेन लाघवात् तथाहि तादृशयोग्यता
ज्ञानध्वंस्यकालीनेतरसकलसमवधानकालीनप्रत्यक्षादौ व्यभिचारस्य सामनुत्तरत्वनिवेशेनैव वारितत्वा
त् त्वन्मते तादृशयोग्यताज्ञाननिवेशनंतदनिवेशे योग्यताज्ञानध्वंस्यकालीनेतरसकलकारणसमवधान
कालीनप्रत्यक्षादेस्तथाविधसामग्र्यभावादिजन्यतावच्छेदकानाक्रांततया योग्यताज्ञानादिघटितशाब्दसाम
ग्रीकालेतदापत्तिः स्यात् तद्वारणाय यन्मते तु कार्यतावच्छेदककोटौ विषयमनिवेश्य प्रत्यक्षत्वाभाववत्ता २२
नुत्तरज्ञानत्वावच्छिन्नं प्रति तादृशज्ञानाभावत्वेन हेतुताकल्पना तादृशयोग्यताज्ञानध्वंस्यकालीन
निखिलज्ञानानामेतादृशजन्यतावच्छेदकाक्रांततया तादृशयोग्यताज्ञानदशायांच एतादृशकारणविरहेणै
वन तत्सापत्तिरिति न तादृशसामग्रीप्रतिबंधकतायांयोग्यताज्ञाननिवेशनमिति । न च चाक्षुषविपरीतज्ञाना
नुत्तरचाक्षुषादौ तादृशविपरीतज्ञानाभावहेतुत्वमेवाधिकमिति वाच्यं ॥ भवन्मतेपि चाक्षुषत्वनिर्णयाय यस्याभावस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDE

चाक्षुषादिविशिष्टबुद्धिहेतुतायाः स्वीकरणीयत्वात्. नचभवन्मते चाक्षुषविपरीतज्ञानायनुतदत्वस्य जन्यता
वच्छेदककोटिप्रवेशाद्गौरवमितिवाच्यं. भवन्मतेपि प्रतिबंधकतावच्छेदककोटौ निर्णयत्वस्याधिक्यात्॥ अ
प्रामाण्यग्राहकैः सह तस्य विशेष्यविशेषणभावे विनिगमनाविरहेण गौरवात्॥ एवमाहार्यज्ञाने व्यभिचार
वारणाय इच्छायाऽजन्यत्वकल्पनापेक्षया भवन्मते विपरीतनिर्णयानुत्तरत्वस्य कार्यतावच्छेदकत्वमुचितए
वंचउभयत्रनिर्णयत्वनिवेशेन गौरवं भवन्मतएवाधिकमिति कतपधिकेन विषयशाब्दबोधस्येतरकार
णसत्वेविपरीतसंदेहसत्वे चाप्रामाण्यनिर्णयसत्वेयादृशसामग्रीबलात्प्रत्यक्षमुत्पन्नं अप्रामाण्यसंदेह
सत्वेविपरीतसंशयदशायामपितादृशसामग्रीबलात्प्रत्यक्षनिर्णयापत्तिः नचाप्रामाण्यनिर्णयाभावविशि
ष्टविपरीतसंशयज्ञानाभावविशिष्टत्वावच्छिन्नं अप्रामाण्यनिर्णयाभावविशिष्टविपरीतज्ञानाभावत्वेनहेतु
त्वान्नदोष इति वाच्यं विपरीतनिर्णयसत्वेऽप्रामाण्यसंदेहसत्वेयादृशसामग्रीबलात्प्रत्यक्षमुत्पन्नं विपरीत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वा॰बु संशयात्मकज्ञानसत्त्वेपितादृशसामग्रीबलात्सुप्त्यक्षनिर्णयापत्तेः नचप्रत्यक्षापत्तौइष्टापत्तिः संशयस्याधार
णहेतुतायांअप्रामाण्यनिर्णयस्यैवतुल्यतयायोग्यतासंशयकालेअप्रामाण्यसंशयग्रहेणाद्बोधोत्पादेने
ष्टापत्तेरसंभवात्स्मृतिविपरीतनिर्णयकालीनाप्रामाण्यसंशयस्यतत्रच्छक्तित्वेनहेतुत्वेप्रकारांतरानुसर
णेवागौरवं मितिवह्न्यादिविशिष्टबुद्धौवह्न्याद्यत्वं ताभाववत्ताज्ञानवत्वह्निमद्भेदवत्ताज्ञानस्यापिविरोधिता
वश्या एवंपर्वतोवह्न्यभाववानित्यादिनिर्णयवत् पर्वतेवह्न्यभावइत्यादिनिर्णयस्यापिविरोधित्वमुह २३
नीयं वह्न्यभावविषयतावच्छिन्नपर्वतविषयताशालित्वेनहिविधनिर्णयाननुगमेप्येकप्रतिबंधक
त्वकल्पनंपुनरुपादेयमेव अन्यान्यविधाप्रामाण्यज्ञानानामुत्तेजकत्वानुरोधेनपृथक्प्रतिबंधकतायाः
आवश्यकत्वात् संयोगादिनादिनाविशिष्टबुद्धौवह्निसंयोगत्वं ताभाववादिमत्तानिर्णयस्यापिविरोधितावो
ध्या तादृशनिर्णयदशायामपितथाविधविशिष्टबुद्ध्युत्पादस्यानुत्पादस्यानुभवसिद्धत्वात्तन्नव्यास्तु ना

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

दृशविशिष्टबुद्धौ तादृशनिर्णयस्यापि विरोधित्वे मानाभावः ग्राह्याभावानवगाहित्वात् अन्यथा वह्निसंबंधाः
सवधात्वं तदभाववत्तानिर्णयादीनामपि विरोधित्वापातात् न च संयोगादिसंसर्गकवत्ताबुद्धौ वह्निसंयोगाभा
वादिनिर्णयविरोधित्वं नाधिकं किं तु वह्निसंयोगादिविशिष्टबुद्धौ तत्प्रतिबंधकत्वे कल्प्ये वह्निप्रकार
तावच्छिन्नसंयोगीयविषयतावच्छिन्नपर्वतविशेष्यताशालिज्ञानत्वादिरेव तत्प्रतिबध्यतावच्छेदकत्वोप
गमात् संयोगादिसंसर्गकविशिष्टबुद्धेरपि तदनाक्रांततया तादृशप्रतिबंधकतयैव निर्वाहादिति वाच्यं समवा
यादिसंसर्गकविषयतायाः प्रतिबध्यतावच्छेदककोटाववश्यं निवेशनीयत्वात्। संयोगादिना वह्न्यादिविशि
ष्टबुद्धेः समवायात्मकसंबंधसंबंधानवगाहितया तादृशप्रतिबध्यतावच्छेदकानाक्रांतत्वात् न च का
लिकादिसंबंधेन संयोगादिविशिष्टबुद्धौ व्यभिचारवारणाय समवायादिसंसर्गत्वं विशिष्टबुद्धौ न निवेशनी
यं किं तु समवायाद्यनवच्छिन्नप्रकारतात्वं त्वसंयोगादिविषयतायां निरूपितत्व संयोगादिसंसर्गकविषय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वाध तायां निरस्तं तच्च संयोगादिसंसर्गकविषयतासाधारणमतो न संयोगादिसंसर्गकविशिष्टबुद्धेः संग्रह इति वा
च्यं ॥ समवायादिसंसर्गकत्वनिवेशापेक्षया तादृशप्रकारतान्यत्वनिवेशे गौरवात् तत्संसर्गाभावग्रहदशायां
तत्संसर्गकविशिष्टबुद्धित्वीकारक्षतिविरहेण तादृशगौरवास्यहिष्णुतयाः अनुचितत्वादित्याहुः अन्वय
दा वह्निसंयोगाद्यभाववत्तावच्छेदेन संयोगसंबंधावच्छिन्नप्रतियोगिताकवह्न्यभाववत्तागृहीता तदा पर्व
तत्वावच्छेदेन वह्निसंयोगाद्यभावग्रहे तत्संसर्गाभाववत्तानिर्णयदशायां पर्वतो वह्निमानित्यादिविशिष्ट
बुध्यनुत्पादः सर्वमतसिद्धः एवं तदुपपत्तये चैतन्मते तादृशविशिष्टबुद्धौ वह्निसंयोगाभाववान्न व २४
ह्निमानित्यादिज्ञानवैशिष्ट्यं निवेश्य वह्निसंयोगाभाववान् पर्वत इत्याकारकनिर्णयस्यावच्छेदकध
र्मदर्शनविधया विरोधिता कल्पनीया तदपेक्षया चात तद्ज्ञानवैशिष्ट्यमनिवेश्य प्रतिबंधकताक
ल्पनमेवोचितमिति विभावनीयं ॥ वह्न्यादिविशिष्टबुद्धौ वह्न्यभावादिनिर्णयवत्त्वव्यभावादिविशिष्टबु

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

सीयवह्न्यादिनिर्णयस्यापिविरोधित्वं वोध्यं तत्र भुस्त्ववह्नित्वावच्छिन्नसंयोगाद्यवच्छिन्नप्रतियोगिताकाभाववत्
ताज्ञानत्वेन प्रतिबध्यताः संयोगादिसंसर्गकवह्निमत्तानिर्णयत्वेन प्रतिबंधकता अत्र निर्णयत्वं भुस्त्ववह्नि
त्वावच्छिन्नप्रतियोगिताकाभावाप्रकारत्वं· अतो न महानसीयवह्न्यभाववान् वह्निमांश्च पर्वत इत्याकारक
ज्ञानासंग्रहः नचैवं महानसीयवह्निमान् वेति संशयस्यापि विरोधितापत्तिरितिवाच्यं तादृशाभाव
प्रकारकभुस्त्ववह्नित्वावच्छिन्नप्रकारताशालिज्ञानत्वेनैवविशेषितत्वात् नचैवं महानसीयवह्निमान् पर्व
त इत्याकारकनिर्णयकाले वह्न्यभाववान् पर्वत इत्याकारकज्ञानापत्तिरितिवाच्यं तादृशनिर्णयस्य पृथ
क्प्रतिबंधकत्वाभ्युपगमात् अप्रामाण्यज्ञानानास्कंदितत्वानुरोधेन तस्य पृथक्प्रतिबंधकत्वमावश्यकमेव·
तादृशसकलनिर्णयानामेकप्रतिबंधकत्वे महानसीयवह्न्यभाववति महानसीयवह्नित्वावच्छिन्नप्रकार
कं वह्नित्वावच्छिन्नाभाववति वह्नित्वावच्छिन्नप्रकारकमित्याकारकनानाविधाप्रामाण्यग्रहाभावानामेकत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बाध निवेशनीयतापत्त्या महानसीयवह्नित्वावच्छिन्नतियोगिताकाभाववति महानसीयवह्नित्वाद्यवच्छिन्नप्रका
रकमित्याद्याकारकाप्रामाण्यग्रहकालीनस्य पर्वतो वह्निमानित्यादिनिर्णयस्याविरोधित्वापत्तेः वस्तुतस्तु
वह्नित्वावच्छिन्नाभावबुद्धौ महानसीयवह्नित्वाद्यवच्छिन्नप्रकारकज्ञानस्य प्रतिबंधकतातिरिक्तानकल्प
ने महानसीयवह्नित्वाद्यवच्छिन्नाभावबुद्धिस्थलीयतादृशनिर्णयप्रतिबंधकतयैवोपपन्नः तथाहि
तादृशनिर्णयस्य प्रतिबध्यतावच्छेदकं इन महानसीयवह्नित्वावच्छिन्नप्रतियोगिताकत्वसंबंधेन महानसी २५
यवह्नित्वावच्छिन्नप्रकारकाभावबुद्धित्वं पर्वतक्षणादिवृत्तित्वविशिष्टमहानसीयवह्न्यभावादिप्रतियोगिता
या अपि महानसीयवह्नित्वावच्छिन्नत्वात् पर्वतक्षणवृत्तित्वविशिष्टमहानसीयवह्न्यभाववानित्याकारक
स्यापि प्रतिबध्यतापत्तेः अतो महानसीयत्वातिरियद्वह्नित्वातिरिक्तं रूपं तदनवच्छिन्नप्रतियोगिताकत्व
संसर्गावच्छिन्नवह्निप्रकारतावच्छिन्नाभावाप्रकारताशालिज्ञानत्वमेव तथा वाच्यं एवं च यद्वह्नित्वावच्छि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

त्प्रतियोगितासंसर्गकवह्न्यभाववान् पर्वत इत्यादिज्ञानस्यापि तादृशधर्माक्रांतत्वमिति एतेन सुंदरवव
ह्निमान् वह्नियानित्यादिनिखिलज्ञानानामेव प्रतिबंधकता निर्वाहाय तत्ताधारणानिर्णीयत्वनिर्वक्तुकामानां
व्यामोहो व्यर्थ एवेत्यवगंतव्यबाधादिनिर्णीयवन्नंजनकीभूतदोषविशेषसन्निकर्षविशेषाणामपि विरोधित्व
मूहनीयं अन्यथा पर्वतो वह्न्यभाववानित्याकारकप्राथमिकनिर्णयोत्पत्तिकाले वह्न्यादिविशिष्टबुद्ध्यापत्तेः
बाधनिर्णयाभावस्य प्राक् सत्वात् यत्तु बाधनिर्णयादानीं वह्निविशिष्टबुद्ध्यादेर्वह्न्याद्यप्रकारकवह्न्या
भावादिप्रकारकत्वरूपबाधनिर्णीयत्वावच्छिन्नस्यैवानिर्वाहेण तदानीं तादृशप्रतिबंधकसमवधानस्य कार्यानु
त्पादाधीनतया तस्य तत्कालीनं कार्यानुत्पादप्रयोजकत्वऽस्योत्याश्वपात् तत्प्रयोजकप्रतिबंधकांतरकल्पना
याअवश्यकत्वात् कार्यानुत्पादाधीनस्य कार्यानुत्पादप्रयोजकत्वाभ्युपगमे यस्सर्वत्र तत्कार्योत्पत्त्यनधिकरण
सरणाव्यवहितपूर्वक्षणहृत्तित्वविशिष्टत्वेन प्रतिबंधकसंभवेनैककारणपशैषयाशितद्धर्मावच्छिन्नविशे॰

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बाध ष्यताकलौकिकान्यतद्विशिष्टबुद्धौ तदभाववद्व्याप्यवत्ताज्ञानतदभावावच्छेदकज्ञानयोरपि बाधबुद्धिवत्प्र
तिबंधकतातदभावव्याप्यवत्ताज्ञानस्य च इदंत्वावच्छिन्नविशेष्यताकलौकिकान्यस्याराफत्वादिप्रकारता
शालिज्ञानत्वावच्छिन्नंप्रति करत्वाद्यवच्छिन्नविशेष्यताकस्याराफत्वाभावव्याप्यत्वप्रकारकनिर्णयविशिष्ट
इदंत्वावच्छिन्नविशेष्यताककरत्वावच्छिन्नप्रकारताशालिनिर्णयत्वेन प्रतिबंधकतानतु स्याराफत्वाभावव्या
प्यत्वावच्छिन्नकरादिप्रकारताशालिनिर्णयत्वेन स्याराफत्वाभावव्याप्यं करादि करादिमांश्चायमित्यादिज्ञान २६
द्वयदशायां तादृशसमूहालंबनदशायां च अयं स्याराफ न वेति संशयापत्तेः वस्तुतस्तु स्याराफत्वाभावव्या
प्यत्वावच्छिन्नकरादिप्रकारताशालिनिर्णयत्वेनापि प्रतिबंधकत्वं न तरं कल्प्यं तादृशज्ञानद्वयसाधारणप्रतिबं
धकतायां करत्वातिरिक्तधर्मप्रकारत्वानिरूपितत्वस्य करादिप्रकारतायां अवश्यनिवेशनीयतया तदशाप्रति
बंधकतयाविशिष्टज्ञानासंग्रहात् तन्न दनिवेशे स्याराफत्वाभावव्याप्यं करादि इत्याकारकनिर्णयविशिष्टस्यतत्क

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रादिमात्रवेत्तिसंशयस्यापिप्रतिबंधकतापत्तेः करवान्नरकत्वकरभाववांश्चायामित्येतादृशानिर्णयसंप्र
हायभुक्तकरत्वावच्छिन्नाभावप्रकारकत्वरूपनिर्णयत्वस्यैवनिवेशनीयत्वात्तादृशाभावप्रकारकत्वस्य
चतथाविधसंशयसाधारणत्वात्तथाविधसंशयासाधारण्यवारणाय करत्वातिरिक्तसंवरन्नभावव्याप्यत्वा
तिरिक्तंतद्धर्मप्रकरत्वानिरूपिततत्त्वंकरादिप्रकारतायांनिवेश्यत्वानद्वयस्यलापप्रतिबंधतावच्छेदकस्य
स्यारोपत्वाभाववाप्यकरत्वानरत्वाकारकज्ञानसाधारणापोपपादनेपिअप्रामाण्यज्ञानानास्कंदितत्वानुरोधे
नपृथक्प्रतिबंधकत्वमावश्यकं अन्यथास्यारोपत्वाभावव्याप्यत्वविशिष्टकरत्वावच्छिन्नकरप्रकारता
शालिज्ञानमप्रमाकरत्वावच्छिन्नप्रकारताशालिज्ञानमप्रमेत्याकारकनानाविधाप्रामाण्यज्ञानामकंदो
त्तेजकत्वापत्त्यातानद्वयादिकालेतथाविधविशिष्टधर्मावच्छिन्नप्रकारताशालिज्ञानमप्रमेत्यप्रामाण्य
ज्ञानसत्त्वेऽयंस्यारोपत्वंवात्तिसंशयापत्तेः एवमारोपत्वाभावव्याप्यनत्वकरत्वानित्यादिज्ञानानामपिपृथ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ग्विरोधित्वमवसेयं ॥ तदभावावच्छेदकधर्मस्यापदवच्छेदेन तदभावोग्रह्यते सः नद्यत्र ज्ञानस्य च करापदवच्छि-
न्नविशेष्यताकस्य दत्वाद्यभाववत्तानिर्णयविशिष्टे दन्त्ववच्छिन्नविशेष्यताककरादिमत्तानिर्णयत्वेन विरो-
नाक्तिशेष्यतावच्छेदकसामानाधिकरण्यमात्रावगाहिकरादिमान्स्यादित्याकारकनिर्णयकालीनकरा-
दिमत्ताज्ञानस्य स्यादित्यादिविशिष्टबुद्ध्यविरोधितया करत्वावच्छिन्नविशेष्यतानिरूपितसंसर्गकत्वमपि तदभाव
निर्णये निवेशनीयं स्यादित्वाद्यभावावच्छेदकीभूतकरादीनां तदभावव्याप्यत्वेपि करादिमान्स्यादित्याका २७
रकनिर्णयकालीनकरादिमत्ताज्ञानस्य तदभावव्याप्यनिर्णयविशिष्टकरादिमत्तानिर्णयप्रतिबंधकताव-
च्छेदकानाक्रान्तया ; वच्छेदकधर्मदर्शनस्य पृथक्प्रतिबंधकत्वाभावरूपकमिति ध्येयं स्यादित्वाभावव्याप्य
करादिकरादिमान्स्यादित्यादिज्ञानद्वयजन्यतथाविधद्वयसंस्कारस्य सत्वेयं करादिमानित्याकारक
ज्ञानस्य च सत्वे पश्चात्स्यादित्वेति संशयादिर्नोत्पद्यते न वा तादृशोद्बुद्धसंस्कारसहकृतेन तथाविधज्ञानस्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पिपृथक्प्रतिबंधकत्वमभ्युपेयं अथवोद्बोधकाभावविशिष्टसंस्कारान्य तदभावव्याप्यत्वादिविषयकविशि
ष्टकारणदमचाज्ञानत्वेनैकप्रतिबंधकतैवकल्पनीयाभेदस्याव्याप्यवृत्तित्वोपगमात् उद्बोधकदशायामुद्बोध
काभावविशिष्टसंस्कारभेदस्य संस्कारासत्वात् नानुपपत्तिः॰ तदभावव्याप्यवत्तानिर्णयाय नतरमिव तदुत्पत्ति
दशायामपि तद्विशिष्टबुध्यनुदयात्तद्विशिष्टबुद्धित्वावच्छिन्नं प्रति तदभावव्याप्यवत्तादिनिर्णयसामग्र्याः स्व
वृत्तिप्रयोगित्वसंबंधेन कृतिविशिष्टस्य तादृशनिर्णयप्रागभावस्यैव वा प्रतिबंधकल्पनीया यत्तु तदभावव्या
प्यवत्तानिर्णयाभावस्य कार्यकालवृत्तितया हेतुत्वोपगमात् न न उत्पत्तिकाले तद्विशिष्टबुध्यापत्तिरिति तद
सत् अप्रमाण्यग्रहास्कंदित तदभावव्याप्यवत्तानिर्णयानंतरं तद्विशिष्टबुध्युत्पत्तये अप्रामाण्यज्ञानोत्तेजक
तापा आवश्यकत्वात् भाविज्ञानं अप्रमम् इत्यप्रामाण्यग्रहद्वितीयक्षणे यत्र तदभावव्याप्यवत्तानिर्णयादि तत्र
यत्ते तदानीं तद्विशिष्टबुध्यापत्तेः कार्यकालोऽप्रामाण्यग्रहाभावविशिष्टतदभावव्याप्यवत्तानिर्णयाभाव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

बाध

सत्वात्तत्कारणायसामग्रीप्रतिबंधकताया आवश्यकत्वे कार्यकालवृत्तितया तदभावसत्वात्तत्कारणायसामग्रीप्र
तिबंधकताया आवश्यकत्वे कार्यंकालवृत्तितया तदभावव्याप्यवत्तानिर्णयाद्यभावहेतुताया निष्फलत्वादेवंध
अप्रामाण्यज्ञानानास्कंदित तदभावव्याप्यवत्तानिर्णयाद्यभावस्य कार्यसहभावेन हेतुत्वेयच्चभाविताऽनंअ
प्रमेत्यप्रामाण्यज्ञानानंतरं तदभावव्याप्यवत्तानिर्णयादितदनंतरं तद्विशिष्टबुध्युत्पत्तिप्रसंगः कार्य
कालेऽप्रामाण्यग्रहनाशेनाप्रामाण्यग्रहाभावविशिष्टतदभावव्याप्यवत्तानिर्णयाभावस्यासत्वादिति। २८
तदभावव्याप्यतदभावावच्छेदकधर्मवत्ताज्ञानीयविशेष्यतावच्छेदकमितवत्तदभावादिकमपिविशे-
ष्यतावच्छेदकीकृत्य अनाहार्यतद्विशिष्टबुद्धिर्नोत्पद्यते तत्कारणायवच्छ्भावाद्यवच्छिन्नविशेष्यतानि
रूपितवह्नित्वाद्युपच्छिन्नप्रकारताशालिज्ञानत्वावच्छिन्नंप्रति तादृशप्रकारताशालिज्ञानगोचरेच्छाविर
हविशिष्टवह्न्यभावाद्युपस्थितित्वेन प्रतिबंधकत्वं कल्पनीयं तादृशविशेष्यताशालिज्ञानं च तादृशज्ञान-

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गोचरेच्छादशायामेव प्रसिद्धं॰ न च वह्न्यभावाद्युपस्थितिरूपप्रतिबंधकसत्त्वकाले तादृशज्ञानापत्तिरिति
वाच्यं विशेषणज्ञानविरहात् अथवा तादृशेच्छाभावविशिष्टोपस्थितित्वेन तादृशेच्छाभावविशिष्टत्वेन वा
प्रतिबंधकत्वं कल्प्यते । वस्तुतस्तु तादृशज्ञानं प्रति तथाविधेच्छात्वेन हेतुत्वकल्पनयैवोपपत्तौ तदभावावि
शिष्टवह्न्यभावाद्युपस्थितेः प्रतिबंधकत्वकल्पनमनर्थकं अथ वह्न्यभावावच्छिन्नविशेष्यतानिरूपि
तावह्निप्रकारताशालिप्रत्यक्षं जायतामितीतादृशेच्छात्वेन तादृशप्रत्यक्षत्वेन कार्यकारणभावो न सं
भवति॰ तादृशेच्छां विनापि वह्निप्रकारतानिरूपितवह्न्यभावावच्छिन्नविशेष्यताशालिप्रत्यक्षं जायतामि
त्येतादृशेच्छाधीनतादृशप्रत्यक्षे व्यभिचारात् उभयेच्छायास्तादृशविशेष्यताशालिप्रत्यक्षविषयकेच्छात्वे
नानुगमय्य हेतुत्वे प्रत्यक्षं जायतामित्याकारकेच्छाया अपि तादृशप्रत्यक्षविषयकतया तत्त्वेऽपि नि
र्वह्निमान्वह्निमानिति प्रत्यक्षापत्त्या वा प्रकारविशेषनिवेशस्यावश्यकत्वात् तेमममनुतादृशेच्छातावकृत्वा॰

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बाध विशिष्टत्ताभावरूपकारणस्यतादृशसकलेच्छाकालवृत्तित्वान्नव्यभिचारइतिचेन्नतादृशवैशिष्ट्यस्य
तादृशेच्छाजन्यतावच्छेदकत्वेनव्यभिचारानवकाशात्तादृशेच्छाभाववत्त्वविशिष्टज्ञानत्वेनप्रतिबंधक
त्वेच्छाभावानांयास्यरं विषयविशेष्यभावेविनिगमनाविरहेणानंत्यप्रसंगात् अथतादृशेच्छाविरहवि
शिष्टवत्त्वभावाद्युपस्थित्यभावस्यतादृशेच्छायाभवत्प्रत्यक्षस्थलएवहेतुतयानिर्वह्निव्याप्यवानित्या
कानुमित्युत्पादेबाधकाभावः नचैतादृशोनुमित्यादेलौकिकतयाआपादकाभावः तेवंनिर्वह्निव्याप्यवा २९
नित्यादिपरामर्शादीनांकारणतायाएवाक्लृप्तत्वादितिवाच्यं घटाभाववान्वह्निव्याप्यवान्इत्यादि
परामर्शस्यघटाभाववान्वह्निमान्इत्याद्यनुमितिप्रतिहेतुत्वेकल्पनीयेतत्तद्घटादिकमनिवेश्यव
ह्निविधेयतानिरूपितविशेष्यतानिरूपिताया अभावत्वावच्छिन्नावच्छेदकतातन्निरूपितापादृतियोगितासं
सर्गावच्छिन्नावच्छेदकतावच्छेदकत्वसंबंधेनानुमितिप्रतिवह्निव्याप्यप्रकारतानिरूपिताविशेष्यात्वीयांभा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वत्वावच्छिन्नावच्छेदकतानिरूपितप्रतियोगितासंसर्गावच्छिन्नावच्छेदकतावच्छेदकम्बध्वसंबंधेन परामर्श
स्य हेतुत्वकल्पनाच्चिर्वह्निर्व्याप्यधूमवानिति परामर्शस्य तादृशप्रत्यासत्त्या वह्नित्वे सत्त्वेन तादृशकार्यता
वच्छेदकः प्रत्यासत्त्य अनुमितित्वावच्छिन्नतापत्त्येवफलतोनित्ये तादृशानुमित्यापत्तिः एतदनुरोधेन घटादि
कं निवेश्यात्मनिष्ठप्रत्यासत्त्या हेतुत्वोपगमे वह्निमानभावव्याप्यवान् इत्याकारकपरामर्शकाले वह्निमानभा
ववानित्याद्यनुमितौ वृत्त्ययमागायां अभावस्य प्रतियोगितासंबंधेन वह्निमत्त्वे लाघवमिति लाघवज्ञानव
लात् अभावे प्रतियोगितासंबंधेन वह्निभाते बाधकाभावात् निर्वह्निर्वह्निमानित्ये तादृशानुमितिर्दुर्वारैवे
न अत्र केचित् वह्नित्वावच्छिन्नप्रकारतानिरूपितविशेष्यत्वीयाभावत्वावच्छिन्नावच्छेदकतानन्निरूपि
तप्रतियोगितासंबंधावच्छिन्नावच्छेदकतावच्छेदकत्वसंसर्गेण परोक्षज्ञानत्वावच्छिन्नप्रति वह्नित्वभेद
स्य हेतुत्वोपगमात् न निर्वह्निर्वह्निमानित्याद्यनुमित्यापत्तिः वह्नित्वावच्छिन्नप्रकारतानिरूपितविशेष्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ता॰तु तावच्छेदकताघटस्या सत्या तदवच्छेदकत्वघटस्या सत्यावतादृशज्ञानं प्रतिवह्न्यभावभेदस्य वह्निभेदस्य वा हेतु
त्वे पृथगभावत्वादिना वह्न्यभावं विशेष्यतावच्छेदकीकृत्य वा वह्निमत्ताज्ञानानुदयप्रसंगः इति तदुपेक्षितं वह्नि
त्वावच्छिन्नत्वं वा किंचिद्धर्मानवच्छिन्नवह्नित्वमात्रावच्छेदकताकत्वं एवं प्रतियोगितासंसर्गावच्छिन्नवच्छेदकनि
ष्ठावच्छेदकतावच्छेदकत्वमपि निरवच्छिन्नं ग्राह्यं तेन तज्ज्ञानविशेष्यत्वादिना वह्नित्वादिकं विषविषयी॰
कृत्य ज्ञानविशेषचवदभाववान् वह्निमान् वह्न्यभाववान् ज्ञानविशेषवान् इति ज्ञानानुदयप्रसंगः परोक्षत्व ३०
निवेशान्नतादृशाहार्यप्रत्यक्षे व्यभिचारः एवं वह्निमान् निर्वह्निरिति तादृशज्ञानवारणाय वह्नित्वावच्छिन्न
प्रकारतानिरूपिताभावत्वावच्छिन्नप्रकारतानिरूपितविशेष्यतावच्छेदकतावच्छेद्याविधानुमितित्वस्य
लाघवतानजन्यतावच्छेदकत्वाभावात् घटाद्यवच्छिन्नो देशायतानिरूपिताऽभावरूपसाध्यविशेष्यवह्निप्र
कारकानुमितित्वादेरेवतथात्वात अथविशेष्यतावच्छेदकतावच्छेदकनिष्ठस्यासत्या हेतुत्वकल्पे विशेष्यता

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वच्छेदकमनिवेश्याभावव्याप्यवत्ताज्ञानत्वमेवजनकतावच्छेदकं वाच्यं तदवच्छिन्नसहकृतस्यलाघवज्ञान-
स्यैवफलव्याप्यत्वमभ्युपेयं ननुघटत्वावच्छिन्नविशेष्यतावच्छेदकताकाभावव्याप्यवत्ताज्ञानत्वावच्छिन्नसह
कृतस्यतद्रूपस्यजनकतानवच्छेदकत्वात् इच्छायंवह्निमानभावव्याप्यवान् इत्यादिज्ञानमात्रसहकृता
तलाघवज्ञानादभावंशेवह्निप्रकारिकानुमितिर्भवति तेन तादृशाकार्यकारणभावकल्पनमावश्यकं
तत्कल्पनेचपरस्परसामानाधिकरण्यापन्नकारणतामान्तिक्ययावह्नित्वभेदघटितायाविषयनि
ष्ठप्रत्यासत्त्याकार्योत्पादकसमग्र्याएवतादृशलाघवज्ञानसहकारित्वोपगमात्प्रकृतस्थलेचकार
णतावच्छेदकीभूतविषयनिष्ठप्रत्यासत्त्यावह्नित्वभेदेनसहसामानाधिकरण्यापन्नभावव्याप्यवत्ताप
रामर्शाभावेनापत्त्यभावादितिचेन्नहितादृशगुरुतरप्रत्यासत्त्याकार्यकारणभावकल्पनापेक्षयालाघ
वात्घटत्वादिवृत्तिविषयतासंबंधेनज्ञानत्वप्रतिघटत्वादिनातादात्म्यसंबंधेनहेतुत्वमेवकल्पतां॰तथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सत्वभावस्य वह्नितियोगित्वे लघवमित्यादिज्ञानेन फलज्ञने घटत्वादिरूपविषये कार्यत्वादिकार्यावह्नित्व
भेदस्येव घटत्वादिघटितसामग्र्याएव सहकारित्वोपगमात् प्रकृतस्थले च तदभावे नैवायत्रिवारणसंभा
वात् अतीतादिविषयकानुमित्यादौ च तत्वादिनीहेतुत्वासंभावेपि तत्र तद्वृत्तिविषयतासंबंधेन ज्ञानत्वे
नहेतुतयैवोपपत्तेः नच पठत्वपठत्वादिभेदेनानंतकार्यकारणभावकल्पनापेक्षया वह्नित्वभेदस्यैकहे
तुत्वकल्पनमेवोचितमित्याशंकनीयं भवन्मतेप्यभावादिविषयकानुमितौ घटत्वत्वादिभेदस्यैव हेतुता ३१
या अवश्यकल्पनीयतया विशेष्यतावच्छेदकसमसंख्यकार्यकारणभावकल्पनस्यावश्यकतया साम्य
त् घटत्वादिवृत्तिविषयतासंबंधेनानुमितौ तादात्म्येन घटत्वादीनां विषयतया तत्वज्ञानस्य हेतुत्वस्याव
श्यकत्वमेपि थ्यवस्यापि तंविशेष्यतावच्छेदकतापृत्नासन्निधिवारेस्माभिः एवं वह्निभावव्याप्यवान् व
ह्निमानित्याकारकअनाहार्यविशिष्टबुद्धिवारणडकारेपि चिंतनीयः करादीनां स्यात्पत्वाद्यभावव्याप्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वग्रहेमुखकरादिकं विशिष्य तावच्छेदकीभूतस्यापि स्यारूपत्व विशिष्टबुध्यनुदयान्न घ्राणायकरात्वाद्यव
च्छिन्नविशेष्यतावच्छेदकताकस्यारूपत्वाविशिष्टबुद्धिंप्रति करणाद्यवच्छिन्नविशेष्यताकस्यारूपत्वाद्यभा
वव्याप्तिनिर्णायकत्वेन प्रतिबंधकतापि वोध्या अथ बाधादीनां केन संबंधेन प्रतिबंधकत्वं न तावत्समवाये
न विशिष्टबुद्धिं प्रति समवायेनात्मनिष्ठविशेषगुणानामव्याप्यवृत्तितया बाधकालेपि तदनवच्छेदकाव
च्छेदेन तदभावसत्वात् विशिष्टबुद्ध्यापत्तेः निरवच्छिन्नविशेषणतासंबंधेन तदभावहेतुत्वं पुनरसंता
संभवदुक्तिकमेव बाधध्वंसकालेपि तत्कालावच्छिन्नविशेषणतयैव बाधाभावस्य वृत्तेः देशानवच्छिन्न
विशेषणतासंबंधेन तद्धेतुत्वान्न दोष इत्यपि ना बाधध्वंसकालावच्छिन्नविशेषणताया अपि शरीराद्यवच्छि
न्नत्वात् इदानीमेतच्छरीरावच्छेदेनात्मनि बाधबुद्धिर्नास्तीति प्रत्ययात् देशत्वस्य निर्वक्तुमशक्यत्वं नन
याकालभिन्नत्वेन शरीरादेरपि जन्यतया कालत्वात् न च कालनिरूपितावच्छेदकताविलक्षणावच्छेदकता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

याएवनिवेशान्नदोषइतिवाच्यं तादृशवैलक्षण्यस्यनिर्वक्तुमशक्यत्वात् एवंकायव्यूहस्थलेएकशरीरावच्छेदे
नबाधबुद्धिसत्वेदेशानवच्छिन्नविशेषणतयाबाधाभावस्यतदात्मन्यसत्वात् अन्यशरीरावच्छेदेनापिविशि
ष्टबुध्युत्पत्तिप्रसंगः नाप्यवच्छेदकतासंबंधेनविशिष्टबुद्धिंप्रतिअवच्छेदकतासंबंधेनबाधबुद्धीनांप्रति
बंधकतापरपुरप्रवेशस्थलेएकात्मनितच्छरीरावच्छेदेनबाधबुध्यादिसत्वेप्यात्मनितच्छरीरावच्छेदेन
विशिष्टबुध्याव्यभिचारात् एवंयत्रमहाशरीर तादृशशरीरेबाधबुद्धिःअनंतरखंडशरीरोत्पत्तिस्तदनंतरंखंड ३२
शरीरावच्छेदेनविशिष्टबुध्यापत्तिःखंडशरीरेअवच्छेदकतासंबंधेनबाधाभावसत्वात् नचतदानींकथंबाधबुद्धि
रुत्पद्यतेशरीरस्यकार्यसहभावनज्ञानहेतुत्वात्तदानींचशरीरविरहादितिवाच्यं अंत्यावयवित्वमनिवेश्य
शरीरतदवयवनप्युगादिसाधारणचेष्टावत्वेनैवज्ञानादिहेतुतायादीधितिकारेणक्रियग्रंथेस्वीकारात्तदा
नींशरीरावयवावच्छेदेनैवज्ञानोत्पत्तौबाधकाभावात् नचखंडशरीरस्यापितादृशबाधबुद्ध्यवच्छेदक

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वाभ्युपगमान्न स दोष इति वाच्यं तथा सत्यवच्छेदकतासंबंधेन तदधिकरणीभूतखंडशरीरे तदव्यव-
हितपूर्वक्षणे तदव्यवहितपूर्वक्षणो कारणासत्वमेव व्यभिचारः खंडशरीरस्य च महाशरीरनाशोत्पत्तिका-
लोत्पत्तिकबाधवुद्ध्यवच्छेदकत्वेपि उत्पत्तिक्षणावच्छेदेन तस्य तदनधिकरणत्वान्न व्यभिचार इति वाच्यं.
एवमपि यत्र खंडशरीरोत्पत्तिकाल एव बाधवुद्धिरुत्पन्नो तत्र खंडशरीरस्य तदवच्छेदकताभ्युपगमे व्यभि-
चारस्य तस्य तदनभ्युपगमे यमेवं तदनंतरं विशिष्टवुद्ध्यापत्ते ईर्वारत्वात् अथ खंडशरीरसमयोत्पत्तिकत्तान
स्य खंडशरीरावच्छेद्यत्वेपि तादृशज्ञानानामव्यवहितपूर्वक्षणावच्छेदेन तत्र कारणतावच्छेदकीभूततादा-
त्म्यसंबंधावच्छिन्नप्रतियोगिताकभेदरूपकरणाभावस्याप्यसत्वान्न व्यभिचारः कार्याव्यवहितपूर्वक्ष-
णावच्छिन्नकार्याधिकरणवृत्तिकभावप्रतियोगितावच्छेदकत्वस्य कारणतावच्छेदकत्वे व्यभिचारप-
दार्थत्वादिति चैन्नास्तु व्यभिचारस्तथापि खंडशरीरस्य तादृशज्ञानाव्यवहितपूर्वक्षणावच्छेदेनावच्छेद-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कत्वानि यामकसामग्र्यनधिकरणत्वान्न दवच्छेदकत्वमनुपपन्नमेव तादृशसामग्र्यनधिकरणक्षणावच्छे
दकत्वोपगमे सर्वव्रतनियामकसामग्रीकल्पनवैयर्थ्यापत्तेः यत्तु विशेष्यतावच्छेदकतासंबंधेन विशि
ष्टबुद्धिं प्रति विशेष्यतावच्छेदकतासंबंधेन बाधबुद्धेः प्रतिबंधकता तत्तत्पुरुषीयत्वस्याप्यवच्छेदक
कोटिनिवेशो बोध्यः अन्यथा एकपुरुषीयबाधबुद्धिदशायां अन्यपुरुषीयविशिष्टबुद्ध्यनुदयापत्तेः एत
त्कल्पे च विशेष्यतावच्छेदकानिवेशात्तत्तद्भेदेन प्रतिबध्यबंधकभाववाकुल्यं ॥ अत एव पुरुषभेदेन प्र प्रति ३३
तिबंधकतावाहुल्यमप्यकिंचित्करं विशेष्यतावच्छेदकापेक्षया पुरुषाणामल्पतरत्वादिति तदप्यस
त् तदर्थसत्यतीतानागतरूपाद्यवच्छिन्नविशेष्यकविशिष्टबुद्धेर्विशेष्यतावच्छेदकतासंबंधेन ताद
शरूपाद्यवच्छेदप्रसंगात् तत्र कार्याव्यवहितपूर्वक्षणावच्छेदेन बाधाभावघटितसामग्रीसत्वात् नयत
त्राव्यवहितपूर्वक्षणावच्छेदेन बाधबुद्ध्यभावात्तत्क्षणावच्छेदेन तदभावसत्वेन बाधकाभाव इति वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

च्यं। तन्नक्षणावच्छेद्याधिकरणांतादृशरूपाद्यसंबद्धतयातादृशरूपादिनिष्ठबाधाभावादिकारणतानवच्छे
दकत्वात् नचैवंज्ञानेच्छादीनांसमानमविशिष्यत्वप्रत्यासत्त्याहेतुत्वकल्पेतादृशानुपपत्तिरितिवाच्यं॥
तत्रावच्छेदकत्वमनंतर्भाव्यैवतल्लक्षणवृत्तित्वानादिघटितसामग्र्यधिकरणंतत्तद्व्यवहितोत्तरक्ष
णवृत्तीच्छाधिकरणमित्येतादृशसामग्रीव्याप्तेरेवाभ्युपगमात् अनुपपत्त्यभावात् नचैवमापितादृशमेव
सामग्रीव्याप्तिरूपगंतव्येतिवाच्यं तथासतितद्धर्मावच्छिन्नविशेष्यकविशिष्टबुद्ध्यापत्तेः अत्यंताभावस्य
सत्त्वात् नतयातादृशबाधबुद्धिक्षणेपि नदत्यंताभावस्य वृत्तेः तत्क्षणवृत्तिबाधाभावघटितसामग्र्यास्ता
दृशरूपादौसत्त्वात् नचनिरवच्छिन्नविशिष्यतावच्छेदकताकस्थलएवविशेष्यतावच्छेदकताप्रत्याद
शरूपादौसत्त्वात् नचनिरवच्छिन्नविशेष्यतावच्छेदकताकस्थलएवविशेष्यतावच्छेदकताप्रत्यासत्ति
रवच्छिन्नरूपादिविशेष्यतावच्छेदकस्थलेयद्रूपत्वादिनिष्ठविशेष्यतावच्छेदकतावच्छेदकत्वमेव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बा·बु

प्रत्यासत्तिरतौनानुपपत्तिरिति वाच्यं ॥ एवमप्यतीतरूपाद्यात्मकतानापन्नस्य रूपस्यो विशेष्यतावच्छेदिकातत्ति
ष्ठाया विशेष्यतावच्छेदकताया एव प्रत्यासत्तित्वसंभवेनोक्तानुपपत्तितावस्थ्यादिति मैवं समवाये न विशिष्टबु
द्धिं प्रति समवायेन बाधविशिष्टत्वादिना प्रतिबंधकता बाधविशिष्टत्वं च सामानाधिकरण्यसंबंधेन बाधकाले
अस्यावच्छेदेन तदभावसत्वेपि सामानाधिकरण्यसंबंधेन तदभावविशिष्टस्याप्यवृत्तेरपि संभवान्न तन्नाद्वि
शिष्टाभाव इतिनानुपपत्तिः कायव्यूहस्थले च अन्यशरीरावच्छेदेन तत्रात्मनि नाधादिसत्वे अन्यशरीरावच्छे ३८
देनापि न तद्विशिष्टबुद्धिरूपेयतेन तुल्यादेष्प्रमाणाबहात्तादृशफलस्य प्रामाणिकत्वे तु अनापत्याचैवादिश
रीरावच्छिन्नत्वकाधादौ विशिष्टबुद्धौ च विशेषणं देयं ॥ ॥ इति बाधरहस्यं ॥ ॥ ॥ ॥

नं॰ ४३०४ बाधरहस्यम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अनुमानस्यप्रमाणान्तरत्व[illegible]

विचारः। लेः गदाधरः। नं० ४३०६

श्रीगणेशायनमः॥ ॥लिंगपरामर्शानंतरंविलक्षणानुमित्यात्मकप्रमित्युदयात्तत्करणतयातस्यप्रमाणान्तरतास्यएववानुमा
नुमानमित्यभिधीयते।अथवह्निव्याप्यधूमवान्पर्वतइत्याकारपरामर्शानंतरंसंशयात्मकविशेषदर्शनमूलकपर्वतोवह्निव्यानित्याद्याकार
कप्रत्यक्षनिर्णयादेववह्न्यादिगोचरशब्दसाधुपपत्तेरनुमित्यात्मकविलक्षणप्रमितिरेवासिद्धातोलिंगज्ञानस्यप्रमाणान्तरतानयुक्तं
ह्न्यादिसन्निकर्षविनातद्गोचरप्रत्यक्षासंभवात्प्रत्यक्षविषयतायाःसन्निकर्षाधीनत्वव्याप्यत्वात्।अनुमित्यात्मकप्रमित्यंतरस्वीकार
आवश्यकइतिवाच्यं।परामर्शघटितानुमितिसामग्रीकालेसाध्यादिमात्रकज्ञानसन्निकर्षस्यावश्यकत्वात्।नचइतरथापक्षीभूताभा
वप्रतियोगिपृथिवीत्ववतिपृथिवीइत्याकारकाप्रसिद्धसाध्यकपरामर्शदशायांइतरभेदादिरूपसाध्यभासकज्ञानानैयत्यात्तादृशप
रामर्शानंतरप्रमित्यंतरस्वीकारआवश्यकइतिवाच्यं।तादृशपरामर्शदशायामितरभेदादिविषयकज्ञानानैयत्येऽपितत्तुल्यमितरत्वादिसामान
धर्मज्ञानावश्यंभावात्।सामान्यलक्षणसन्निकर्षादेवइतरभेदादिगोचरप्रत्यक्षसंभवादितिचेन्न।अस्तिहिअनुमिनोमीत्याकारकलिंग
परामर्शानन्तरोत्पन्नप्रमितिविषयकसर्वजनीनानुव्यवसायसाक्षिकोऽनुपहितोऽनुमितित्वाख्यजातिविशेषः।तस्यचोक्तकारणतं

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पात्वानुमानस्य प्रमाणांतरत्वमप्याहुस्तमेव अथ तत्साध्येऽपि तद्व्यंजकोऽपि विधेयतारूप: साध्यादिनिष्ठविषयताविशेषोऽवश्यमुपगंतव्य:
पराभावात् तद्बहिर्भावस्य वैतो घटवानित्याकारकानुमित्यनंतरं वह्निमनुमिनोमीत्याकारकोऽनुव्यवसाय: एवं चोक्तानुव्यवसायस्य तादृ
शविषयताविशेषविषयकत्वेनैवोपपत्तौ जातिविशेषावलंबनत्वमेवास्त्विति चेत् मानुमानादृशानुव्यवसायादनुमितित्वरूपजा
तिविशेषसिद्धिस्तथापि तादृशविषयताविशेषनियामकतया लिंगपरामर्शादिहेतुतायामावश्यकत्वानस्य प्रमाणांतरतानिस्तारे
ववक्तुमनुमानत्वाद्व्यवसायस्य जातिविशेषावलंबनत्वोपगमस्यावश्यक: अन्यथा विधेयतारूपविषयताया आपत्त्यात्मकप्रय
भशाद्देवाधादि साधारणतया तदनंतरमपि तथाविधानुव्यवसायापत्ते: न चानुमितौ आपत्तिप्रत्यक्षादिव्यावृत्तोऽपि विधेयताविशे
ष: प्रामाणिक: न चापत्त्यादिसाधारणविषयताविशेषस्यापि प्रसक्ततया अनुमितित्वव्यंजकतासंभवेन तत्र व्याप्त्यादिविधेयताविशे रा॰म: १
शेषोऽनुमितित्वमंगीकर्तव्य: अवश्यमंगीकर्तव्य इति वाच्यं व्यंजकानि प्रसक्तेरदोषत्वात् आपत्त्यादिसाधारणविषयताया एवानु
मितित्वव्यंजकतासंभवात् आपत्यादेर्व्यंजकसत्त्वेऽपि अनुमितित्वरूपविषयतासत्त्वेनैव तादृशानुव्यवसायापादनासंभवादिति। परामर्श

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

र्शजन्यत्वं जन्यतासंबंधेन परामर्शवत्त्वमेव वा तादृशानुव्यवसायविषयः इति नापत्तिः शाब्दबोधानंतरं न तथाविधानुव्यवसायापत्ति
रित्यतनमनुमितित्वजातेरिति तदपि न अथ्यैवं अनुमितित्वजात्यभावे परामर्शानंतरं जायमानोत्पत्तिशाब्दबोधादिव्यावृत्तानुगतजन्यतावच्छेदक
स्यैवानिर्वक्तुमशक्यत्वात् अव्यवहितोत्तरत्वसंबंधेन परामर्शवत्त्वादेस्तत्साधारण्यात् जन्यतावच्छेदकस्य तत्साधारण्ये कार्यक्षतिरि
ति चेन्न तथा सति जन्यतावच्छेदकस्य जन्यत्वानतिप्रसंगसंपादकतया जन्यताया अपि तत्रावश्यं स्वीकरणीयतया तदनंतरं तादृशाव्य
वसायापत्तिः तदवस्थैव तस्मादनुमितित्वजातिस्तदवच्छिन्नकारणतया लिंगज्ञानस्य प्रमाणांतरता च सिद्ध्यैव। अत्र वद
न्ति। चाक्षुषत्वादिवदनुमितित्वमपि प्रत्यक्षत्वव्याप्यजातिरेव ननु तद्विरुद्धं तथा च तदवच्छिन्नकारणस्य न प्रमाणांतरता प्रत्य
क्षप्रमाणेऽन्तर्भावात्। ननु अनुमितौ प्रत्यक्षत्वसत्त्वे मानाभावः अनुमित्यनंतरं प्रत्यक्षत्वजात्यवलंबिनः साक्षात्करोमीत्यनुव्यव
सायविरहात्। अनुमानस्य चानुकूलतर्कविरहेणाप्रयोजकत्वादिति कुतो अनुमितित्वस्य प्रत्यक्षत्वव्याप्यजातिता। यत्तु अनुमितित्व
स्य प्रत्यक्षत्वविरुद्धत्वे अनुमितिसामग्रीकाले ज्ञानसन्निकर्षादिघटितसामग्रीबलात् उभयोत्पत्तिवारणाय प्रत्यक्षसामग्र्यामनुमितिसाम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ग्रा प्रतिबंधकतावच्छेदकत्वनमावश्यकं अनुमितित्वस्य प्रत्यक्षत्वव्याप्यत्वे वनतानीमनुमित्यात्मकप्रत्यक्षस्यैवोत्पादेन तादृशप्रतिवध्यप्रति
वंधकभावेन स्यप्नेश्यैतादृशात्मापवरूपानुव्याप्तलनर्कसत्वादनुमानमेवानुमितौ प्रत्यक्षसाधकप्रमाणमिति। न च विचारसहकृतधाहि
अनुमितित्वस्य प्रत्यक्षत्वव्याप्यत्वेपि चाक्षुषत्वादिहृतद्वरूपवाच्यं अनुमितिसामग्रीकाले विशेष्ये लौकिकसन्निकर्षादिघटितचा
क्षुषादिसामग्र्या अनावश्यकत्वात् चाक्षुषत्वादिव्याप्यत्वासंभवात् व्यापकतायांश्च [illegible] पराहतत्वात् व्याप्यव्यापकभावविरहेसं
कामयेन सामानाधिकरण्यासंभवात् एवं चानुमितिसामग्रीकाले चाक्षुषादिकारणाय तत्र न स्याः प्रतिबंधकत्वमुभयवादिसिद्धमेव प्रत्यक्ष
तावच्छिन्नं प्रति न प्रतिबंधकत्वं कल्पनं तु न कस्यापि। विशेषप्रतिबध्यप्रतिबंधकभावेनैवोपपत्तेः एवं च किमकल्पनप्र[illegible]कंता पवंसा राम:
प्यमते। अथानुमितित्वस्य चाक्षुषत्वादिना व्याप्यव्यापकभावानुपपत्तावपि मानसत्वव्याप्यत्वमनुपपद्यते एवं अनुमितिसामग्रीकाले ना २
नप्रत्यासत्तिघटितायामानससामग्र्या आवश्यकत्वादिति मानसत्वावच्छिन्नं प्रत्यनुमितिसामग्र्याः प्रतिबंधकत्वाकल्पनप्रयुक्तलाघव
मनुन्नमेव न च पर्वतो वह्निव्याप्यवानित्येतादृशपरामर्शजन्यानुमितौ पर्वतादिविषयताया अनुभवविरुद्धत्वाघटादिमानसे वह्न्यनुमिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सामग्र्याविरोधित्वमुभयवादिसिद्धमेव वह्न्यादिमानसेन तस्याविरोधित्वान्तरं विरुद्धमतेऽपि नास्ति मानसस्थलीयप्रतिबध्यप्रतिबंधक
भावे विषयमनिवेश्य सर्वसाधारणमानसमात्रस्य प्रतिबध्यतावच्छेदकत्वोपगमान्न ननु एवोपगमेऽपि तिनलाघवावकाशः इति वाच्यं
घटमानसं जायतामितीच्छाकाले ... नां विधिरयोगे जकत्वानुरोधात् मानसत्वादेरप्रतिबध्यतावच्छेदकतायामावश्यकत्वात्,
घटादिमानसस्थलीयप्रतिबंधकतया वह्निमानसादिवारणाय संभवेन न तत्र प्रतिबंधकत्वान्तरस्यावश्यकत्वादिति चेन्न भिन्नवि
षयकचाक्षुषादिसामग्रीकाले मानससामग्र्या अभावादनुमितिसामग्र्याश्च सत्त्वेऽपि सत्त्वादनुमितित्वस्य मानसत्वव्याप्यतयाऽप्य
नुपपत्तेः तादृशचाक्षुषादिसामग्रीकाले मानससामग्र्या असत्त्वं च मानसं प्रति तादृशसामग्र्याः प्रतिबंधकत्वे तस्याभावरूपकारणासत्त्वेन
न च मानसत्वावच्छिन्नं प्रति तादृशसामग्र्याः प्रतिबंधकत्वमेवासिद्धमिति वाच्यं तादृशप्रतिबंधकत्वाकल्पने भिन्नविषयकचाक्षुषादि
मादकाले अनुमित्यमानसापत्तेः न चैवमनुमित्यन्यमानसत्वेनैव तन्न प्रतिबध्यतावच्छेदकत्वमुपगम्यते तन्मते तादृशीं मानससामान्यं सा
मग्री अथ मे वेति वाच्यं अनुमित्यविरोधिनीनां नैमित्तिकअनुमित्यन्यमानसत्वस्य तादृशसामग्रीतात्कालिकत्वावच्छेदकत्वेन कल्पनादनुमितिसुखा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दकालेऽनुमित्सामानसत्वावच्छिन्नवारणाय तदवच्छिन्नं प्रति अनुमितिसामग्र्याः प्रतिबंधकतया अप्यावश्यकतया उपदर्शितत्वाय
वासंभवात् यत्तु प्रत्यक्षसामग्रीनां प्रतिबध्यतावच्छेदककोटौ अनुमित्सान्यत्वस्याधिकस्यानिवेशे महागौरवात्। ४ अनुमितित्वस्य मानसत्वव्या
प्यमतेऽनुमितिमानसोभयविरोधिनीनां समानविषयकलौकिकप्रत्यक्षशाब्दबोधादिसामग्रीणां प्रतिबध्यतावच्छेदकमुभयसाधा
रणं मानसमेकं। विरुद्धमते च अनुमितित्वं मानसत्वं च द्वयमप्यनुमितित्वव्याप्यमते लाघवमस्तु त्वमेवेति। तदपि न अनुमितित्वप्र
कारकेच्छामानसत्वप्रकारकेच्छयोः पृथक् पृथगुत्तेजकत्वानुरोधेन व्याप्यमतेऽपि प्रतिबध्यप्रतिबंधकताद्वयस्यावश्यकत्वात्। तादृ
शेच्छाभाववदुभयमेकमनिवेश्य एकमात्रप्रतिबंधकतायां लघुनेऽनुमितित्वप्रकारकेच्छाकाले समग्र्यां चानुमितिसामग्र्यां सत्यां चोक्तविरोधि
सामग्र्यामनुमित्यन्यमानसतापत्तेः अनुमित्सायां चानुमितिसामग्रीविशिष्टाया उत्तेजकत्वे महागौरवात् परंतु व्याप्यमते मानसत्वप्रकारके राम: ३
च्छाविरहविशिष्टतादृशसामग्र्याभावस्य जन्यतावच्छेदकं अनुमित्यन्यमानसत्वं वा मानसत्वमात्रमप्यतया अनुमितित्वप्रकारकेच्छाधी
नानुमितौ व्यभिचारादिति विपरीतमेव गौरवं। अथ सर्वत्रैवानुमित्यन्यमानसे ज्ञानादिमानमावश्यकं उपनायकज्ञानादेर्मानसप

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

र्शमावच्छेदकत्वात् विषयतात्वेन च ज्ञानादिमानसेऽधिकानपेक्षणात् इत्थं च निखिलमेवानुमित्यंश्ये वह्न्यादिमानसज्ञानाद्यंशेऽपि विषयिता संबंधे
न वह्न्यादिविशेषणकं भविष्यतीति ज्ञानादिलौकिकविषयितानिरूपितवह्न्यादिविषयताशालिमानसत्वावच्छिन्नं प्रति तादृशविष
यिताप्रकारकमानसेच्छाविरहविशिष्टविरोधिसामग्री प्रतिबंधकं न येवोपपन्नो ज्ञानादिलौकिकविषयतासंनिवेशपर्यंतो वह्निमानि
त्यादिमानसे विरोधिसामग्र्याः प्रतिबंधकत्वमेव नाधिकोदशा प्रतिबध्यतावच्छेदककोटावनुमित्यत्वनिवेशाधिकं प्रतिबध्यप्रतिबंध
कभावे ज्ञानादिलौकिकविषयितायां निवेशादिवानुमितौ व्यभिचाराभावात् न च वह्न्यादिमानसत्वावच्छिन्नं प्रति वह्न्यादिविषयत्वप्रकारक
मानसे मानसेच्छाविरहविशिष्टविरोधिसामग्रीत्वादिना प्रतिबंधकत्वकल्पनेनाप्युपपन्ने ज्ञानादिलौकिकविषयतानिवेशोपदर्शितप्र
तिबध्यप्रतिबंधकभावस्यासिद्धिरिति वाच्यं। इच्छालौकिकविषयितानिरूपितवह्निविषयताशालिमानसं जायतामितीदृशेच्छाका
ले तादृशविषयताशालिमानससामग्र्यसत्वे सत्यां च विरोधिसामग्र्यां वह्निमहं जानामीत्येतादृशमानसवारणाय विशेषणस्योपदर्शितेच्छा
ऽभावे ज्ञानादिलौकिकविषयतायां च प्रतिबध्यतावच्छेदककोटौ निवेशप्रतिबंधकतावच्छेदकस्यावश्यकत्वात् ज्ञानानंतरं वह्निमहं जानामि। ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

याकारकविषयतासंबंधावच्छिन्नप्रतियोगिताकवह्न्याद्यभाववति ह्रदे बाधबुद्ध्यादिदशायां विषयितायाज्ञानांशे वह्न्यादिभानासंभवात्त
त्रैव ज्ञानादिलौकिकविषयितानिरूपितवह्न्यादेरभावेन ज्ञानीयलौकिकविषयितानिरूपितवह्न्यभावादिविषयिताशालित्वरूप× द्वैविष
यिताभ्युपगमानसंप्रसिद्धमिति तदनुरोधेन कल्पनीयप्रतिबध्यप्रतिबंधकभावे एवानुमित्यन्यत्वनिवेशाधिक्यमित्यपि नाशंकनीयं यमस्त
ज्ञानांशे वह्निभानासंभवेपि वह्न्यभावादिभानेबाध×तौ दशायां वह्न्यभावादिविषयिताप्रकारकमानसेच्छाविरहविशिष्टविरोधिसामग्रीं प्रति
बध्यतावच्छेदककोटौ तन्नया ज्ञानादिलौकिकविषयितां अनिवेश्य प्रतिबध्यप्रतिबंधकभावांतरकल्पनं विनैवोपपत्तेः। यत्तु वह्निविषयिताशा
लिमानसं जायतामित्येतादृशेच्छाकाले विरोधिसामग्रीसत्त्वे ज्ञानाद्यविषयकस्य वह्न्यादिमानसस्य प्रसिद्धिः अत्र ज्ञानादिलौकिकविषयि
तानिरूपितवह्न्यादिविषयिताप्रकारकमानसे - विरहेण ज्ञानादिभानासंभवात् इति तदर्पितं तथाहि तादृशेच्छानां ज्ञानादिलौकिकविष
यितानिरूपितत्वावच्छिन्नवह्न्यादिविषयित्वप्रकारतामके-च्छात्वेन वोत्तेजकतां ज्ञानीयलौकिकविषयितानिरूपितवह्निविषयिताशाली
च्छा हन्ति लौकिकविषयितानिरूपितवह्निविषयितावन्मानसं जायतामित्येतादृशेच्छायां आवश्यकत्वात् किंतु ज्ञानेतरलौकिकविषयि

रामः
४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नानिरूपितत्वावच्छिन्नविषयित्वप्रकारत्वानिरूपितवच्छिन्नविषयित्वप्रकारतानिरूपितमानसत्वनिष्ठविशेष्यताकेच्छानेनतत्त्वावच्छिन्नविष
यकमानसंज्ञायतामितिनाद्दोषेच्छासाधारणमपीतितद्वलादपिज्ञानादिमानसंभवकृतियत्नाद्यउत्पन्नंतरंचिनरूपद्रव्यस्यसन्निकर्षा
नवच्छ्यादिनिर्विकल्पकंतन्मूलकवच्छ्युपनीतभानेज्ञानादिभानासंभवः योग्यज्ञानादीनांप्रागसत्वात्तन्निर्विकल्पानोंद्रियत्वादितित
दपिनतदानीमुपनीतभानस्याप्रामाणिकत्वात्तन्न वनिर्विकल्पकस्यउपनायकत्वमतेउपनायकस्यानघटितसामग्र्युत्तरभानमि॰
तिवाच्यज्ञानाद्यविषयकमानसानुपगमेज्ञानादिभासकसामग्र्याअपितत्सामग्रीघटकतयातदभावेनसामग्र्याएवासिद्धेः वस्तुतस्तुत
त्रवच्छ्युपनीतभानोपगमेक्षतिविरहः तथाहितत्रविशेष्यतावच्छेदकप्रकारकज्ञानादिविरहेतान्निष्ठधर्मितावच्छेदकमेववच्छ्यादिमा
नसंभविष्यतितन्नस्यलौकिकप्रत्यक्षप्रतिबंधकभावेचनिष्ठधर्मितावच्छेदकत्वंप्रतिबध्यतावच्छेदककोटौवक्ष्यनिवेशनीयं। अन्यथा
पर्वतत्वावच्छिन्नविशेष्यकमानसंज्ञायतामितियाकारकेच्छाधीमानसस्यापिवारणात्। नाद्दोषेच्छासत्वेपर्वतत्वावच्छिन्नविशेष्यकता
नजनकीभूतपर्वतत्वादिप्रकारकज्ञानासत्वेविरोधिसामग्रीदशायांनिष्ठधर्मितावच्छेदकवच्छ्यादिमानसवारणायनिष्ठधर्मितावच्छे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दककमानसस्यत्लीयप्रतिबंधकतायां तादृशेच्छाया मूलमहत्पेरीवृश्च्छायाउत्तेजकत्वस्योपगंतव्यत्वात् तथा चानुमितौ धर्मितावच्छेदकमानस्या
वश्यकतया व्यभिचाराभावेन तदनुरोधानानुमित्यन्यत्वनिवेशनं सधर्मितावच्छेदकमानसे च ज्ञानादिमानस्यावश्यकतया न च ज्ञाना
दिलौकिकविषयितामनिवेश्य प्रतिबध्यप्रतिबंधकभावकल्पनमेव नास्तीति वेदस्मेतादृशाशायां अनुमित्यन्यत्वनिवेशप्रयुक्तगौरवा
परिहारस्तथापि मानसत्वव्याप्यमतं निर्युक्तिकमेव लाघवविरहात् अनुमितिकाले ज्ञानादिलौकिकविषयताशालित्वस्यादिमानसवार
णाय तादृशमानसेऽनुमितिसामग्रीप्रतिबंधकताया उभयवादिसिद्धत्वात्। ज्ञानादिलौकिकविषयतामनिवेश्य विरुद्धवादिनापि सामग्र्यं ताद्य ५
तराकल्पनात् तन्मतेऽपि ज्ञानादिविषयकमानसानुपगमे क्षतिविरहात् यत्र च समानविषयकलौकिकप्रत्यक्षसामग्रीकाले अनु राम:
मित्सावत्तादृशानुमितिः कदापि न जाता न चानुमित्साया उत्तेजकत्वाभावादनुमितिमानससाधारणज्ञानादिविषयकमानसत्वस्य प्रतिबध्यताव- ५
च्छेदकीभूततादृशसामग्र्याः एकप्रतिबंधकतयैवोपपत्तिर्व्याप्यमते विरुद्धमते तु अनुमितित्वमानसत्वयोः प्रतिबध्यतावच्छेदकतया प्र
तिबंधकताद्वयमिति व्याप्यमते लाघवं चाधिकमेवेति तदप्यनादेयमेव विरुद्धमतेऽपि विषयविशेषे लाघवसंभवात् तथाहि यादृश

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विषये समानविषयकचाक्षुषादिसामग्रीकाले अनुमित्सया मानसं न जातं अनुमितिरेव तत्र विरोधिसामग्र्याः प्रतिबध्यतावच्छेदकं व्याप्य
मतेऽनुमितित्वं मानसत्वं वेत्यत्र विनिगमनाविरहात् प्रतिबंधकताद्वयं विरुद्धमतेऽनुमानसमये स्यानुमित्सासंग्रहः कृतन्यायानुमितित्वमेक
मेव प्रतिबध्यतावच्छेदकमिति लाघवमिति चेन्न तन्न अनुमित्सया निवेशेन च गौरवपरीहारेऽप्यशक्यः तथाहि विरोधिसामग्रीकाले
पर्वतविषयितानिरूपितवह्निविषयिताशालिमानसं जायतामित्याकारकेच्छासत्त्वे वह्नेः पर्वतस्य च विषयकलितज्ञानसत्त्वे ज्ञानांशे वह्नि
विशेषणकं मानसं न भवति तादृशमानसस्थलीयविरोधिसामग्रीप्रतिबध्यतावच्छेदकतादिच्छाया आह तद्रूपेणोपेक्षायां तज्ज्ञानत्वस्यापगत
त्वात् अन्यथा तादृशेच्छाकाले पर्वतभासकतां ज्ञानांशसत्त्वे वह्निज्ञानानीयेन तादृशमानसस्य विरोधिसामग्रीदशायामापत्तेः नापि ज्ञा
नांशे वह्निविशिष्टपर्वतांशवैशिष्ट्यावगाहिप्रत्यक्षमानसं तत्र संभवति तत्र वह्निमान् पर्वत इत्येतादृशविशेषणतावच्छेदकप्रकारक
निर्णयस्यापेक्षितत्वात् केवलं विशेष्ये विशेषणमिति रीत्या वह्निमान् पर्वतं ज्ञानामीत्येतादृशबोधस्य ज्ञानांशीकरणे शक्यते विषयांशे वि
शिष्टवैशिष्ट्यानवगाहिज्ञानादिप्रत्यक्षस्यानभ्युपगमात् एवं तत्र वह्न्यविशिष्टपर्वतविशेषणकज्ञानमानसमपि न संभवति ताद

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शमानसत्त्वलीयविरोधिसामग्रीप्रतिबंधकतायामप्युपदर्शिते व्याप्यत्वेजनकत्वात् तथात्वे विरोधिसामग्रीदशायां तादृशे व्यासत्वे
वह्निभासकत्वज्ञानाद्यसत्वे पर्वतज्ञानामीत्यादिमानसप्रसंगात् तस्मात्तत्र कथंचित्स्पिज्ञानभानासंभवात् पर्वतो वह्निमानित्याद्याकार
कज्ञानाद्यविषयकमेवमानसं तन्द्रतरोधे न ज्ञानादिविषयतामनिवेश्य सामग्र्याः प्रतिबंधकत्वांतरं चोपगंतव्यमिति न चैवानुमित्यन्यत्वनि
वेशनमावश्यकं व्याप्यमते अन्यथा अनुमितौ व्यभिचारात्। अत्रोच्यते। अनुमितित्वस्य मानसत्वव्याप्यत्वे भिन्नविषयकचाक्षुषादिसामग्रीं
प्रतिबंधतावच्छेदककोटौ अनुमित्यन्यत्वनिवेशाधिक्यात् प्रकारांतरेणोत्पत्त्यसंभवाच्चानुमितित्वं मानसत्वविरुद्धमेवातोऽप्रत्यक्षत्वव्या
प्यत्वं तु न स्यान्निराबाधं सयुक्तिकं च न तथा हि अनुमितेरप्रत्यक्षत्वोपगमे अनुमितौ विशेषणतावच्छेदकप्रकारकज्ञानादीनां स्वातंत्र्येण रामः
हेतुता न कल्प्यते। प्रत्यक्षस्थलीयतज्जन्यतावच्छेदकस्य विशिष्टवैशिष्ट्यावगाहिप्रत्यक्षत्वस्यानुमितावपि सत्त्वात् तत्तत्स्थलीयहेतुतैवोप ६
पत्तेः। विरुद्धमते तत्र हेतुत्वांतरकल्पनमावश्यकं न च प्रत्यक्षानुमितिसाधारणस्य विशिष्टवैशिष्ट्यानुभवस्यैव तज्जन्यतावच्छेदकत्वो
पगमाद्विरुद्धमतेऽप्येकहेतुतयैवोपपत्तिरिति वाच्यं प्रत्यक्षत्वादतिरिक्तायामनुभवत्वजातेर्मानाभावात्। विशिष्टवैशिष्ट्यावगाहिज्ञान

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वस्य च तथात्वं न संभवति तथाविधस्मरणे व्यभिचारात् यदि च विशेष्ये विशेषणमिति न्यायेनैव प्रथमं स्मृतिरूपस्य यनेश्त्यमुपगम्यते तथापि नित्यसाधारणतया विशिष्टवैशिष्ट्यावगाहिज्ञानत्वादीनां जन्यतावच्छेदकत्वसंभवः। न च विशिष्टवैशिष्ट्यप्रत्यक्षस्य तथात्वे एव दोष इति वाच्यं मन्मते प्रत्यक्षावान्तरजन्यप्रत्यक्षवृत्तिजातिविशेषस्य तथा चोपगमात्। अथैवं रज्ञाने विशिष्टवैशिष्ट्यस्य विषयतानस्पृगमान्नित्यपायान्नासैव जन्यतावच्छेदिकेत्यभ्युपेयते। एवमपि जातिविशेषापेक्षया तादृशविषयतायाः नवच्छेदकगौरवं गुरुतरमेव विशिष्टवैशिष्ट्यावगाहिप्रत्यक्षव्यभिचारवारणाय तादृशविषयताया जन्यतावच्छेदककोटिप्रवेशः सर्वमत एवावश्यक इति न शङ्कनीयं यत आत्मनिष्ठप्रत्यासन्निकर्षे विषयभेदेन कारणताकल्पनात् प्रकारतान्यविषयनिष्ठप्रत्यासत्त्यैव विशेषणतावच्छेदकप्रकारकज्ञानहेतुता आदरणीया तत्र च प्रकारत्वावच्छेदकतायाः एव कार्यतावच्छेदकप्रत्यासन्नतया उपगन्तव्यत्वात्। निरवच्छिन्नप्रकारताकस्य विशिष्टवैशिष्ट्यावगाहिज्ञानस्य च प्रकारतावच्छेदकतासंबंधेनानुत्पत्त्या व्यभिचारो न संभवतीति इति तादृशविषयताऽविशेषितस्यैव जातिविशेषस्य जन्यतावच्छेदकत्वं संभवतीति अथास्तु विजातीयप्रत्यक्षत्वमेव विशेषणतावच्छेदक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रकारकज्ञानादिजन्यतावच्छेदकं तथाप्यनुमितौ विशेषणतावच्छेदकप्रकारकज्ञानहेतुत्वांतरं न कल्प्यते वह्नित्वादिविशिष्टवैशिष्ट्या
वगाहिन्याः पर्वतो वह्निमानित्याद्यनुमितेर्वह्नित्वादिप्रकारकज्ञानजन्यकाले परामर्शविरहेण बाधत्वसंभवात् परामर्शदशायां वह्नि
त्वादिप्रकारकज्ञानस्यावश्यकत्वादिति चेन्मास्तु पर्वतो वह्निमानित्याद्यनुमितौ वह्नित्वादिप्रकारकज्ञानस्य हेतुत्वांतरं पृथिवी इतरभेद
वतीत्याद्यनुमितौ त्वितरभेदत्वादिप्रकारकज्ञानस्य तु तथात्वकल्पनमावश्यकं अन्यथा इतरव्यावर्तकीभूताभावज्ञातियोगिपृथिवी
त्ववतीपृथिवीत्यादौ परामर्शात्तस्मात्तेनैतिरभेदत्वप्रकारकोपस्थितिदशायामिव तत्स्य कालेपि पृथिवीतरभेदवतीत्याकार
कानुमित्यापत्तेः तस्मादनुमितित्वस्य प्रत्यक्षत्वविरुद्धत्वेन येनानुमितौ विशेषणतावच्छेदकप्रकारकज्ञानहेतुताधिकारमिति
व्याप्यमते लाघवमस्तु तामेव त्वस्तु न तु अनुमितित्वस्य मानसत्वव्याप्यत्वेपि बाधकाभावात् मानसप्रत्यनुमितिसामग्रीप्रतिबंधकत्वा राम: ७
कल्पनप्रयुक्तलाघवमपि संभवति तथाहि अनुमितित्वस्य मानसत्वव्याप्यत्वे भिन्नविषयत्वादुत्वादिसामग्रीप्रति बध्य
तावच्छेदककोटौ वमिमन्यत्वप्रयुक्तगौरवमुपदर्शितं न देवं न यत्नो न सिविलनुमित्यप्यमानसेष्वजान्यत्वभानमपेयमेवं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

च मानसत्वस्य ते लौकिकविषयितासंबंधेनात्मनि वह्निवैशिष्ट्यते। अनुमितौ च आत्मत्वनिरूपितलौकिकविषयिताभावेन न व्यभिचार
इति विनैवानुमित्यत्वनिवेशमुपपत्तिः अथ विरोधिसामग्रीदशायां पर्वतविषयतानिरूपितवह्निविषयताशालिमानसं जायता
मितीच्छासत्त्वे वह्नेः पर्वतस्य च विशकलितज्ञानसत्त्वे पूर्वं दर्शितरीत्या ज्ञानादिमानासंभवात् आत्ममानमिति न संभवति तत्र स्य विशेष्य
ताविनिर्मोकेनाभानात् तथा चात्र आत्मत्वविषयताशून्यक्षस्यात्मत्वविषयत्वनियमात् तादृशस्थले आत्मत्वाविषयकमेव मान
सं भविष्यतीति न दर्शनग्राहकतया च न विरोधिसामग्रीप्रतिबध्यतावच्छेदकत्वमात्मत्वस्योपपद्यते इति चेत् न मानसत्वस्यैव वि
रोधिसामग्रीप्रतिबंधकतायामिच्छायाउत्तेजकत्वेन संभवमेव ज्ञानादीनामानंतदेव नष्टच्छायाउत्तेजकत्वे विषयभेदेन प्रतिबध्य
प्रतिबंधकभावानंतत्स्यात्। किंतु विषयितानिविषयत्वोभयसंबंधेनेच्छावदन्यत्वमेव रच्छाधीनमानसे व्यभिचारवारणायक
तोयो वच्छेदककोटौ निवेश्यते भवति हि घट मानसं जायतामितीच्छाधीनघटादिनिखिलमानसं तादृशोभयसंबंधेन तत्
थाविधेच्छायातत्तथाविधमानसाव्यवहिते पूर्वक्षणे तादृशेच्छासत्त्वनियमतः सत्त्वात् निखिलतथाविधयानतेषु तादृशेच्छाया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अपिभानेबाधकाभावेनतद्विषयितायास्तद्विषयतायाः तत्रसत्वात्विषयतानिवेशात् यदभिमानसेच्छाविषयकयदभिमानसत्त्वना-
संग्रहः निखिलानामेवमानसानांविषयतासंबंधेनकालान्तरीनेच्छावत्त्वयाविषयतासंबंधेनइच्छावदन्यमानसताप्रसिद्धिवतोवि
षयितायत्वेशः एवंचोपदर्शितस्यलौयपर्यन्तोवह्निमानित्याद्यभिमानसेवह्नीयत्वादिनातानादिभानेबाधकाभावः तथासत्यपितत्रोप
दर्शितोभयसंबंधेनेच्छावत्त्वस्याजननयाविरोधिसामग्र्यभावहेतुतायांव्यभिचाराप्रसिद्धेरितिनचोपदर्शितोभयसंबंधेनइ
च्छादमनस्यकार्यतावच्छेदकत्वेइच्छांविनापिविरोधिसामग्रीकालेमानसत्वरूपसामान्यधर्मावच्छिन्नापत्तिः। इच्छाकालीन
फलस्यविरोधिसामग्र्यभावजन्यतावच्छेदकानाक्रान्ततयातदुत्पादप्रयोजकसामग्र्याःइच्छाभ्यकालेपिअसत्वादितिवाच्यं राम: ८
इच्छाधीनमानसस्येच्छाविषयकतयातज्ञाविषयविषयाइच्छायाअपिहेतुतायाःकल्पनतयातदुत्पादप्रयोजिकयाइच्छायाश्च
कालेसत्वात् अथप्रत्यक्षंप्रतिविषयस्यविषयत्वेनैवहेतुत्वं नतु इच्छात्वादिना एवंचेच्छात्वावच्छिन्नस्यासत्वेपिविषय
त्वरूपकारणतावच्छेदकावच्छिन्नस्यसत्वात्इच्छाभ्यकालेपिमानससामग्र्यस्त्येव अस्तुवेच्छाप्रत्यक्षत्वावच्छिन्नंप्रतिइ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

च्छात्वादिना हेतुत्वं कॢप्तं तथापि चाक्षुषादिगोचरेच्छाकाले परामृश्यमानसेच्छाकाले वा परामर्शादिज्ञानासत्त्वे च परामृश्यमानसापत्ति-
दुर्वारैव। इच्छात्वावच्छिन्नं प्रत्यनन्तरसत्त्वेन स्थितसामग्र्याः प्रत्यक्षत्वादिति चेन्न। मानसस्य हेतुतया तच्छायत्नि पत्तिवारणं परमानसेच्छावि-
षयकप्रत्यक्षत्वावच्छिन्नं प्रति परमानसेच्छात्वादिना हेतुतां कल्पयित्वैव वारयिष्यामः। न चैवं विषयभेदेनेच्छायां सामग्र्यभावस्य च हेतुत्वान्नर-
स्य कल्पनापत्तिरिति तेन रूपेण यावद्विषयभेदेन स्वानिरूपितविशिष्टसामग्र्यभावहेतुत्वकल्पनमेवोचितमिति वाच्यं। इच्छायाः उत्तेजकत्वे अनन्तसामग्र्यभा-
वानां विषयभेदेन हेतुतापत्तेः। तदपेक्षया इच्छाया एव विषयभेदेन हेतुतायाः सामग्र्यभावानां च निखिलमानससाधारणेन हेतुतायाः कल्प-
नस्योचितत्वात्। यत्र इच्छादीनां विषयीभूतधाने नैव मानससंभवात् इच्छांशे विशेषणतया विषयमानसे प्रतिबन्धकबाधादिदशायां विषयस्यान-
थामानासंभवेनेच्छामानमपि न संभवतीति न व्यभिचारो। इच्छावदन्यत्वस्य कार्यतावच्छेदककोटौ निवेशकल्पो न साधीयानिति। तदसत्। निर्द्ध-
र्मितावच्छेदकज्ञानस्य बाधत्वेन प्रतिबध्यतया तादृशबाधकालेऽपि विषयांशे निर्द्धर्मितावच्छेदककेच्छामानवे बाधकाभावात्। तथा चेच्छाव-
दन्यत्वस्य कार्यतावच्छेदके न बाधकाभावादुपदर्शितस्थले ज्ञानादीनां मानवे बाधकाभावात् अवश्यं वाच्यत्वस्य विरोधिसामग्र्यभावजन्यतावत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

च्छेदककोटिप्रवेशनं अथ कामिनीजिज्ञासाकालीनकामिनीमानसे आत्मभानं न संभवति कामिनीभिन्नज्ञाने कामिनीजिज्ञासाया विरोधि
त्वात् अतस्तत्संग्राहकतया आत्मत्वस्य विरोधिसामग्र्यभावजन्यतावच्छेदकत्वं न संभवति । न च तादृशमानसस्य विरोधिसामग्र्यभावजन्यता
वच्छेदकावच्छिन्नत्वेऽपि क्षतिविरहः न त्वेच्छायाहेतुत्वेनेच्छां विना विरोधिसामग्रीकाले तदापत्त्यभावादिति वाच्यं । इच्छाविषयकप्रत्यक्षे
वेच्छाया हेतुत्वेन तत्त्वानुसरणात् इच्छाया अपि मानासंभवेन तत्रेच्छाया अन्यथात्वादिति चेत् न । कामिनीजिज्ञासायां कामिभिन्नविषयक
ज्ञानत्वेन प्रतिबध्यतावच्छेदकं कामिनीमेतादृशज्ञानस्यापि कामिनीभिन्नकामिनीत्वतत्संबंधादिविषयकतया तादृशज्ञानस्यापि कामि
नीजिज्ञासादशायां अनुदयप्रसंगात् रूपविशिष्टकामिनीज्ञानं जायतामित्येतादृशेच्छाकाले रूपवतीकामिनीमेतादृशज्ञानानुदयप्र रामः
संगाच्च किंतु कामिनीविषयित्वाभाववद्वृत्तिविषयितांच तज्ज्ञानत्वमेव तथा साक्षात्परंपरया कामिनीविषयितानिरूपिताया विषयिता ९
या च न कामिनीविषयितात्वाभाववद्वृत्तिः अतः कामिनीरूपादिविषयिताया अन्यथात्वान्न तादृशज्ञानानुपपत्तिः । इत्थं च कामिनीजिज्ञासा
काले कामिनीमहं जानामीत्याकारका कामिनीविषयित्वाभाववद्वृत्तिआत्मत्वादिविषयताशालिनो मानसस्य बाधकाभावः । आत्मत्वादेः प्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गउपस्थितौ कामिनीमहं जानामीत्याकारकज्ञानं न संभवति विशिष्टवैशिष्ट्यविशेषणधियो हेतुत्वात्. एवं तु न तदात्मत्वांशे निर्विकल्पकमेव
मानसमनुव्यवसीयते न तत्र कामिनी(विषयित्वाभावो) जिज्ञासाप्रतिबध्यमेवं आत्मत्वनिरूपितानिर्विकल्पकीयविषयिताया कामित्वविषयकज्ञान
साधारण्यमिति तु नाशंकनीयं आत्मत्वविशिष्टवैशिष्ट्यविशेषणज्ञानहेतुत्वे मानाभावात् प्रथममतएवोक्तविशिष्टबुद्धिसंभवात्. कामिनीवि
षयित्वाभाववत्त्वेन विवक्षितायाः कामिनीजिज्ञासाप्रतिबध्यतावच्छेदकत्वे कामिनीजिज्ञासादशायां अनेरैरौवरूपविशिष्टकामिनीज्ञा
नं जायतां इत्याद्याकारिके च्छां रूपवतीकामिनीमिति ज्ञानायेच्छेः तथाविधज्ञानरूपविशिष्टबुद्धिपनीतभानं उनराप्रमाणिकमेवेति न तद्
ग्राहकतया आत्मत्वस्याविरोधिसमग्रीप्रतिबध्यतो) कामिनीजिज्ञानं जायतामित्याद्याकारकेच्छाविरहविशिष्टकामिनीजिज्ञासानादिना
प्रतिबंधकात्मत्वांतरकल्पनोपायवादिसमाधेयेवेति सूक्ष्मनं तरं विनश्यदवस्थसन्निकर्षजन्यच्चाक्षुषनिर्विकल्पकात् उपनीतभान
प्रनरप्रमाणिकमेवेति न तद्ग्राहकतया आत्मत्वस्याविरोधिसमयीप्रतिबध्यतावच्छेदकत्वमुपपद्यते इति फक्किकायानावकाशः त्या
तु अनुमितस्य नित्यविलक्षणमानसे आत्मत्वस्यैव ज्ञानत्वस्यापि भानसंभवात् लौकिकविषयतासंबंधेनात्मत्वज्ञानत्वं वाविरोधिसामग्री

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रतिबध्यतावच्छेदकं रसत्वविनिगमनाविरह इति । तदपि न । कृतिसाक्षात्कारपूर्वं नियमतो ज्ञानासत्वात् । तज्ज्ञानत्वाविषयकस्यापि
कृतिमानसे संभवात् । तदसंग्राहकतया ज्ञानत्वस्य तथात्वासंभवात् । न च कृतिसाक्षात्कारस्याविषयांशेनुपनीतभानात्मकस्य उपनायक
भानसत्वाद्याः आवश्यकत्वात्त्रिविधमानसेप्येव ज्ञानत्वभानं संभवतीति वाच्यं । इच्छाकृत्योरुद्भवनायकत्वोपगमात् विनैवोपनायक
ज्ञानं उपनीतभानसंभवात् विवेचितं चेदमधिकमग्रत्रे । एवं विशिष्टवैशिष्ट्यबोधं प्रति इच्छात्वकृतित्वसाधारणविशेषणतावच्छेद
कप्रकारकत्वेन संस्कारव्यावृत्तविजातीयगुणत्वेन वा हेतुत्वात् कृतिमानसस्य विशिष्टवैशिष्ट्यबोधरूपत्वेपि न नियमतो विशेषणता
तावच्छेदकप्रकारकज्ञानापेक्षा । अस्तु वा कृतिमानसस्य नियमेन ज्ञानविषयकत्वं तथापि सुखादिमानसे न तन्नियमः । पूर्वं
नियमतो ज्ञानसत्वासाधनाभावात् इति न किंचिदेतत् । अन्यथा कृतौ ऐच्छिकत्वेनाख्यातेनानुमितिप्रयत्ननिवेशप्रयुक्तगौरवपरिहारः । तथापि राम: १०
व्याप्यमनेन लाघवासंभवः । क्वचिदनुमित्यादिकालेपि घटादिमानसवारणाय अनुमितिसामग्र्या मानसं प्रति प्रतिबंधकत्वकल्पनाया अनु
यादिसिद्धत्वात् तन्निरूपितविषयकविषयकस्थलीयप्रतिबंधककल्पने तल्लाघवमिति सिद्धान्तोपकृतेयत्नः । स्वयमेव मानसेपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ज्ञानानिरूपकत्वेन

रोधिसामग्र्याः प्रतिबध्यप्रतिबंधकभावभेदाभावोपदर्शनं इति चेत् अनुमितिसामग्रीदशायां व्याप्यमतोऽभिन्नविषयकमपि मानसमुप
पगम्यते तावता क्षतिविरहात्. एवं च मानससंप्रति अनुमितिसामग्र्याः प्रतिबंधकताकल्पनप्रयुक्तलाघववशादेव न च व्याप्या
नुमितिसामग्रीदशायाउदासीनघटादिमानसोपगमे तदुत्तरं घटं जानामीत्याकारकानुव्यवसायापत्तिरिति वाच्यं. अनुमि
तिवृत्तिविषयतासंबंधेन तादृशानुव्यवसायं प्रतिविधेयोद्देश्यादिविधयाघटादिविषयतायाः विधेयतानिरूपकत्वानानिरू
पितघटादिविषयतात्वेनानुगमय्य [illegible] तादृशविषयतायाः व्यवसायस्य तादात्म्यप्रत्यासत्त्या हेतुत्वोपगमात् तादृशानुमितेश्च
तथाविधघटादिविषयतानिरूपकत्वाभावेन च विषयतया तादृशानुव्यवसायापत्त्यसंभवात्. अनुमितिवृत्तिविषयतया अनुमितिभिन्नज्ञाने
ष्वनुव्यवसायस्यापत्तेः न च सामान्यविषयतया संबंधेन तथाविधानुव्यवसायापत्तिः उर्वरैवेति न नाशंकनीयं यतोऽनुमितिभिन्नवृ
त्तिविषयतासंबंधेनानुव्यवसायं प्रति अनुमितिमदेव हेतुत्वं न स्वीक्रियते. एवं चानुमितिवृत्तिविषयतानन्यवृत्तिविषयताः व्यत
रसंबंधेनानुव्यवसायोत्पादकसामग्री सहकारिणो व सामान्यविषयतासंबंधेन कार्योत्पादकसामग्र्याः कार्यतावच्छेदकं प्रयोजकं मात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रसक्ते चानुमितौ नाशान्यतरसंबंधेन कार्ये सादकसामग्र्याः असत्वं नापत्तिरिति· अथाखिलमानसे चाक्षुषमानसंभवे मानस
त्वजातिरेव प्रामाणिकी न तु यथापादनीयप्रयोजनस्यात्मत्वेनैवोपयादृष्टिपि नु शक्यत्वात्· एवं च मानसत्वावछिन्नं प्रतिविरोधिसामग्र्याः प्र
तिबंधकत्वकल्पनं विलक्षणवादिमतेपि नास्ति चेत्तत्राप्यनुमानसत्वजातेः प्रामाणिकता· एवमप्यानुमानत्वे प्रतिबध्यतावछेदकीकृत्य मा
नसस्थले प्रतिबंधकताकल्पनमावश्यकमेव अन्यथा यादृशसामग्रीसत्वात् असत्यामनुमितिसामग्र्यां घटमहं जानामीति नादृशप्र
त्यक्षस्य वह्निनमनुपपद्येतेनादृशसामग्र्याः सत्यामपि अनुमितिसामग्र्यां तत्तयादृशवह्निज्ञानायानेरनुमितित्वापत्तेरपि वारयितुमशक्य
त्वादिति· विलक्षणमते ज्ञानादिलौकिकप्रत्यक्षे प्रतिकालेन दृष्टुमिष्यायत्त्वारणायनवनादृशलौकिकप्रत्यक्षसामग्र्याः प्रतिबंधकत्वक
ल्पनमधिकं ध्याप्यमतेन तदानीमनुमिनोमीति स्वीकारेभ्यास्ति विरह इति न तत्कल्पनमिति लाघवं· न च तदानीमनुमिनोमीति स्वीकारे मदनंन ११
रंशानमनुमिनोमीत्याकारकानुव्यवसायापत्तिरिति वाच्यं तादृशानुव्यवसायं प्रति ज्ञानादिनिरूपितालौकिकविषयतायाः प्रति
बंधकत्वोपगमादित्यपि केचित्· अत्र केचित् मानसादिकं प्रति अनुमितिसामग्र्याः प्रतिबंधकतानकल्पनं नाधिकमित्यविषयकवस्तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वह्न्यादिस्थलीयप्रतिबंधकतयैवोपपत्तेः तथाहि सामग्रीप्रतिबंधकतायां चेदिच्छाया उत्तेजकत्वं स्वीक्रियते तदैव चाक्षुषत्वादिप्रकारके-
च्छानाविशिष्टायामुत्तेजकत्वात् गौरवात् चाक्षुषत्वादीनां विशिष्य प्रतिबध्यतावच्छेदकत्वमापद्येतेति चाक्षुषत्वादिस्थलीयप्रतिबंधकत-
यानोपपत्तिः स्यात् न त्वेवं तत्र इच्छायास्तत्रोत्तेजकत्वस्वीकारस्य निष्प्रयोजकत्वात् न हि इच्छाया उत्तेजकत्वानभ्युपगमे अनुमित्यादिसामग्री-
काले चाक्षुषे इच्छासत्त्वेऽपि चाक्षुषापत्तिरिति शंक्येत यतः सामग्र्याः स्वाभावादिविशिष्टवैशिष्ट्यपरामर्शत्वादिना न प्रतिबंधकतां
अपि तु स्वाव्यवहितपूर्वक्षणावच्छिन्नत्वसंबंधेनानुमित्यादिमत्त्वेनैव एवं च चाक्षुषादिगोचरेच्छाविशिष्ट चाक्षुषादिसाम-
ग्रीत उत्तरक्षणे चानुमित्यनुदयात् स्वाव्यवहितपूर्वक्षणत्वसंबंधेनानुमितिमत्तावच्छिन्नं नास्तीति विनैवेच्छाया उत्तेजकत्वं तत्र
चाक्षुषाद्युपपत्तिः ॥ एवं च चाक्षुषादिस्थलीयप्रतिबंधकतायां सर्वसाधारण्यादनुमितित्वज्ञानत्वादेरेव प्रतिबध्यतावच्छेदक-
त्वं संभवतीति न परामर्शस्थले प्रतिबंधकत्वकल्पनायामाधिक्यमिति वदंति । तदन्ये न समञ्जसं इच्छाया अनुत्तेजकत्वे घटचाक्षुषे-
च्छाविशिष्टतत्सामग्रीदशायां व्याप्यानुमितिसामग्रीसत्त्वेऽनुमित्योरनुत्पादः चाक्षुषानुमित्योः परस्पराधीनतया अन्यो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्चयप्रसंगात् तथानुमित्युत्तरभिन्नविषयकानुमित्यादिकं प्रत्यपि इच्छाविरहविशिष्टचाक्षुषादिसामग्र्या आपि बाधकवादिमत्त्वेन प्रतिबंधक
ताया आ. एवं च प्रकृतस्थले चाक्षुषादिकमुत्पद्यत इति च नोद्ग्राह्यप्रतिबंधकता समवधाने नैवोत्पद्यतेऽनुमित्यादिकं । अतः तादृशसाधि
ध्याचाक्षुषाद्युत्पादाधीन एवं चाक्षुषाद्युत्पादे अनुमित्युत्पादाधीन एवेतिः अनुमित्युत्पादेच्छाः प्रतिबंधकत्वेन चाक्षुषोत्पादासंभवादिति.
इच्छायाश्चोत्तेजकत्वेवं तत्तदानीं चाक्षुषाद्युत्पादे नानुमित्युत्पादाधीनः तदुत्पत्तावपि इच्छारूपोत्तेजकसत्त्वेन चाक्षुषाद्युत्पादसंभव
श्यकत्वात् किंचित्कालाधीन एवेति नामिपानाश्रयपदसङ्गतिरिति इच्छायाश्चोत्तेजकत्वमावश्यकमेव वस्तुतो अनुमित्यादिमत्त्वेन प्रति
बंधकत्वमेवासंभवि किंतु अव्यवहितपूर्वक्षणावच्छिन्नत्वसंबंधेनानुमित्यादिमत्त्वः परामर्शादेरनुमित्युत्पत्तिक्षणे नाशादपि सत्वेन त
दुत्तरमनुमित्यनुव्यवसायानापत्तिः अथानुमितेस्तृतीयक्षणे अनुमित्यव्यवहितपूर्वक्षणावच्छिन्नत्वेन तद्घटितसंबंधेनानुमितिवि ल्म: १२
शिष्टस्यासत्वेन विशिष्टाभावः सुलभ एवेति नाशङ्कनीयमिति चेन्न तादृशसंबंधेनानुमितिविशिष्टं नहि पूर्वक्षणोपि न वृत्ते
तदानीं विशेषणीभूतायामनुमितेरसत्वादिति नाशङ्कनीयं विशिष्टाधिकरणत्वमेवासिद्धं . अव्यवहितोत्तरक्षणस्यानुमि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तिवत्त्वसंबंधेनप्रतिबंधकत्वमित्यस्यापि भरानवस्थानुगमस्य निर्वक्तुमशक्यतया ॥ नु मो देयमेवेत्यत्र ममसज्ञात्मनयेति । इयं पुनः
क्षिप्तानानुसारिणी सरणिः । कुत्रचिदपि विरोधिसामग्रीप्रतिबंधकतायां इच्छायाः तुत्तेजकत्वं नोपगम्यते इति यथाऽदिमेदेन प्रतिबंधकताभे
दापत्तेः किंतु इच्छाधीनज्ञाने व्यभिचारवारणाय स्वविषयत्वस्वकृतिकृतिमत्त्वस्वसमानाधिकरण्यैतत्त्रितयसंबंधेनेच्छावत्त्वं कार्य
तावच्छेदककोटौ निवेश्यते ॥ भवति च घटचाक्षुषं जायतामितिनादृशीच्छाधीनघटचाक्षुषादिकं तादृशत्रितयसंबंधेनेच्छाविशिष्टं ।
अतो न तत्र विरोधिसामग्र्यभावहेतुतायां व्यभिचारः स्पार्शनादिगोचरेच्छाव्यवहितोत्तरक्षणे तनिकस्य चाक्षुषादेः संग्रहाय संबंधम
ध्ये विषयताप्रवेशः इच्छानाशानंतरोत्पन्नज्ञानसंग्रहाय द्वितीयदलप्रवेशः ॥ कृतेः स्वकृतित्वे कृतिमत्त्वं च कालिकसंबंधेन इ दि १
च्छानाशोत्तरं जायमाने च न तादृशेच्छाहृत्तिकृतिमत्त्वं । कृतेर्द्वितीयक्षणमात्रावस्थायितया तदधिकरणक्षणोत्पादशक्तभावात् । ए
कक्षणावच्छेदेन च कालिकसंबंधेनाधाराधेयसंबंधसंभवात् । एकपुरुषीयचाक्षुषादिगोचरेच्छाव्यवहितोत्तरोत्पन्नतदन्यपुरुषां
तरीयचाक्षुषसंग्रहाय तृतीयदलप्रवेशः ॥ न च विरोधिसामग्रीकाले इच्छासत्त्वे यादृशसामग्रीबलात् चाक्षुषादिकमुत्पद्यते इच्छा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भ्रमकालेपि नाशसामग्रीवर्तितेपमाशंकनीयं· इच्छाकालीनचाक्षुषादेः स्वायाजनकत्वोपगमात्.। एवं च चाक्षुषादिस्थले अनु
मितिसामग्र्याः प्रतिबध्यतावच्छेदकं न चाक्षुषत्वादिकं अपि तु मानससाधारणानुमित्यसमानत्वमेवेति न मानसस्थलेपि स्म
नेपि अनुमितिसामग्रीप्रतिबंधकत्वकल्पनाधिक्यं· अथानुमितिसामग्र्याः चाक्षुषादिस्थलीयप्रतिबध्यतावच्छेदककोटौ भिन्न
विषयकत्वमवश्यं निवेशनीयं अन्यथा समानविषयकलौकिकचाक्षुषादौ व्यभिचारप्रसंगात्· एवं च मादृशप्रतिबंधकतायां अ
नुमितिसामग्रीकाले समानविषयकमानसं दुर्वारमिति चेत् न पिचाविषयकचाक्षुषादिस्थलीयप्रतिबंधकतया समानविष
यकमानसवारणासंभवेपि समानविषयकचाक्षुषाद्युपनीतभानानुरोधेनानुमितिसामग्र्यास्तत्प्रतिबंधकत्वं न स्वकल्पनमा
क्षपर्कत्वात्· तत्रैव लौकिकान्यप्रत्यक्षत्वस्य मानससाधारणस्य प्रतिबध्यतावच्छेदकत्वोपगमेन अनुमितिसामग्रीकालेना रामः
दृशमानसवारणासंभवात्· यथोक्तमनुमितित्वस्य प्रत्यक्षत्वविरुद्धत्वे अनुमितित्वस्यैव विशेष्यतावच्छेदकप्रकारकज्ञानस १३
कारणताधिकत्वमिति· तदप्यकिंचित्करं नियमसाधारणधर्मस्य कार्यतावच्छेदकत्वे व्याप्तिविरहेण ज्ञानत्वस्यैव तज्जन्यतावच्छेदक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वसंभवात्· प्रत्यक्षस्थली कार्यकारणभावेनैवोपपत्तेः वस्तुतस्तु अनुमितेर्विशेषणतावच्छेदकप्रकारकज्ञानजन्यतावच्छेदकानाक्रांत
त्वेपि न क्षति· इतरव्यापकीभूताभावप्रतियोगिपृथिवीत्ववती पृथिवीत्याकारकपरामर्शदशायां अन्वयव्याप्त्यवगाहिपरामर्शरूपकारण
विरहेण पृथिवीतरभेदवतीत्याकारकविशिष्टवैशिष्ट्यावगाह्यनुमितेरापादयितुमशक्यत्वात् न च तादृशपरामर्शं विनापि स्वातंत्र्येणेतर
भेदे त्वप्रकारकज्ञानदशायां व्यतिरेकिपरामर्शात् विशिष्टवैशिष्ट्यबोधात्मिकानुमितेरुत्पत्त्या तादृशपरामर्शविरहेपि किंचित्करत्वमिति वा
च्यं· तदानीं केवलं विशेष्ये विशेषणमिति रीत्या पृथिवी नरभेदवती त्याकारिकानुमितेरुपगमात्· एवं सति इतरभेदत्वप्रकारकज्ञा
नस्य कालेपि व्यतिरेकिपरामर्शात् पृथिवीतरभेदवती त्याकारिकायाः केवलं विशेष्ये विशेषणमिति न्यायेनानुमितेरुत्पत्ते रुक्त
स्थले एवं तथापि व्यानुमतेः प्रसंगात्· अनुमितिस्थले च विशेषणज्ञानस्यापि हेतुतया अक्लृप्तत्वात् न तद्विरहस्यापि किंचित्करत्वादित्यवे
यनेतरदानीमपि तादृशानुमितिः। अथैवं साध्यविशेष्यकानुमितिर्विलीनेति चेत् द्वितीयं मांभिंपानपचयः एवं च लाघवविरहात् अनु
मितित्वस्य प्रत्यक्षत्वव्याप्यत्वे साधकविरहः बाधाभावादिकार्यतावच्छेदकतया सिद्धेनानुमितिसाधारणापरोक्षजातिविशेषणप्रत्यक्ष

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वस्य संकररूपबाधकं जागरूकं संकरस्य परस्परव्यभिचारिणोः प्रत्यक्षत्वपरोक्षत्वयोः अनुमितौ समावेशः ॥ अनुमितित्वविशिष्टानुमिति
सामग्रीप्रतिबध्यतावच्छेदकतया सिद्धेनानुमितित्वमस्तु न तु जातिविशेषेण संकरप्रसंगात् परोक्षत्वजातिरेवाप्रामाणिकीति चेत्।
तर्हि स्वनुमितित्वमस्तु न तु तादृशजात्या संकरप्रसंगेनैवानुमितित्वस्य प्रत्यक्षत्वव्याप्यत्वानुपपत्तेः तथाहि तादृशजातिः शाब्दबोध
स्मरणादौ न तत्र च प्रत्यक्षत्वं तत्रानुमितौ तत्सत्त्वे तत्र न सा जातिः चाक्षुषादौ तूभयोः समावेश इति तस्मादनुमितेः प्रत्यक्षत्वविरुद्धत्वं ति
प्रत्यक्षमेवेति सिद्धमनुमानस्य पृथक्प्रमाणत्वमिति ॥ ॥ इत्यनुमानप्रमाणनिरूपणविचारः। ।श्री।

नं० ४३०६

राम
१४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विधिस्वरूपविचारः। ले० गदाधरः। नं० ४३०५

यजेते

विधिनिषेधार्थवादभेदेन वाक्यं त्रिविधं तत्र प्रवर्त्तकं वाक्यं विधिः ओदनकामः पचेत्स्वर्गकामो ज्ययेनेत्यादि
लौकिकालौकिकवाक्यानां प्रवर्त्तककर्त्तव्यताज्ञानजननेन प्रवर्त्तकत्वाद्विधित्वम् ॥ अथ तत्र इति मत्सु नित्या
र्थवादानामपि फलसाधनताबोधद्वारा प्रवर्त्तकतया तत्रातिप्रसंगः। न च कर्त्तव्यताबोधकवाक्यत्वं विधि
त्वं; तत्र नार्थवादानामिति वाच्यं पाकं कुर्वीत यागं कुर्वीतेत्यादिवाक्यासंग्रहात् न हि तत्र कृतिसाध्यत्वरू
पकर्त्तव्यत्वं प्रतीयते धात्वर्थकृतौ कृतिसाध्यत्वबाधेन लिङा तद्बोधनासंभवात् न च तत्र धातुना कृति
र्द्वितीयया च साध्यत्वरूपं कर्मत्वं प्रत्याय्यते इति कृतिसाध्यताबोधकत्वमनपवादमिति वाच्यं नाहं पाकं क
रोति यागं करोतीति वाक्यानामपि दर्शितरीत्या कृतिसाध्यताबोधकत्वेन तादृशार्थवादातिप्रसंगात् अत्र
२ विषयत्वरूपं कर्मत्वं न जन्यत्वरूपं प्रतीयते इति चेत् उच्यते तदा पाकं कुर्वीतेत्यादावपि विषयत्वमेव कर्मत्व
मित्यविशेषो दुर्वार एव वस्तुतः पाकानुपधायकतद्विषयकहृत्स्नतरकाले पाकं च करिष्यामीत्यादिप्रयोग

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

विरहात् कृतिसाध्यत्वमपि तत्कर्मताघटकमतो दुर्वारएवातिप्रसंगः । नचप्रवृत्तिजनककृतिसा
ध्यताधीजनकवाक्यत्वं न तत्पाकं करोतीतिवाक्यजन्यकृतिकर्मताबोधस्यापूर्वकर्तृकत्वान्नातिप्रसंगइतिवा
च्यम् । तादृशवाक्यजन्यज्ञानस्य कृतिसाध्यताविषयकत्वेप्रमाणान्तराधीनेष्टसाधनताज्ञानसहकारेणा
नस्यापूर्वकर्तृकतायादुर्वारत्वात् उच्यते ॥ इष्टसाधनताबोधकवाक्यं विधिः । पाकं कुर्यादित्यादिवाक्यं धात्व
र्थकृताविष्टसाधनताबोधकं पचेतेत्यादिवाक्यं च धात्वर्थपाकादौ नबोधकं सर्वत्र विधिप्रत्ययस्य इष्टसा १
धनताबोधकत्वात् । नच नकलंजं भक्षयेदित्यादिनिषेधे इतिव्याप्तिस्तस्यापि कलंजभक्षणाभावेनर्थका
नुत्पादकरूपेष्टसाधनताबोधकत्वादितिवाच्यं क्रियाविशेषणतयैव विधिप्रत्ययस्य इष्टसाधनताबोधक
त्वमुत्पन्नेः । निषेधस्थले च नञ्पदनिष्ठानुवंधी इष्टसाधनत्वाभावस्यैव क्रियायां बोधोपगमात् क्रियावि
शेषणीभूताभावविशेषणत्वेपि परंपरयैवेष्टसाधनत्वस्य क्रियाविशेषणत्वे न कुत्राप्यभंगात् ॥ अथैवम्

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पि अभावविशेषणतयेष्टसाधनताबोधकत्वमादाय वैदिके धातिप्रसंगो दुर्वारः॥ आश्रयतासंबंधेनेष्टसा
धनताप्रकारकबोधजनकत्वनिवेशेपि आश्रयतयातद्विशिष्टपाकादिबोधकतत्पादिपदघटितवाक्ये
तिप्रसंगः॥ धात्वर्थस्याप्यार्थे साक्षाद्विशेषणतयेष्टसाधनताबोधकत्वविवक्षणीयं पांडित्यकामो जन्मतिथा
वामिषं न भुंजीतेत्याद्यभावविधावव्याप्तिरिति चेन्न आश्रयतासंबंधेनं घटत्वयोपस्थापितेष्टसाधनत्वान्वित
स्वार्थपरपदघटितवाक्यत्वस्यविवक्षणीयत्वात्। जन्मतिथावामिषं न भुंजीतेत्यादावामिषभोजनाभा
वरूपेष्टसाधनमिति बोधे आश्रयतयैवाभावे प्रत्ययोपस्थापितेष्टसाधनतान्वयः। न कलंजं भक्षयेदित्या
दौ कलंजभक्षणं बलवदनिष्टाननुबंधीष्टसाधनत्वाभाववदित्यादि॥ बोधे चनाश्रयतयाऽनिष्टसाधनतान्व
यः। उक्तयुक्त्यान्निस्त्वप्रामाणिकीति भावः। न च क्रियाकार्य्यतामात्रस्य विधिप्रत्ययार्थतावादिमीमांसकमते
स्वर्गकामो यजेतेत्यादिः सकलविधीनामेतल्लक्षणे न संग्रहः। यतः इष्टसाधनताया विधित्वानभ्युपगमेपा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कं करोतीति वाक्यजन्यबोधाविशेषेणैकस्य प्रवर्त्तकतान्यस्येत्यनुपपन्नेस्तन्मतं विवादास्पदमेव ।अ तो मी-
मांसकमते पि कृतिसाध्यत्वमिष्टसाधनत्वं पृथग्विध्यर्थ एवं परं तु न्यायमतवन्मिलितं तदुभयं न विध्यर्थः ।
अतोऽहरहः संध्यामुपासीतेत्यादौ इष्टसाधनतानन्वयेन केवलकृतिसाध्यताबोधनिर्वाहः । अत एव वि-
शेषं भाविफलसाधनक्रियाविधायकवाक्ये न व्यापारगतस्वर्गादिफलसाधनताबोधनमपि तेषां पूर्वप-
क्षेऽन्विति च नमुत्पन्नरूपमः ।। न चैवमप्युक्तलक्षणे नाहरहरित्यादिनित्यविधौ नन्तन्मतेऽसंग्रह एवेति वाच्यं । २
इष्टसाधनत्वघटितसाध्याभावव्याप्यरिक्तप्रयोजकधर्मत्वेनानुगमय्य लक्षणेऽतिदेशनीयतया नित्यवि-
धिसंग्रहसंभवात् नित्यविधिस्थले लिङ्पदस्य द्विष्टसाधनाभाव[illegible]वाचकतामभ्युपेत्यैव तस्य प्रवर्त्तकत्व-
निर्वाहात् । न्यायमतेऽपि नित्यस्थलेऽपि सर्वत्रेष्टसाधनत्वमेव विध्यर्थः । संध्योपासनादेरपि दुरितलोकग-
मनादिसाधनतया अर्थवादेन बोधनात् नुतक्षयोऽपि प्रत्यवाया^द्यभावफलसाधनत्वमपि तन्नादि ध्यर्थः तत् ~~[illegible]~~

नुत्पादरूपफलसाधनताबोधनात् प्रवर्त्तन्ते । अतस्ता १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

साधनत्वं च क्षेमसाधारणं ॥ अथ स्वर्गकामो यजेतेत्यादिना स्वर्गादिसाधनत्वमेव प्रतीयते । ननु तात्पर्य
३ भ्रमादपि दृष्टांतरसाधनत्वमिति समभिव्याहृतपदोपस्थापितकामनाविषयतावच्छेदकावच्छिन्नसा
धनत्वं विधिप्रत्ययशक्तिः स्वीकार्या तथा च संध्यावंदनादिविधौ फलकामनावाचकपदाभावात्कथं फ
लसाधनताबोधः । यदि च विश्वजिता यजेतेत्यत्र च फलकामनावाचकपदं न चाप्यध्याह्रियते अर्थवा
दोपि विध्युत्थापितो विधिप्रत्ययस्य स्वोपस्थापितब्रह्मलोकावाप्त्यादिरूपेष्टविशेषतात्पर्यग्राहकं इति
तात्पर्यविषयफलोपपादकतत्तत्कामनावाचकपदाध्याहारं उपयुज्यते । अतो विधेरिष्टसाधनताबोधक
त्वमित्युच्यते । तदा ब्रह्मलोकावाप्त्यादिरूपभावफलकामबोधकपदमात्रसमभिव्याहारकल्पने मुमुक्षा
वशेन तत्फलकामनाभ्युदयस्यानधिकारापत्तेः । नरकाभावरूपफलकामबोधकपदमात्रसमभिव्याहा
रकल्पने च भावफलकामनया अधिकारत्वानुपपत्तिः । उभयकामसमभिव्याहारकल्पने च संवलिताधि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कारणस्यापि एकैकमात्रफलकामस्याधिकारो न स्यादिति न स्याकरणं प्रत्यवायं नानुबध्नीयात्· यदि चैकफलद
यकामनायां पृथक् पृथक् धर्मविशेषणतया बोधकमधिकारिपदं कल्प्यते, तदा वाक्यभेदापत्तिः। वाक्यार्थ
भेदात् यदि च नरकनिवृत्तिस्वर्गलोकाप्तिकाम इत्यादिपदमेव कल्प्यते अत्र च एकफलविशेष्यतापन्नका
मनायां मपरस्य एककामनाविशेष्यतापन्नधर्मिणि अपरकामनाया अन्वये तात्पर्यमुपेयते तेनोभय
कामएवाधिकारी स्यात्। अपि तु एकफलधर्मितावच्छेदकतापन्नकामनात्वावच्छिन्नेतरफलाविषयक ३
कामनासाधारण्येन फलांतरान्वये कामनात्वव्याप्यस्य स्वर्गादिरूपपरस्य धर्मितावच्छेदकतापन्न
धर्मावच्छिन्नेपरस्पराभावाश्रयसाधारण्येनान्वये तात्पर्यं एवं सति वाक्यभेदस्याप्यनवकाशः। विशेषण
द्वयनिरूपितविशेष्यतयोः अभेदस्यावच्छेद्यावच्छेदकभावस्य च विशेष्यभेदेनासंभवेपि तदुभयध
र्मितावच्छेदकतानिरूपविषयताया अभेदस्यावच्छेद्यावच्छेदकभावस्य वासत्वात्· अतएव सर्वेभ्यो द

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

र्शपौर्णमासादिस्तत्रप्रकृततयाचिसर्वेशाहोपस्थाप्यं पुत्रपश्वादिफलानां तत्तत्कामनानां च दर्शितरीत्या
पृथक्पृथगेव कामनाधिकारिरूपविशेष्यतयोरन्वयेऽपि न वाक्यभेदः न वा धवखदिरैश्छिन्नीत्यादौ
भिन्नभिन्नकर्मत्वस्य च्छिदादिविशेषणत्वेऽपि तथात्वात्तथा सति समासानुपपत्तेः॥ नचैवमपि कामनाया अ
धिकारिविशेषणत्वे कामनाशून्यशौचादिमतां संध्योपासनाद्यकरणे प्रत्यवायो न स्यादिति वाच्यं निंदा
र्थवादस्य कामनारूपाधिकाररहितसाधारणशौचादिमत एवाकरणे प्रत्यवाय इत्यत्र तात्पर्यात्॥
अत एव समर्थस्यास्तिकस्यांतरनुष्ठाने नैयत्यं॥ तादृशस्य प्रत्यवाये द्वेषेणां तत्परिजिहीर्षया तद्रूपकत्वा
त्॥ यस्य च प्रत्यवायेन वलवान्द्वेषोऽपि तु नांतरीयकश्रमाभावे वर्तेन तामनुष्ठीयत एव तत्तत्कर्म इत्युच्य
ते तदापि सहकृदनुष्ठितदर्शपौर्णमासादितः पुत्रपश्वादिरूपनानाफलानामिव नानादृशान्नत्संध्यावंद
नादिनित्यकर्मणोऽपि नरकनिहंत्रिब्रह्मलोकावाप्त्यादिरूपफलद्वयस्यापि सिद्धिप्रसंगः॥ तस्मान्नित्यावाक्ये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

फलस्य समुच्चयबोधकासत्वे वैकल्पिकमेव फलमिति योगसिद्ध्यधिकरणसिद्धान्तात् । न चैतादृशस्थलेऽभा
वरूपफलानामेवासमुच्चयः । ननु भावाभावफलयोरपीतिवाच्यं । बीजसाम्येनादिशेषात् । उभयत्रैव फला
नां यत्र एककामनायां युगपदन्ययरूपो योगो नास्ति तत्र मिलितफलकामनाया अनधिकारतया प्रत्ये
कफलकाम एवाधिकारी । नानाफलकामनया एकमनुष्ठानं न शास्त्रार्थ इत्येवहि उक्तसिद्धान्तबीजं त
भावाभावरूपसाधारण्यमपि न चैतत्र कामनात्वेन । कामनायां अधिकारतयासमूहालंबनकामनाव ४
तोऽविभिन्नकामनाद्वयवतो वाऽधिकारेऽव्याहत एव समूहालंबनादिरूपकामनायां प्रत्येकं तत्तत्
फलविषयत्वात्सन्तेरित्य सौसिद्धान्तोर्न प्रक्तिक एवेति वाच्यं शास्त्राणामवधारणापरताया औत्सर्गि
कतया असमुच्चित तत्तत्फलकामबोधकपदानां तत्फलमात्रकामपरतया समूहालंबनादिरूप
कामनावतोऽधिकारस्य युक्तत्वात् ॥ अतो यत्नेन नित्यकाम्यस्थलेऽनिषिद्धनिहत्त्रि संवलित तत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

फलकाम एवाधिकारी अतो जयंतीव्रतादितः स्वकृतानुष्ठितादपि प्रत्यवायपरिहारस्तत्फलं च सिद्ध्य
ति एवं संध्यावंदनादितोपि न चैवं प्रत्यवायपरिहारे हि कामात्रेणामुमुक्षूणां तत्तत्कर्मानुष्ठानानुपपत्ति
ति २ रनधिकारित्वादिर्वाच्यं। समुच्चितफलकामनाधिकारिककर्मण एकैकफलकामनासहकारेणापि
तत्तत्फलजनकत्वोपगमात्। अन्यथा काम्यादिमृतस्य नरकाद्यभावनिश्चयेन तन्नरकोद्धारादिका
मनारहितस्तत्पत्न्याः स्वतंत्रसहमरणस्य सकुलशिष्टसम्मतस्यानुपपत्तेः। व्यालग्राही यथा व्यालमित्या
दिवचनैः पत्युर्नरकोद्धारादिफलसहितस्य स्वर्गभोगस्य सहमरणफलत्वबोधानात्तत्कामनाशून्या
याः सहमरणानधिकारात्। अत एवैतन्महाराजविज्ञेय धर्मानित्यादिवाक्यबोधितमहत्तपः प्रभृत्य
नेकलोकभोगपूर्वकविष्णुलोकगमनादिफलकतडागयागादिकमपि केवलविष्णुलोकगमनादि
फलकामनयाऽनुष्ठीयते यदि च तादृशाचारबलात्प्रत्येकफलकामकर्तृत्वमताबोधकश्रुतिरपि त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ ॥

त्रकल्प्यते इत्युच्यते. तथा च कृतेपि तादृशश्रुत्यंतरमाचारं वशात् पेयं ननु भयकामनयापि शिष्टानां सहकृदनुष्ठा
नात्तत्सगुणित फलकामकर्म्म व्यत्वबोधकमपि कल्प्यं तत् श्रुत्यंतरविरहस्य तुल्यत्वादित्यलं विस्तरेण ॥ अथ
स्य क्षेमसाधारणता धनत्वं विध्यर्थः तत्र नकलंजं भक्षयेदित्यादिनिषेधस्य लोके कलंजभक्षणे न तत्त् कृत्यावा
प्रतियोगितयान्वितेऽभावे न रकनिवृत्तिरूपेष्टसाधनत्वस्यान्वयः किमिति नोपेयते बलवदनिष्टाननुबं
धित्वविशिष्टेष्टसाधनत्वस्य परथक्शक्त्याबलवदनिष्टसाधनत्वमात्रस्य वा विध्यर्थस्य क्रियायामभावबोध ५
पत्य कत्वोपगमे चानुत्पन्नत्वरस्य कल्पनीयत्वयागो रवात् न च र्थाभावे इष्टसाधनताबोधकत्व व्युत्पत्तेरभावविधि
स्थले भवतोप्यावश्यकत्वात् । न चैवमभावविधिवन्निषेधोपि अभावे प्रवर्त्तक एव स्यात् तत्प्रतियोगिनो
वरनिवृत्ति प्रयोजकः प्रतियोगिनिष्ठेष्टसाधनत्वावबोधतादृशिकाअंप्रतियोगिनो द्विष्टसाधनतां विना तदभा
वस्येष्टसाधनत्वानुपपत्त्या अन्तरकालं तत्कल्पनयापि प्रतियोगिनो वरनिवृत्तेर्वा हात् ॥ न च विधिविति नि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बोधयोरविशेषः॥ भावरूपेष्टसाधनतायां विधिस्थले निषेधस्थले चाभावरूपनत्साधनतायां बोध
इति विशेषात् न चाभावविधिस्थलेपि अभावे इष्टसाधनतान्वयमनभ्युपगम्य प्रतियोगिन्येवेष्टाभावसा
धनत्वरूपानिष्टसाधनत्वबोधः किन्त्वोपेयने प्रतियोगिनि इष्टाभावसाधनत्वमभावस्येष्टसाधनत्वनिर्वा
ह्यमित्युत्तरकालेऽभावे इष्टसाधनत्वकल्पनयैव तद्गोचरप्रवृत्तिनिर्वाहसंभवादिति वाच्यं एकाद
श्यामुपवसेत् जन्मतिथ्यादावभिषंगपरिहरेदित्यादावभावविधौ धात्वर्थस्याभावस्य प्रतियोगिभोजनादिवि
शेष्यतयान्तर्भावात् अनिष्टसाधनत्वरूपविध्यर्थाभावस्य प्रतियोगिनि बोधासंभवेन नञ्जीनउपवसे
दित्यादिविधिवाक्यानामनुभवसिद्धविलक्षणबोधजनकतानुभवानुरोधेनाभावे इष्टसाधनताबोधस्ये
वसर्वैश्चाभावविधिस्थले स्वीकर्तुमुचितत्वात्। मैवं रात्रौ श्राद्धं न कुर्वीत अमावास्यायां कुर्वीतेत्यादौ एकक्रि
यायां पर्युदासभयेन नञः पर्युदासत्वासंभवेन प्रतिषेधवचनतायां आवश्यकत्वात्॥ रात्रिश्राद्धकरणस्यन

त, अमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रकसाधनत्वेन तद्भावस्य न रकाभावसाधनतया क्रियायामिष्टसाधनत्वाभावबोधस्यानुपेयतया क्रिया
यां लिङर्थाभावबोधकतायां नञोऽनुपपन्नत्वान्निषेधांतरस्थले वितत्र तद्भावबोधे बाधकाभावात् अभा
वविधावेव तत्रेष्टसाधनताबोधात् ॥ अथ भोजनाभावादेरजन्यस्य कृत्यसाध्यतया तत्र प्रवृत्तेरसंभवा
त् कथमुपवसेदित्यादेरभावविधित्वमिति चेदित्थं नैकदा प्रतियोग्यभावयोः प्रवृत्तेलयोरेकगोचर
प्रवृत्त्यभावपरगोचरप्रवृत्तेः प्रतिबंधकतया भोजनाद्यभावकृतेर्भोजनाद्यनुकूलकृतिविघटनेन भोजना ६
द्यभावस्य निर्वाहकत्वात् तत्र चरप्रवृत्तौ क्षेमसाधारणतत्साधनत्वस्याक्षतत्वेन तस्यापि कृतिसा
ध्यत्वात् अभावेऽप्रवृत्तौ प्राणपंचकसंचाराभावेऽप्रवृत्त्या कुंभकस्य प्रयत्नसाध्यतानुपपत्तेः प्राणायाम
स्य प्रयत्नसाध्यतानुपपत्तेः क्रियाविर[illegible]हस्य तत्साध्यताया अवश्योपपादनीयत्वात् । विधिश्चतुर्विधः उत्प
त्तिविधिर्विनियोगविधिरधिकारविधिः प्रयोगविधिश्चेति कर्म्मादेः प्राथमिकप्राप्तिर्यतः स उत्पत्तिविधिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रथमप्राप्तेरुत्पत्तित्वात्प्राप्तेः प्रवृत्तिविषयतया प्रयोजकप्रतीतेर्दध्ना जुहोतीत्यादेः प्रमाणान्तरप्राप्तहो
मादिकमनूद्य दध्यादिरूपगुणविधायकस्य होमादिकर्मोत्पादकत्वाभावात् प्राप्तौ प्राथम्यविशेषणं उत्पत्तिवि
धिश्च कश्चित् कर्ममात्रोत्पादकः। यथाऽग्निहोत्रं जुहोतीत्यादिः कश्चिद्गुणविशिष्टकर्मोत्पादकः यथा
सोमेन यजेतेत्यादिः। तत्र विशेषणीभवत्सोमादि द्रव्यस्याप्यप्राप्ततया विधेयत्वात् कश्चित्प्राप्ते कर्मणि गुण
मात्रविधायकः यथा दध्ना जुहोतीत्यादिः उपसन्निश्चरित्वा भास्मग्निहोत्रं जुहोतीत्यादिश्च दध्ना जुहोतीति
वत् नया वज्जो वमग्निहोत्रं जुहोतीत्यादिविधिप्राप्ताग्निहोत्रानुवादेन द्रव्यकालोभयविधिः गुणद्वयस्य
मिथोविशेष्यविशेषणभावानापन्नस्य विधाने विधेयताभेदेन वाक्यभेदप्रसंगात् विधेयताद्वयस्य प
रंपरयापि निरूप्यनिरूपकभावविरहेणानन्तरूपानिधियो विश्वं खल समूहालंबनरूपतया तज्ज्ञानकवाक्य
स्यैकवाक्यत्वासंभवात्॥ अतो सौ गुणद्वयविशिष्टाग्निहोत्रपदार्थरूपकर्मान्तरविधिरेव तथा सति च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पंशेषत्वंमदितिबोध्यतेमंत्रस्यइंद्रप्रकाशकतया लिंगेनचइंद्रोपस्थानकरणत्वविनियोगसिद्धिश्च विलं
बेनैवयतोमंत्रस्यस्वार्थप्रकाशनेसत्येवइंद्रप्रकाशनसामर्थ्यंगृहीतव्यं तदनंतरंचतादृशात्तनादिंद्रो-
पस्थानकरणत्वसिद्धिर्भविष्यतितत्सर्वमेवमंत्राधीनइंद्रबोधनिरपेक्षयाश्रुत्यागार्हपत्योपस्थानकरण
त्वंबोध्यते· एवंचविनियोगाकांक्षाविरहान्न लैंगिकेविनियोगः सिध्यतितदुक्तंपार्थसारथिमिश्रैः श्रुति-
लिंगाधिकरणे· यावदेवहिमंत्रार्थोमंत्रेणप्रतिपाद्यते ।। तावदेवश्रुतिमंत्रंगार्हपत्यार्थतांनयेदिति एतच्च ८
ऐंद्रीपदंक्वचिद्विशेषेरूढमित्याशयेनतस्ययोगेनेंद्रप्रकाशनार्थकत्वे ऐंद्रीपदादेवसामर्थ्यरूपलिंग
ज्ञातात्तत्रमंत्रजन्यशाब्दबोधापेक्षाविरहेणासंगत्यापत्तेः श्रुतिलिंगवाक्यप्रकरणस्थानसमाख्यानांस
मवायेपारदौर्बल्यमर्थविप्रकर्षादितिसूत्रोक्तं श्रुत्यपेक्षयालिंगस्यविलंबेनार्थबोधकतयादौर्बल्य
मपिनिराकांक्षतयाविनियोगासाधकत्वमेव ।। अथात्रश्रुतिमात्रेणनलिंगविरोधः द्वितीयातृतीयाभ्यां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रतियोग्यनुपरक्तशेषशेषिभावबोधनात् तादृशस्य च ऐंद्र्याः शेषत्वस्य गार्हपत्यशेषित्वस्य च भिन्न
भिन्नप्रतियोगिकसाधारण्यस्याविरोधादिति प्रतियोग्युपस्थापकसमभिव्याहृतगार्हपत्यादिसहका
रेणैव प्रतियोगिकविशेषोपरक्तविशेषशेषिभावो मंत्रबोध्यशेषशेषिभावविरुद्धः श्रुत्या प्रतिपाद्-
नीयः तथा च समभिव्याहृतपदसमुदायरूपवाक्येनैव विरोधः। वाक्यस्य च लिंगापेक्षया दौर्बल्यमु
क्तम् तत्सिद्धमिति कथं लैंगिकविनियोगबाध इति चेत् सत्यं मिथ्रेरेव शेषशेषित्वमात्रं हि श्रुत्यैंद्र्या गार्हपत्य
योः ऽउक्तमन्योन्यविषयनियमस्त्वेकवाक्यतः इति कारिकया ऽत्र पूर्वपक्षमाशंक्य सत्यं वाक्यादि विरोधोस्ति-
श्रुतितोपि विरुध्यते सहि तेहि विरुद्धे तेन तु लिंगेन केवलेति समाहितं यद्यप्येतदपि समाधानं शि
थिलं॥ तथाहि गार्हपत्यपदस्य लक्षणयास्कंडपत्वे द्वितीयाया आधारार्थकत्वे वा वाक्यस्य लिंगेनाविरो
धनिर्वाहात्। द्वितीयां तं गार्हपत्यपदस्थवमात्रायोऽर्थः। तृतीये तु तदघटितवाक्यार्थस्यैव लैंगिकार्थ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

विरोधेनास्तांश्चन्यापिलिंगविरोधः तथापि पदांतरैकवाक्यतामगृह्य तच्छक्तिलभ्यार्थस्याविलंबेन प्रतीयमा-
नतया केवलतच्छक्तिलभ्यस्य शीघ्रोपस्थितिकार्थस्याविरोधेन लिंगार्थविवादानुपपत्तेः॥ अन्यथा वाक्यमात्र
स्याविरोधेनापि लिंगार्थविरोधापत्तेः। तथापि शह्विधया वाक्येन योलिंगविरुद्धार्थः प्रकाश्यते। सोपि लिंगा
र्थापेक्षया शीघ्रोपस्थितिकः वाक्यस्यैंद्रीपदोपस्थापितमंत्रजन्यशाब्दबोधसापेक्षलिंगज्ञानाधीनानुमि
त्यपेक्षया प्रथमत एव श्रौतप्राप्तार्थः घटितवाक्यार्थस्य शाब्दबोधात्॥ तथाच वाक्येनापि प्रकृते लिंगस्यानि २
राकांक्षतावाक्याल्लिंगस्य बलीयस्त्वं च स्योनं ते सदनं कृतोनीत्यादावेव सदनसादनार्थकयोर्मंत्रपूर्वोत्तरप्रती
कयोः प्रत्येकं सदनसादनार्थकत्वेऽगृहीते एव सादनस्य सदनकल्पनप्रयोजनत्वमगृहीत्वा कल्पयामि त्वं
तेन किमर्थं सदनकरणमित्याकांक्षोत्थापनात्। तदाकांक्षानंतरं तस्मिन्सीदामृते इत्यादेः प्रहाद्विरित्याकारक
परस्परसाकांक्षत्वरूपैकवाक्यताग्रहसंभवात्। तल्लिंगकैवार्थविनियोगसिद्धेः एवमेव सदनसादनरूपार्थ

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रकाशनसामर्थ्यलिंगेन पृथक्कृतत्वात्तदर्थविनियोगसिद्धिरिति वाक्यस्यानित्याकांक्षतयाच नियोगसाध
कत्वात्॥ मंत्रलिंगवत्कथितस्तत्र निर्दिष्टप्रकरणाम्नानसमाख्यानामपि अनुमानोपस्थापकतयैवावि-
नियोगसाधकत्वं बोध्यं॥ तत्रैव लिंगपदं तत्र लिंगपरमेव लिंगसामान्यपरत्वे वाक्यादिवत् श्रुत्यापि तदंत
र्भावेनैव पृथगुपादानासंगतेः॥ तत्र वाक्यं पदानामेकवाक्यतापर्वोक्ता प्रकरणं यत्रोपयोगलक्षणशेषिणः
कथंभावरूपाकांक्षयाभिधानं स्थानं तत्सान्निध्यं समाख्याऽवयवशक्त्याऽउपयोगार्थसमर्पने॥ तथा चोक्तं॥
श्रुतिर्द्वितीयाचक्षमताच लिंगं वाक्यं पदान्येव तु संहतानि सा प्रक्रिया यां कथमित्यपेक्षा स्थानं क्रमो योगब
लं समाख्येति लिंगादीनां श्रुत्या चारवत्॥ श्रुतिकल्पकत्वेपि बलवत् प्रत्यक्षश्रुतिस्तु श्रुत्यादिविरोधस्थले त
द्विरुद्धार्थकश्रुतिकल्पसंभवः तद्विरोधे तद्विरुद्धार्थे लिंगादेव बहुहन्तेः प्रत्यक्षश्रुतिविरुद्धे यथाश्रुतार्थे
स्मृतिरिवेति ध्येयं एतेषामुदाहरणादीनि अन्यत्रानुसंधेयानि विनियोगविधिरपि अपूर्वविधिर्नियमविधि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

परिसंख्याविधिभेदात्त्रिधा विधिं विनाकथमपि यदर्थगोचरप्रवृत्तिर्नोपपद्यतेऽसावपूर्वविधिः नियतप्रवृ
त्तिफलको नियमविधिः स्वविषयादन्यत्र प्रवृत्तिविरोधिबोधः परिसंख्याविधिस्तदुक्तं विधिरत्यंतमप्राप्तौ निय
मः पाक्षिके सति तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयते ॥ अत्यंतमप्राप्ताविति सप्तमीनिर्देशः सतीत्यग्नि
ममेवावाविपरिगमय्यात्रापि योज्यं अत्यंतपदं च नाप्राप्तिविशेषणपरं भिन्नविभक्तिकत्वात् । किंतु सप्तमि
त्यन्तयोः सधातुत्तदर्थं भवनरूपक्रियाविशेषणपरं अतो द्वितीयांतता अप्राप्तिभवनविशेषणं फलतोऽ १०
प्राप्तिविशेषणमेव अत्यंताप्राप्तिविधिं विना नतद्विषये रागतः शास्त्रांतरतश्च कदाचिदपि प्रवृत्तिसंभवस्त
थासति प्रवर्त्तकोऽपूर्वविधिरित्यर्थः ॥ एवंभूतश्च विधिर्व्रीहीन् प्रोक्षतीत्यादिः व्रीहिसाध्यपुरोडाशद्वारक
यागजन्यापूर्वार्थिना व्रीहिप्रोक्षणे नैव प्रवर्त्तको विधिः ॥ अप्रोक्षितव्रीहिभिरपि अवहितैर्यागनिर्वाहकपु
रोडाशसंभवात्प्रोक्षणे व्रीहिसंस्कारद्वारायागोपकारकत्वस्य तेन विधिनाऽवबोधने कथमपि तत्र प्रवृत्तिर्न स्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दिति प्रकारांतरासंभवात्॥ प्रवृत्तिविषयकप्रोक्षणापूर्वजनकतयातत्रोक्तलक्षणस्समन्वयः नियमः पाक्षि
के सति। इति विधिं विनाप्रवृत्तेः पाक्षिकत्वे सतीत्यर्थः। प्रवृत्ते रनिमेऽसतीति यावत् तथा च नञोच प्रवृत्ति
नियमनिर्वाहको विधिर्नियमः विधिरितिफलितं तादृशश्चावघातादिविधिः व्रीहीन् अवहन्तीति विधिं
विना पुरोडाशनिष्पादकव्रीहिवैतुष्यद्वारा यागोपकारके अवघात इव परिहारेण नखदलनादावपि प्र
वृत्तिप्रसक्त्या अवघाते प्रवृत्तिनियमो न स्यादिति तादृशविधिः प्रवृत्तिनियमनिर्वाहकः ननु यागोपका
रकव्रीहिवैतुष्येऽवघाताधीनत्वनियमस्तादृशविधितो यद्यपि दुर्लभः नियमस्यापदार्थत्वाद्वाक्या
र्थत्वाच्च तथापि तादृशविधितो व्रीह्यवघातत्वेन यागसाधनतावगमात् यागजन्यपरमापूर्वस्य तदवघा
तरूपकारणं विना अनिष्पत्तिप्रतिसंधानेन तत्र नियमप्रवृत्तिनिर्वाहः। तत्र चान्यत्र चेति यज्ञो देशपयस्य
विधानं तदन्यस्मिन्नपि तत्संबंधस्य तस्मिन् वा तदन्यसंबंधस्य प्रवृत्तितः प्रसक्ताविर्त्यर्थः॥ तथाच॥ तादृ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शासंबंधप्रसंजकप्रहाणविरोधिविधिः। परिसंख्याविधिरित्यर्थः। तत्र प्रथमः इमामगृभ्णन्रशनामृतस्य
इत्यश्वाभिधानीमादत्ते अत्र इमामित्यादिमंत्रस्य रशनामात्रग्रहणप्रकाशकतया अश्वरशनादानइव गर्द
भरशनाया आदानेऽपि मंत्रस्य विनियोगो मंत्रलिंगात् प्राप्यते· तथा च· तदादानकालेऽपि तन्मंत्रपाठप्र
सक्त्या तत्रापि तन्मंत्रसंबंधः स्यादेव॥ यद्येतद्विधिर्न्न स्यात् एतस्मात् विधितः प्रथममश्वरशनाग्रहणे
एतन्मंत्रविनियोगलाभे निराकांक्षतया गर्दभरशनाग्रहणे तद्विनियोगालाभ इति वैयर्थ्येन तदाचरणा ११
मिति एतद्विधेर्विधेयस्येतरोद्देश्यसंबंधप्रसंजकप्रहाणविरोधिता द्वितीयश्च गृहमेधीये आज्यभागौ
जुहोतीति अत्रातिदेशेन प्रकृतिभूतदर्शपौर्णमासप्रयाजादेराज्यभागहोमस्य च गृहमेधीयाग्नावुद्दे
शप्राप्तत्वलाभादीदृशविध्यसत्त्वे प्रयाजादिहोमस्यापि तत्रानुष्ठानं स्यात् विधिसत्त्वे च इति कर्त्तव्यतांतर्ग
तस्याज्यभागहोमस्य विधाने न इति कर्त्तव्यतांतर्भूतहोमसमुदायाकांक्षानुपपत्त्या ताहशाकांक्षाया एव च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रयाजादिप्रापकातिदेशप्रवर्त्तकतयातन्निवृत्त्यातिदेशाप्रवृत्तौ तत्प्रापनीयप्रयाजादिनिवृत्तिः॥ ॥
अथव्रीहीन्नवहंतीतिनियमविधिदर्शितपरिसंख्याविध्योः कोविशेषः नियमविधेरपि परिसंख्यावदि-
तरनिवृत्तिफलकत्वात्नियमविध्यसत्त्वेपुरोडाशस्यापयागोपकारकत्वेनुष्ठायिनोऽवघातेतरनखुपाये
प्रवृत्तिः प्रसक्तेः॥ यदिचावघातेनियमविधेरवघातप्रवृत्तिनियमफलकत्वंपरिसंख्यातोविशेषः॥ इमा
मगृभ्णन्रशनामित्यादिपरिसंख्यायाअश्वरशनादानेमंत्रपाठप्रवृत्तिनियमस्यमंत्रलिंगेनमंत्रस्यासा-
धारण्येनउपकारकत्वबोधनादेवनिर्वाहान्नतस्याःप्रवृत्तिनियमानुपपादकत्वादितिविभाव्यतेतदा
तुपरिसंख्यायांनियमानंतर्भावः। नियमेतुपरिसंख्यायाअंतर्भावः। परिसंख्याफलस्यतत्साधारण्या
दितिचेन्नियमस्यलेशतरनिवृत्तेरर्थतःसंभवेपितत्रतात्पर्यानुपगमात्॥ नचोपायांतरनिवृत्तावपिनि
यमतोऽवघातप्रवृत्त्युपपत्तेर्निवृत्तावेवतत्रतात्पर्यंनतुनियमप्रवृत्तावित्येवकिन्नेष्यतेइतिवाच्यं॥अ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri,Funding: MIDF

वघातस्यासाधाबन्येनयागोपकारकत्वाबोधनेपि अवघातमात्रेणवैतुष्यानिर्वाहप्रवृत्तिसंधानेअन्योपायसं
वलनेनाप्यवघातप्रवृत्तिसंभवात् अवघातविधेरितरनिवृत्तिफलकत्वायोगिनतस्येतनेरनिवृत्तितात्पर्यासंभवा
त्. अथतथापितुपायांतरसंवलितावघाताधीनमपिवैतुष्यं शास्त्रार्थःस्यात् । इति चेदिष्यतएवैतत् ॥अ
तश्चतोनियमेऽप्युपायांतरसंवलनस्यशास्त्रार्थत्वं एवंतरसंवलनस्याशास्त्रार्थत्वेनियमोलोपेयत्वेयथापं
चपंचनखानभुंजीतेत्यादौतत्रपंचनखभक्षणेश्वशशकादिपंचकनियमेमिलितशंशकमार्जारादिमांसभक्ष १२
णेनियमालंघनान्नियमेनेतरनिवृत्त्यसंभवात् ॥अतएवदोषदृष्ट्यापिअगत्यापरिसंख्योपेयत्वे ॥ततए
वेतरनिवृत्त्युपपत्तेः ननुनियमःतथासतिमिलितमांसस्याभक्षतानुपपत्तेः । नचैवमपितत्रनियमएव
वकिंतोपेयत्वेमिलितमांसंभक्ष्यमेवास्तुमार्जारमांसादिभक्षणप्रायश्चित्तविधीनांशशकादिमांसासं
वलितमांसभक्षणपरतयैवविरोधादितिकथंदृष्टापाःपरिसंख्योयाआदरइतिवाच्यंहिष्टावारविरो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धात्। वस्तुतस्त्वायघ्नित्वविधिप्रसंकोचेनगौरवप्रसंगात्। स्वाविधंशल्लकिंगोधांखड्गकुर्म्मशशांस्तथाभ
क्षान्पंचनखेष्वाहूरनुष्ट्रांश्चैकतोदतः इतिमनुवचने निर्द्धारणसप्तमीवलात् पंचनखपरिसंख्यानपरमे
वैतदितिशूलपाणिः॥ यथापभक्ष्यपंचनखशशकाद्यभेदनियमेन इतरपंचनखस्याभक्ष्यतालभ्यते भक्ष्य
पंचनखत्वेशशकाद्यभेदव्याप्यतालाभे शशकादिभिन्नपंचनखेगृहीतव्यापकताकशशकाद्यभेदाभावेन
भक्ष्यपंचनखत्वाभावसिद्धौ भक्ष्यत्वाभावमादायैव पर्य्यवसानादिति मन्यते तदा तु तत्र परिसंख्याकार्य्यकारी
नियमएव यथ [illegible] पदार्थस्य व्याप्य व्यापकभावस्य संसर्गमर्य्यादया भानसंभवः। वस्तुतउद्देश्यतावच्छेदक
विधेयसंबंधयोरेवव्याप्यव्यापकभावस्य संसर्गतयाभानंवक्तव्यमितिसिद्धंतथाचभक्ष्याः पंचनखाः पंचइत्या
दिवाक्यस्थलेभक्ष्यत्वविशेषितपंचनखानांशशकाद्यभेदरूपविधेयोद्देश्यतयाऽभिमतव्याप्यव्यापकभा
वलानेपि पंचपंचनखान्भुंजीतेत्यादिवाक्यान्न [illegible] भासंभवः पंचनखकर्म्मताविशेषितभक्षणावोधकता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ध्योकक्याद्भक्षणकर्मतानिषेधेविनपंचनखेभ्यालाभेनतात्पर्यात्स्येष्टरूपसंभवादंतरेणपरिसंख्यानंनेतव
लिहन्तिः संभवति ननुश्वामगृध्रनरसनानित्यादिपरिसंख्याविधिस्थलेपूर्वदर्शितवीत्यासन्नरनिहन्तिः
संभवतिपंचपंचनखानित्यादौचपरिसंख्यायांकथमितरपंचनखाःभक्ष्यत्वलाभइतिचेत्लक्षणयापं
चपदस्यपंचातिरिक्तपरतयाभक्षणार्थकधातोश्चवलवदनिष्टाननुबंधिभोजनार्थकतयातल्लाभसं
भवः॥अथवाधातुर्नभोजनविशेषपरः अपितुविरोधिलक्षणयाभोजनाभावपरएवतत्रचविधिप्रत्य १३
येननरकनिहन्तिरूपेष्टसाधनत्वंप्रत्याय्यते।उन्नरकालंअभावस्यनरकनिहन्तिसाधनत्वंप्रतियोगिनोन
रकसाधनतानिर्वाहमितिप्रतिसंधानेनप्रतियोगिगोचरनिहन्तिःसंभवतीतिध्येयंतोविध्यर्थवोधक
तयानिष्ठादेःसाधुत्वनिर्वाहः।अतएववस्त्वार्थहान्यादिर्दोषइति।यत्रनियमेनोपपत्तिस्तत्रननदोषः॥
अतएवयाजनाध्यापनप्रतिग्रहैर्ब्राह्मणोधनमर्जयेदित्यादौब्राह्मणधनार्जनेयाजनादिकरणकत्वनियम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मप्येवसर्वासिद्धेः तावतैववानिज्यादिनातदर्जननिवृत्तिसिद्धेः। तथाहि बलवदनिष्टाननुबंधित्वरूपवि
ध्यर्थविशेषितधनार्ज्जनरूपोद्देश्ये याजनादिकरणकत्वस्यविधानेतस्यतत्संबंधस्यवातादृशोद्देश्यता
वच्छेदकव्यापकत्वलाभात्तदभावेनवाणिज्यादिकरणकार्ज्जनेऽनिष्टाननुबंध्यर्ज्जनत्वस्यव्याप्यस्या
भावेसिद्धतितत्रानिष्टानुबंधित्वस्यैवसिद्धिपर्यवसानात्नहितत्रश्वशृगकमार्ज्जारादिकर्मकरणकभक्षणा
संभववत्वाणिज्ययाजनादिकरणकेकार्ज्जनसंभवः येनकरणनियमपक्षेतत्रनिषिद्धयाजनादिक
रणकत्वाभावविरहेणनिषेधपर्यवसानायपरिसंख्याऽऽद्रियेत॥अतएवशास्त्रनिर्णयेविधिवादेवाचस्प
तिमिश्रैः नियमः पाक्षिकेसतिइत्यादिकंकारकानांयत्रपाक्षिकतासमुच्चयासंभवरूपस्तत्रनियमएवा
द्रियते॥ततएवेतरनिवृत्तिसंभवात्यत्रएतत्समुच्चयरूपपाक्षिकत्वसंभवस्तत्रागत्याकारकांतरनि
वृत्तयेपरिसंख्येत्येवव्याख्यातं। इदंतुचिंत्यते ब्राह्मणोधनमर्जयेदित्यत्र ब्राह्मणोविशेष्यः ननुधनार्जन

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विशेषणं ॥ एवं च ब्राह्मणकर्तृकत्वविशेषितधनार्जनस्योद्देश्यत्वासंभवात् ॥ तद्विशेषितानिच्छाननुबुद्धि
धनार्ज्जनस्यैवोद्देश्यत्वमुपेयं तत्त्वव्यापकताच्चनयाजनादिकरणकत्वस्यसंभवति वैश्यादिकर्तृकत्वानि
ष्यादिकरणकानिषिद्धधनार्जनसाधारण्याभावात्· एवं बलवदनिष्टाननुबंधित्वादिविध्यर्थस्याख्याता
र्थकृतावन्वयमते ऽनिष्टाननुबंधिकृतिविषयार्जनमेवयाजनादिकरणोद्देश्यमुपगंतव्यं तच्च न संभ
वति तादृशाकृतेः कर्त्राख्यातस्थले धात्वर्थविशेष्यतयैवभानादेवं याजनादिकरणकत्वस्यप्रत्येकमे १४
वविधेयतया प्रत्येकनास्तिव्याप्तिब्राह्मणधनार्जनत्वव्यापकतापरस्परव्यभिचारात्। अन्यतमकरण
त्वत्वेन व्यापकतासत्त्वेऽपि नोक्तवाक्यान्न तादृशाभसंभवः तादृशरूपस्याविधेयतानवच्छेदकत्वात् विधेय
तावच्छेदकत्वात् विधेयतावच्छेदकरूपेनैव विधेये व्यापकताबोधस्य व्युत्पत्तिसिद्धत्वात् अन्यथापि
प्रसंगात्। याजनादित्रित्वस्यान्नितयसाधारणत्वेन तद्धत्करत्वत्वेन व्यापकत्वसंभवात्। अन्यतमत्वा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

घटितेन न तेन रूपेण व्यापकताविवक्षणीतयेत्यपि न त्रित्वस्य व्यासज्यवृत्तितया तत्पर्याप्त्यधिकरणैकत्व
स्य प्रत्येकमसत्वेन तादृशि व्याप्यव्यापकत्वासंभवात् पर्याप्तिसंबंधेनैव च बहुवचनस्य त्रित्वाद्यन्यतमबोधक
ताव्युत्पत्तेः। पर्याप्तिघटिततत्ताश्रयकरणकत्वत्वस्य विधेयतावच्छेदकतया भानासंभवात्। एवं याज
नादित्रितयविशेषितत्रित्वस्य बहुवचनेन प्रकृत्यर्थविशेषणतया बोधो न संभवति याजनत्वाद्यव
च्छिन्नविशेषणतया बहुवचनार्थत्रित्वान्वयात्। तथा च त्रित्ववद्याजनत्वादिकमेव विधेयतावच्छेदक
घटकं तादृशं च प्रत्येकवृत्ति न या न व्यापकतावच्छेदकमिति प्रतीकारः॥ यदि च ब्राह्मणो धनमर्जये
दित्यतो ब्राह्मणकर्तृकानिषिद्धधनार्जनत्वादेस्तद्देश्यतावच्छेदकतया अभानेपि त्वद्रूपनिरूपितव्याप
कतासंबंधमर्यादया भासतेऽस्मुपेयते। उपेयते च व्युत्पत्तिवैचित्र्यात्। बहुत्वस्य पर्याप्तिपरित्यागाश्र
यतामात्रं संबंधः तदा पंच पंच नखान्भुंजीतेत्यादावपि विपरीतविशेष्यविशेषणभावलाभस्य भक्ष

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पंचनखत्वस्य वाक्यार्थोद्देश्यतावच्छेदकतयाऽभानेप्येतादृशसमभिव्याहारस्थले तदुपस्थितिरूपितया:
शशकादिपंचत्वाश्रयाभेदत्वावच्छिन्नव्यापकतायाः संसर्गमर्यादया भानसंभावनेनेतरनिवृत्तिसिद्धेः न
त्रापि परिसंख्यानस्यात् ॥ इदं तु न तद्वदुद्देश्यतावच्छेदकविधेययोर्व्याप्यव्यापकभावबोधनेनान्यथा वा यत्रे
तरणिवृत्तौ विश्रान्तिस्तदेव परिसंख्यावाक्यं यच्च क्वचित् प्रवर्तकतया परिसंख्याविधिरिमामगृभ्णन्नित्या
दिः क्वचिन्निषेधवन्निवृत्तिमात्रपरतया अविधिनिषेधरूपं ॥ परिसंख्यावाक्यं पंच पंचनखानित्यादियाज ९५
नाध्यापनेत्यादिकमपि परिसंख्यैवेति ॥ अथैवं सति परिसंख्यास्थले स्वार्थहान्यादिदोषत्रयापत्त्या संगतिः
स्वार्थपरित्यागमंतरेणापि परिसंख्याविधिस्थले पंचनखादिपरिसंख्यानेपि इतरनिवृत्तिसिद्धेर्दर्शित
त्वात् । एवमृतौ भार्यामुपेयादित्यादिनियमो न तु परिसंख्या दोषत्रयग्रासात् । इति सर्वसिद्धान्तोपि
व्याहतः स्वार्थहान्यादिमंतरेणैवानियतानुबंधिभार्याभिगमनेऽनृतुकालव्यावृत्तिबोधात् परिसंख्याफल

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्येतरकाले भार्याभिगमनन्निवृत्तिनिर्वाहान्नियमानावश्यकत्वात् न च क्रतावभिगमने प्रत्यवायश्रुतेः॥ ऋ
तुकालाभिगमनस्यावश्यकत्वेनान्यार्थमावश्यकमिति तन्नियम इति वाच्यं । अनृतावभिगमनस्या
पींद्रियार्थेषु सर्वेषु न प्रसज्येत कामत इत्यादिनिषेधात् न तेकवाक्यतया परिसंख्यायाऽप्यौचित्यात्
इति चेन्न येन रूपेणोद्देश्यता तदन्यरूपेणाव्यापकता उद्देश्यविधेयभावसामर्थ्यात्ततो न लभ्यत इति पं
चपंचनखा न भुंजीतेत्यादौ उद्देश्यविशेषणाभक्ष्यपंचनखत्वात् शशकादौ भेदव्याप्यलाभ इत्याशये
न तत्र परिसंख्यायां स्वार्थहान्यादिदोषस्य प्राचीनैरभिधानात्॥ अत एव शिरोमणिभट्टाचार्यैरेव का
र्यविचारस्थले इह जवने मैत्रमेव पश्यतीत्येन नमित्यत्र नेमनकर्मकत्वेन पाकान्वनुपस्थित्यात् तद्रू
पस्योद्देश्यतावच्छेदकत्वासंभवात्॥ एतज्जवनवृत्तित्वविशेषितनत्रूपावच्छेदेन मैत्रान्यकर्तृकत्वव्यव
च्छेदबोधासंभवात्। मैत्रान्यस्मिन्नेतज्जवनाधिकरणकनेमनकर्मकपाककर्तृत्वव्यवच्छेदबोधाय लक्ष

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

णाद्दताप्रवृत्ते बलवत्त्वोपगमे स्वार्थपरित्यागो ध्रुवं ॥ ऋतौ स्वदारान् गच्छेदित्यादौ यद्यपि लिङर्थबलवदनि
ष्टाननुबन्धित्वविशेषितनदाराभिगमनस्वभावात् तद्रूपस्य कालविशेषसंबंधो देश्यतावच्छेदकत्वं संभवती
ति तद्रूपे ऋतुकालसंबंधव्याप्तिलाभः संभवति। तथापि प्रवृत्तिवैचित्र्यानुवृत्ती स्याद्यप्रयोगाद्व्यावर्तनार्थस्य
विधेयतयैव भाणं न तद्देश्यतावच्छेदकतयेति श्रुतमन्त्रैर्बलवदनिष्टाननुबंधित्वरूपलिङर्थस्य तद्देश्य
तावच्छेदकत्वमनुपपन्नमिति सिद्धमित्यालोच्य तत्र परिसंख्यानादृतात्किं तु ऋतुकालेऽभिगमनियम एव ॥ अ १६
थ ऋताविति वाक्यं तत्कालेऽभिगमनियमबोधनेपि तत्कालीनानभिगमनेऽनिष्टसाधनत्वाबोधकत
या नादृशविधिं वाक्यान्तरात्कालीनाभिगमने प्रवृत्तिनियमं नोपपादयति अतः तस्य नियमविधित्वं दुर्घ
टमिति चेन्न तादृशवाक्यस्य तत्कालीनाभिगमने नरकाभावरूपेष्टसाधनताबोधकत्वोपगमेनो तत्र ऋ
कालमर्थतस्तत्कालप्रत्यासन्नस्याभिगमाभावस्य नरकसाधनत्वबोधात्तत्कालीनाभिगमयतत्प्रवृ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पपन्नात्तद्वाक्यस्य नियमविधित्वोपपत्तेः। संध्यामुपासीतेत्यादिनित्यविधीनां क्रियाणां नरकाभावसाधनताबोधकतयाऽकरीत्या तत्र नियमप्रवृत्तिसंपादकत्वेऽपि न तेषां नियमविधित्वं विधिं विनापि यादृशक्रियायां रागादितः प्रवृत्तिसंभवस्तत्र प्रवृत्तिनियमोपपादकविधिरेव नियमविधित्वात्। परं तु संध्यावंदनादावप्यनः प्रवृत्त्यसंभवान्न द्विधायकवाक्यानामपूर्वविधित्वमेव॥ अथोक्तरीत्यैव ऋतावित्यादिविधेः क्रियायां नियतप्रवृत्तिनिर्वाहकत्वे तस्य नियमबोधकत्वं किमर्थमुपेयते इति चेन्नोपेयत एव। तथात्वे नियमाबोधकत्वेऽप्यवघातविधिवन्नियमविधित्वसंभवात्। ऋतौ भार्यामुपेयादेवेत्यादिवाक्ये त्वेवकारस्यायोगव्यवच्छेदार्थकतया भार्याभिगमे ऋतुकालवृत्त्यभावप्रतियोगित्वव्यवच्छेदरूपव्यापकताबोधस्यावश्यकतया तत्रैव नरकाभावरूपेष्टसाधनत्वान्वयः। केचित्तु कालनिष्ठक्रियाया अयोगे लिङर्थबलवदनिष्टाननुबंधित्वव्यवच्छेदार्थ एवकारेण बोध्यत इत्याहुः॥ कान्ति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कामो हविष्यं भुंजीतेत्यादिना पूर्वविधिः स्वर्गादिरूपहविष्यभोजनेऽरागतएव प्रवृत्तिसंभवात्। नापि क्रतुकाला
भिगमनादिविधिवन्नियमविधिः। अकरणे प्रत्यवायस्याश्रावणिकत्वात्। नापि परिसंख्याविधिः इमामगृभ्ण
न्नित्यादेर्गर्दभरशनाग्रहणेऽपि तन्मंत्रस्य सफलत्वज्ञानविरोधितया तत्र तन्मंत्रपाठाप्रवृत्तिप्रयोजकता
वत् प्रकृते तस्य हविष्येतरभोजने लौकिकप्रमानानिश्चफलके सफलत्वज्ञानविघटने न प्रवृत्तिविरह
प्रयोजकताया असंभवात्। अपि तु हविष्यं ब्रह्मचारित्वं महापातकनाशनमित्याद्यर्थवादबोधितफला १७
र्थिनं हविष्येतरभोजनाद्यभावे प्रवर्त्तयन् एकादश्यामुपवसेदित्यादिवत् अभावविधिरेव। न च तत्र
क्वाचित्तरभोजनाद्यभावबोधासंभवात्॥ ननु विधित्वसंभवः इति वाच्यं तथाविधविधेरर्थवादेन कल्प्य
त्वे हविष्येतरन्न भुंजीतेत्याद्याकारकस्यैव कल्प्यत्वात्॥ प्रत्यक्षत्वे पंच पंचनखा इत्यादाविव लक्षणा
याऽभिमतार्थबोधकताया उपपादनीयत्वात्॥ अर्थवादेऽपि हविष्यादिपदस्य तदितरभोजनाद्यभावे लाक्ष

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

णिकत्वोपमात्। भुंजीत पितृसेवितमिति तत्रश्राद्धानिवेदितजातीयेतरद्रव्यभोजननिषेधकं यत् किंचित्
पच्यते गेहे त्यादिवाक्यैकवाक्यतया परिसंख्यात्वमेव॥ स्वीकुर्वंति वस्तुतः प्रदर्शितगुणपत्रुरूप भुंजीत पितृ
सेवितमित्यादिवचनैरितिकर्त्तव्यता संदंशेन शेषभोजनस्यांगत्वं दुरपवादमिति श्राद्धोपकारकतया तद्वि
धानेन विनियोगविधिप्रभेदो नियतप्रवृत्तिफलकत्वान्नियमविधिरूपो यं शेषासत्वेनास्यांगनेति आवश्य
कोपवासादिदिने शेषभोजनमंतरेनापि प्रधाननिर्वाहः। तत्रश्राद्धेनिः शेषान्नमांसादिदानेन श्राद्धशेषभो
जनरूपांगस्यनपेक्षानिर्वाहात्. एवमेव श्राद्धविवेककृतः॥ नच श्राद्धजन्यापूर्वे शेषभोजनस्य कारण
त्वे कथं तदघटितसामग्रीतः परमापूर्वोत्पत्तिः कारणत्वाभावे शेषसत्वेपि तदपेक्षानस्यात् कथं वा
तदंगभवेन् सावशेषश्राद्धजन्यपरमापूर्वेतस्य कारणत्वोपगमेपि निरवशेषश्राद्धजन्यपरमापूर्वसाम
ग्र्या॥ शेषसत्वेपि तद्भोजनमंतरेणाप्यक्षतत्वात् प्रधाननिर्वाहो दुर्घट इति वाच्यं शेषभोजनवत् शेषा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सत्वेऽभावस्यापि वैकल्पिकांगत्वेनधाद्ध जन्यपरमापूर्वसामान्योत्पत्तौ शेषाभावशेषभोजनरूपांग - पा-
न्यतरघटितान्यतरसामग्र्यपेक्षयासामंजस्यात् । नचशेषभावस्यांगतावोधकविरहभावात् कथंतस्यांगतेति
वाच्यं शेषसत्वे किंकुर्वीतेत्याकांक्षयाऽऽह नुस्यशेषात्वंभुंजीतेति वीं[illegible]शेषसत्वेभोजनापेक्षावोधकतया
शेषासत्वेतदनपेक्षावोधकतया च शेषासत्वे शेषभोजनंविनैवप्रधानसिद्ध्यौरित्येतल्लाभात् तत्र शेषा
भावस्यानपेक्षायां शेषसत्वेपि शेषभोजनमंतरापूर्वस्योर्वीरतया शेषभोजनविध्धेस्तत्रनियमेनप्रव १८
र्तकतायोगात् तद्विधिवैयर्थ्येनशेषाभावस्यांगतायास्तद्बोधकविधेश्चापेक्षाऽभयस्यलसाधारणी-
शेषभोजनाभावविशिष्टस्यशेषस्याभावस्य वाँगंभुंजीतपितृसेवितारित्यनेनविशेषणाभावरूपस्यशे
षः भोजनस्यवस्तुगत्याविशिष्टाभावत्वावच्छिन्नंप्रत्यपूर्वसाधनत्वंतदेवतोध्यते ॥ तद्रूपस्यजनकता
वच्छेदकत्वंचव्यभिचाराच्छेषभोजनतत्स्यतथात्ववाधात् तदुत्तरकालकत्वंतावताविशेष्याभावस्या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पिसाधारणरूपेणांगत्वासिद्धिरित्यपास्तः। ईदृशावीत्यैव लोहितं निरस्यति॥ सक्रान्निरस्यति इत्यादिविधिबो
धित लोहितसक्रान्निरसनात्मकप्रतिपत्तिरूपांगबोधेपि लोहितसक्तुदायसत्वस्थले प्रधानासिद्धि
रूपपादनीया॥ न चांगबाधभयेन लोहितायसत्वस्थले लोहितायंतरं संपादयत्वंनिरसनं प्रक्रमिति
वाच्यं लोहितादिसत्वे किं कुर्वीतेत्याकांक्षायां तादृशविधीनां प्रवृत्या· लोहितायसत्वस्थले तेषां वि
धीनामप्रवृत्तेः न च तदंगताबोधकाभावात् एतन्न्यायमूलक एव प्रतिपत्तेः प्रतिपाद प्रयोजकत्व
मिति प्रवादः॥ अथ लौकिकशेषभोजनस्यालौकिकांगत्वे पर्वादिवशीयनिरामिषसक्तुभोजनस्या
पि श्राद्धांगतास्यादिति निरामिषसक्तु भुक्ता इत्यादौ निरामिषसक्तुभोजनातिरिक्तभोजनाभावपर
त्वं भज्येतेति चेन्न पर्वादिवसे आवश्यकोपवासस्थले आवश्यकश्राद्धस्यानिर्वाहप्रसंगे न तत्र वैकल्पि
कांगांतरकंपनेचगौरवेन॥ तद्वचनस्य निरामिषसक्तुभोजनातिरिक्तभोजनाभावरूपांगविधायक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तायाऽपगमादिति शिवं॥ ॥इति श्रीमन्महामहोपाध्यायगदाधरभट्टाचार्य्यचक्रवर्त्तिविरचितविधि-
स्वरूपविचारः संपूर्णम्॥ ॥शुभमस्तु सर्वजगताम्॥ ॥ ॥ ॥

नं० ४३०५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

किंतुस्वसमानाधिकरणपावछिन्नकालिकविशेषणतासंबंधेनडुःध्वप्रागभाववदन्यत्वंनदितिप्रागभावस्वीकारआवश्य
कइति।नद्ध्वसव्।स्वसमानाधिकरणपावछिन्नकालिकविशेषणतासंबंधेनडुःध्ववदन्यत्वस्यध्वंसेनिवेशादेवइदानींतनडुः
ध्वंसेव्यभिचारवारणासंभवात्।नचवारणायडुःध्ववरमत्वनिवेशस्यवैकल्यादिति॥ ॥इतिप्रागभाववादः

प्रागभाववा।५।५०

गदाधरः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तायाऽपगम्यादितिशिवं॥ ॥ इतिश्रीमन्महामहोपाध्यायगदाधरभट्टाचार्य्यचक्रवर्त्तिविरचितविधि-
स्वरूपविचारः संपूर्णम्॥ ॥ शुभमस्तुसर्वजगताम्॥ ॥ ॥ ॥

नं० ४३०५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रीगणेशाय नमः॥ ॥आख्यातस्य कृतित्वं शक्यतावच्छेदकं न वा॥ तत्र चैत्रः पचतीत्यत्र पाकानुकूलकृतेर
नुभवस्य सर्वसिद्धत्वेन कृतित्वमेव शक्यतावच्छेदकं शक्यतावच्छेदकमित्यादिकमाख्यातत्वं वेत्यन्यदेतत्। रथो ग
च्छतीत्यत्र गतिमत्त्वमात्रप्रतीतेर्घटो नश्यतीत्यत्र प्रतियोगित्वस्य प्रतीतेराश्रयत्वे प्रतियोगित्वे निरूढलक्षणा
अर्थोभयत्र प्रयोगसामान्यादाश्रयत्वे प्रतियोगित्वे च शक्तिः कृतावेव लक्षणेत्यत्र किन्न एवनेति चेत्सत्यं चैत्रो
जानातीतिवत् घटो जानातीत्यप्रतीतेः। आश्रयत्वे शक्तिकल्पने तु एतादृशप्रतीतेर्दुर्निवारा घटस्यापि ज्ञानाश्रय
त्वात्। रथो गच्छतीतिवत् महाकालो गच्छतीत्यप्रयोगाच्च तादृशावच्छेदकतादिसंबंधावच्छिन्नाधिकरणताया ए
वाख्यातस्य प्रतिपाद्यत्वेन कृतिलापेक्षया गुरुशरीरस्य तस्य न शक्यतावच्छेदकत्वं न च तर्हि प्रतियोगित्वे का
गतिरिति चेत्सत्यं कृत्यपेक्षया प्रतियोगित्वरूपस्य प्रतियोगित्वस्य वाऽल्पत्वात्तत्र शक्तिः हि कार्यकारणभा
वस्वीकारे तादृशसामग्रीबलादादिब्राह्मणोत्पत्तिः ब्राह्मणीं विनापीदानीं तादृशसामग्रीबलाद्ब्राह्मणत्वावच्छि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वापत्तिरित्यवश्यंआदिब्राह्मणवृत्तिब्राह्मणत्वावच्छिन्नप्रत्यक्षविशेषोहेतुः आदिब्राह्मणव्यावृत्तब्राह्मणत्वावच्छि
न्नंप्रतिब्राह्मणत्वेनचहेतुत्वमितितदुभयधर्मावच्छिन्नजन्यतावच्छेदकतयातादृशजातिद्वयसिद्धिरिति। एवं
अवयवसंयोगादिजन्यतावच्छेदकतयासर्वब्राह्मणसाधारणंब्राह्मणत्वमपिकल्प्यतेसैवजातिर्ब्राह्मणत्वावच्छि
न्नजनकतावच्छेदिकातथाचजातित्रयमितिसिद्धांतः। ननुव्यापकब्राह्मणत्वंनजातिः। विश्वामित्रत्वादिनासंकरप्रसं
गादितिचेन्न। ब्राह्मणत्वव्याप्यविरुद्धभेदेनविश्वामित्रत्वद्वयंस्वीक्रियतेनचविश्वामित्रत्वव्याप्यविरुद्धतयैवब्राह्म १
णत्वद्वयंकथंस्वीक्रियतेइत्यत्रविनिगमनाविरहइतिवाच्यं। विश्वामित्रत्वव्याप्यविरुद्धभेदेनब्राह्मणत्वद्वयस्वी
कारेजातिकल्पनाबाहुल्यगौ।रवमेवविनिगमकंतथाहिविश्वामित्रत्वव्याप्यंएकं। ब्राह्मणत्वएवंविश्वामित्रत्व
विरुद्धत्वंब्राह्मणवृत्तिकंब्राह्मणत्वंएवंविश्वामित्रत्वव्याप्यब्राह्मणत्वावच्छिन्नजन्यतावच्छेदकंब्राह्मणत्वंएवंवि
श्वामित्रत्वविरुद्धब्राह्मणत्वावच्छिन्नजन्यतावच्छेदकमप्येकंब्राह्मणत्वंनहितयोरेकब्राह्मणत्वंजन्यतावच्छेदकं सि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रतियोगित्वस्य कृतितदन्यवस्तुमात्रवात्तलाघवात्कृतावेव शक्तिः न त्वनिष्टनिसाधारणकृतित्वस्य शक्यता
वच्छेदकत्वे पाकगोचरनिवृत्तिदशायामपि चैत्रः पचतीति प्रयोगापत्तिरिति वाच्यं। आख्यातार्थे धात्वर्थस्यानु
कूलतासंबंधेनान्वये नर्दोषात् निवृत्त्यवच्छिन्नस्य पाकाजनकत्वात्। अत एव जीवनयोनियत्नमादायापि
न दोषः मणिकृतस्तु जानातीच्छतियततीत्यादौ आश्रयत्वप्रतियोगित्वादिसंबंधेन नामार्थ एव धात्वर्थो
न्वयसंभवेन कृतं लक्षणादरेण ननु नामार्थधात्वर्थयोः साक्षाद्भेदान्वयबोधस्याव्युत्पन्नत्वात् कथं लक्षणा
नादरं कथमन्यथा ओदनः पचतीति न प्रयोगः कर्मतासंबंधेन पाकांशे तदन्वयबोधसंभवात् इति चेत्। ना
मार्थप्रकारकधात्वर्थविशेष्यकशाब्दबोध एवास्तु तादृशनियमः। तथापि ओदनः पचतीति शाब्दधीवारणं ×(
'प्रकृ×क्रमेण नामार्थप्रकारकधात्वर्थविशेष्यकमिति क्रमेणापि भवतीति तादृशव्युत्पत्तिस्वीकारेण रूपव
तं ओदनः पचतीत्यत्र कर्मतासंबंधेन शाब्दबोधापत्तिरेव न संभवति तादृशबोधस्यालीकत्वात् तादृशसंबं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धेनयोग्यताज्ञानतात्पर्यज्ञानयोर्हेतुत्वाकल्पनात् नतादृशशाब्दादयः अथोदनः पक्त्वा भुज्यत इत्यत्र कर्म
तासंबंधेनशाब्दोदयेनतत्रैवयोग्यताज्ञानतात्पर्यज्ञानादेस्तादृशसंबंधेनहेतुत्वस्वरूपनत्वात्तन्नदोषइतिचे
न्नसत्यंतत्रधातोरेवलक्षणयाओदनकर्मकपाकोपस्थितेर्नतत्रकर्मतासंबंधेनान्वयधीः विनालक्ष
णाप्रतिसंधानंनांगीक्रियतएवतादृशधीः अस्तुवातत्रकर्मतासंबंधेनान्वयधीः पाकांशेतथापिनक्षतिः
कर्मतासंबंधेनान्वयंप्रतिअव्यवहृतंतधातुजन्योपस्थितेर्विशेषसामग्रीत्वात् अतएवओदनःपाकंभु २
ज्यतइत्यत्रापितादृशान्वयधीः। अन्यथावांतधातुजन्योपस्थितेर्विशेषसामग्रीत्वेअत्रैवकर्मतासंबंधेन
बोधोनस्यात्। क्वचहृतंतधातुजन्योपस्थितिरेवविशेषसामग्री किमव्ययविशेषणेनेतिवाच्यं। तथासति
ओदनःपचन्भुज्यतइतिप्रयोगापत्तेः। ओदनंपचतीत्यत्रकर्मतायाद्विविधंअलंओदनांशाम्व्यविशेष्य
तयापाकांशेआनयनांशेओदनस्यसंबंधविधयाचप्रतिकर्मतातर्भावेनहेतुमद्भावस्वरूपत्वमितिप

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्षधर्मानुयायिनः। अथ ओदनपचतीत्यत्र शाब्दधीवारणाय धात्वर्थे ओदनकर्मत्वादेः प्रकारतयाभानम
वश्यं वक्तव्यं। एवं घटमानयेत्यत्र घटकर्मकत्वं प्रकारीभूय भासते घटः कर्मता संबंधेन धात्वर्थप्रकारः
किंवा कर्मतायाभानं नामार्थे नामार्थस्य धात्वर्थे च कर्मता संबंधेनान्वय इति कर्मता संबंधेन नामार्थधा
त्वर्थयोरन्वयबोधस्वीकर्तृपक्षधरमते कोविनिगमक इति चेन्न। तत्तन्नामार्थस्य विशेष्यतयैव कर्मता
यांभानं अन्यथा प्रकृत्यर्थान्वितस्वार्थबोधकत्वं प्रत्ययानामिति व्युत्पत्तिभंगप्रसंगः तादृशव्युत्पत्तेः प्रकृ
त्यर्थविशेष्यतया प्रत्ययार्थभानमिति नियमात् इति। ननु ओदनः पक्वा भुज्यत इत्यत्र प्रथमाविभक्तेरेव
कर्मत्वे लक्षणया तादृशप्रयोगसमन्वय इति तन्न सुप्सु विभक्तौ लक्षणाया अभावात्। कथमन्यथा ओ
दनः पचतीत्यत्रापि लक्षणया तादृशान्वयबोधो न भवतीति। यत्र पदार्थ तदादिपदेन कार्यता संबंधे
न ओदनवत् पाकशाब्दोदयात् योग्यताज्ञानतात्पर्यज्ञानादेस्तत्रैव हेतुत्वमिति तदप्यसत् तत्रतादृ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ऽपदघटितलक्षणप्रतिसंधानस्य विशेषसामग्रीत्वान्न दोषः। यत्र ओदनं पचतीत्यत्र कर्मतासंबंधेन
ओदनस्य पाकान्वयधीस्वीकारात्। तत्रैव योग्यताज्ञानतात्पर्यज्ञानयोः कारणत्वं कॢप्तमिति न दोषः क
दापि न तत्र तादृशान्वयबोधे मानाभावात्। अस्तु वा तत्र कर्मताया द्विविधं भानं प्रकारतया संबंधतया के
वलं संबंधतया च भानं संभवतीति प्रकारतानात्मकस्य तस्यालीकतया एवमोदनं न पचती चैत्र इत्य
त्र कर्मतासंबंधावच्छिन्नाभावस्याप्रसिद्ध्याऽन्वयबोधानुदयप्रसंगात्कर्मतासंबंधावच्छिन्नाभा ३
वाप्रसिद्धिबीजं च वृत्यनियामकसंबंधस्य प्रतियोगितानवच्छेदकत्वमिति न तु ओदनकर्मत्वानु
कूलकृत्यभाववान् इत्येवान्वयधीरिति वाच्यं। यादृशसंबंधेन यत्र यस्य प्रकारान्वयः तादृशसंबंधेन
तत्र तस्य समभिव्याहृतनञाऽभावः प्रत्याय्यते इति व्युत्पत्तेरिति। नव्यास्तु नामार्थधात्वर्थयोरभेदान्य
तिरिक्तसंबंधेनान्वयबोधं प्रति यत्किंचिद्विशेषसामग्र्या अपेक्षितत्वेनैव कृतकृत्यत्वं चैत्रो जानातीति

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्यले निरुक्त तन्नद्विशेषसामग्रीं विना कथं कार्य्योत्पादः यदि च तत्र तादृशविशेषसामग्रीं विनैव तादृशान्व
यबोधस्तदा ओदनः पचतीत्यादावपि तादृशविशेषसामग्रीं विना तादृशान्वयबोधापत्तिरित्यपि प्रत्ये
णतयोक्तिर्दीधितिकृतः। एतेन नामार्थधात्वर्थयोरभेदातिरिक्तसंबंधेनान्वयबोधं प्रति अव्ययनिपा
तजन्योपस्थितित्वेन हेतुत्वं न च तादृशविशेषसामग्रीं विना कार्य्योत्पाद इति परास्तं तादृशान्वयबो
धे यत्किंचिद्विशेषसामग्र्या अपेक्षितत्वेन चैत्रो जानातीत्यादौ तादृशविशेषसामग्रीं विना कथमन्व
यबोध इति प्राहुः। अत्र वैयाकरणाः। कर्तृकर्मणी लकारवाच्ये अन्यथाऽनभिहिते कर्त्तरि तृतीयान
भिहिते कर्म्मणि द्वितीयेत्यनुशासनेन ओदनं पचति चैत्र इत्यादौ देवदत्तेन पच्यते इत्यादौ च
द्वितीयातृतीयाविभक्तिप्रसंगः न च संख्याया अनभिधानप्रयुक्तमेव प्रथमसामग्रीयवचने कर्तृग
तसंख्याया अनभिहिते तृतीया कर्मगतसंख्याया अनभिहिते द्वितीयेत्येव किं न रोचते। कर्तृग

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तसंख्याभिधानं तु आख्यातोपस्थाप्यसंख्यायाः कर्त्रन्वयकार्यत्वेनेति नैव पृथगेतितदर्थः कर्त्तरि संख्या
न्वयं प्रति आख्यातजन्यसंख्योपस्थितित्वेन हेतुत्वमिति वाच्यं । नातो वस्तुगत्या कर्तृगतसंख्याभिधा
यिकत्वात् कर्तृगतसंख्यात्वप्रकारेणान्वयबोधनाच्च दोषइति वाच्यं कृत्प्रत्ययस्य संख्याया अप्रति
पादकत्वात् कृत्प्रत्यययोगे प्रथमान्ततीयो भयविनिगमकत्वापत्तिः । सुप्तिङ्भक्तिसमव्याहृतस्य कृ
त्प्रत्यययोग्यताभावात् अन्यच्च कृत्पन्न संख्यावाचकप्रथमादिविभक्तिनएव संख्या प्रत्ययसंभवे कृ
तं कृत्प्रत्ययस्य संख्याया अभिधायकत्वेन किं चाख्यातमात्रस्य कृतिवाचकत्वे पचति पचसि पचा ४
मीत्यादीनां पर्यायतापत्तिः पचति पचसि पचामीत्यादितः केवलपाककृतेरेवबोधात् न पर्यायवत
दन्यूनातिरिक्तशाब्दधीजनकत्वं न च पर्यायतापत्तिदोषस्य किंचित्करत्वमिति वाच्यं । त्वज्जिगम्यो :
पर्यायतापत्तिभयेन फलावच्छिन्नक्रियैव धात्वर्थ इत्युक्तं दीधितिकृतापि । एवं पचति पचतः पचं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ति॰ इत्यादिभागानामपर्यायतापत्तिः वैयाकरणमते तु पचति पचसि पचामीत्यादिभागस्य पाकानुकूल
कृतिमदभिन्नः संबोधनविषयश्चैत्रः पाकानुकूलकृतिमदभिन्नस्तादृशवाक्योच्चारयितृचैत्र इत्याकार
कबोधजननात्॰ पचति पचत इत्यत्र च तादृशकर्त्तरि एकत्वद्वित्वादिबोधजननाच्च विभिन्नविषयकशा
ब्दजनकत्वात्। न तत्पर्यायतापत्तिरिति न च कथं केवलं पचतीति ज्ञानात् युष्मदस्मदार्थस्य बोधः एवं केव
लं पचामीति भागात् अस्मत्पदार्थस्य बोध इति वाच्यं युष्मादिमध्यमः। अस्मद्युत्तम इत्येताभ्यां युष्मत्व
दयोगे स्मत्वदयोगे च मध्यमपुरुषोत्तमपुरुषयोः साधुत्वात् सिप्पदमिप्पदभागस्यैव तादृशान्वयबोध
जनकत्वात्। अपि च आख्यातमात्रस्य कर्तृकर्मत्वमात्रबोधकत्वे एकस्मिन्नेकवचनं द्वयोर्द्विवचनं ब
हुषु बहुवचनमित्यनुशासनवैयर्थ्यापत्तिः देवदत्तः पचतीत्यत्र लकारैकत्वशक्तिकल्पनादेवैक
त्वादिबोधसंभवे कृतमाख्यातस्यैकत्वशक्तिकल्पनेन देवदत्तः सुंदर इत्यादौ तथा शक्तिकल्पनात् अ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्मन्मते तु पचतिभागादेव एकत्वविशिष्टपाककृतिमानित्यन्वयबोधस्योत्पन्नेरैकत्वादाववश्यं शक्तिकल्प
नमिति किंच पचतीतिभागस्य पाकजनकयत्नवानिति विवरणस्य धर्मिणि शक्तिराख्यातस्यान्यथा
विवरणस्य शक्यग्राहकत्वे कृतावपि तादृशशक्तिविलयप्रसंगः। अपि च कृतिः पचतीतिवाक्यात्तत्ता
दात्म्यसंबंधेन पाकानुकूलकृतिप्रकारकशाब्दस्यापत्तेः न चोद्देश्यतावच्छेदकविधेयतावच्छेदकयोरै
क्येन निराकांक्षत्वात् शाब्दबोधानापत्तिरिति वाच्यं। दंडवान् रक्तदंडवानित्यत्र अत्रापि साकांक्षत्वात् ५
अस्मन्मते आख्यातस्य कर्तृवाचकत्वाभावादेव न तादृशधी। न च प्रत्ययार्थप्रकृत्यर्थयोरभेदसंबंधेनान्व
यबोधे स्याव्युत्पन्नत्वात् न तत् शाब्दधीरिति वाच्यं। दंडी पुरुष इत्यादौ मत्वर्थसंबंधिनाप्रकृत्यर्थपुरुष
स्याभेदेनान्वयबोधस्येष्टत्वान्न किंचिदेतत्। न च मत्वर्थसंबंधस्य पुरुषे ऽन्वयधीरिति वाच्यं। नामार्थ
द्वयस्याभेदातिरिक्तसंबंधेनान्वयबोधजनने ऽसामर्थ्यात्। न च तस्य नामत्वं नास्तीति वाच्यं। यस्मात्त्वाद

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यत्तन्नामेति तस्यापि नामत्वाभिधानाच्चमतुपः संयोगत्वादिरूपेण संयोगमात्रार्थकत्वे दंडसंयोगो गच्छ-
तीति वाक्यस्यापार्थकभावात्। दंडी गच्छतीति वाक्यस्यापि तथात्वप्रसंगात् गमनकाले दंडी गच्छतीति वा-
क्यस्यायोग्यत्वापत्तेः। एवं संयोगवान् दंडीति वाक्यस्य तथा प्रसंगाच्चेत्यपि वदंति। तदसत् लाघवात्।
कर्तृत्वकर्मत्वे च शक्तिर्न्नतु कर्मविशिष्टे गौरवान्मानाभावाच्च। आख्यातस्यैकत्वादौ शक्तिकल्पनं-
तु लक्षणायां यत्र पाककर्तृबोधं तत्र केवलं पचतीति भागात्। एकः पाककर्त्तेति बोधस्यानुभविकत्वेन
विना एकत्वादिषु शक्तिकल्पनं न निस्तारः एकत्वविशिष्टकर्त्तरि लक्षणा प्रतिसंधानं विनापि तादृशा-
न्वयबोधजननात्। विशिष्टलक्षणा अत एव तादृशान्वयधीरिति भावः। पचतो पचसि पचामीति वा-
क्यानां पर्यायतापत्तेः त्वन्मतेपि दुरुपकं वा सि पदस्य युष्मदर्थकत्वेपि चैत्रत्वप्रकारेणैवबोधः। एवं मि-
पदस्यास्मदर्थकत्वेपि चैत्रत्वप्रकारेणैवबोधः। तथा च सिपदस्य मिपदस्य विशिष्टत्वेवयदिवएक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

णैककार्य्यप्रतिपादकत्वमेवपर्यायत्वं विभाव्यतेऽपि पदानुसारपि तत्तद्वृत्तिधर्मप्रकारेणापि पदानां संबो
धनविषयवृत्तिधर्म्मप्रकारेणेतिवाविभाव्यते। तदस्वीक्रियत एव तादृशं पर्यायत्वं पचतिपचतःपचं
तीतिवाक्यानामपि पर्यायत्वमिष्यत एव एवं हि तीयात्तीयावत्संख्यानभिधानप्रयुक्त एवेतिनच
कृत्प्रत्ययस्य संख्याया अभिधायकत्वे मानाभावात् कृत्प्रत्ययप्रयोगे कागतिरितिचेत्। यथाहि पचतीत्य
त्र आख्यातस्य कर्त्तरि लक्षणातः एकः कर्त्तेति बोधो दयात् आख्यातस्य संख्याभिधायकत्वं। तथा कृतो ६
पियत्र लक्षणया कर्तृबोधस्तत्र कृत्प्रत्ययस्यापि संख्याभिधायकत्वं अगत्या स्वीक्रियते। नच कृतः स्व
विभक्तिसमभिव्याहारविनाअप्रयोगात्तत्र कृत्सु संख्याशक्तिकल्पनु विभक्तौ संख्याबोधसंभवे कृत्तं सं
ख्याशक्तिकल्पनेनेतिवाच्यं। अज्ञातसंख्याशक्तिकस्यापि तादृशबोधजननात्। अगत्या कृतः सं
ख्याशक्तिकल्पनमितिवाच्यं। कृतिपचतीति शाब्दबोधार्थं तादृशाख्यातार्थकृतेरवच्छेदकतासं

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वंधेनान्वयबोध एव माकांक्षत्वात्। ईश्वरः पचतीति शाब्दवारणाय तादृशकृत्यन्ने तु भयसिद्धमितिय
रिचिंतनीयं पचतीति भागस्य पाकजनकयत्नवानिति विवरणं तु तादृशतात्पर्यस्यैव नत्वाख्या
तस्य यथा धूमोस्तीति भागस्य वह्निरस्तीति विवरणं अतो न तादृशविवरणाद्धर्मिणि शक्तिः किंच।
नापाक्षीदित्यत्रातीतकालानवछिन्नप्राकानुकूलकृत्सभाववान् चैत्र इत्याकारकानुबोधस्य विना
कृतिशक्तिर्न्न निर्वहत्येति। नहि कर्तृत्वबोधे तादृशवाक्यस्य साध्यत्वं कदापि संभवति अत्र कुत्साम्ने
वैविध्यात् परेषान्नकलंजं भजयेदित्यत्रदाभावे पूर्वरूपाख्यातार्थान्वय इत्यस्तनाते ऽपिनातिरा
ग्रेशोडशीं गृह्णीयादितिवत् अभाव एवाख्यातार्थान्वय इति नव्यतन्त्रलक्षणा इति वाच्यं। लघुध
र्मविशिष्टे लक्षणागुरुधर्मविशिष्टे शक्तिरिति महाकौशलं। तस्मात् आख्यातमात्रस्य कर्तृत्वमर्थः
आत्मनेपदस्य तु कर्मत्वमप्यन्वर्थः। कदाचि त्वार्तत्वबोधकत्वं च तस्या कुमन्नमितिन्तु यत्रैक धर्मि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

णिकर्तृत्ववाचकत्वप्रधर्म्मितबोधकत्वं तत्रैवाव्युत्पन्नं । नन्वेकधर्मिणि तदुभयबोधने तेन लूयते के
दारः स्वयमेव भिद्यते कुशूलः स्वयमेव इत्यादौ कर्मकर्तृस्थले कर्मवत्कर्मणा तुल्यक्रिय इत्यनुशासनेन
तथा बोधनात् छेदनकर्मतावान्त्रकेदानछेदनानुकूलव्यापारवान् भेदकर्मतावान् कुशूलो भेदानु
कूलकूलव्यापारवानित्यन्वयबोधस्यानुभवसिद्धत्वात् । देवदत्तस्तण्डुलं व्रत इतिशाब्दबोधवारणा
य एकदा एकधर्मिणि एककर्तृत्वैककर्मत्वमव्युत्पन्नमिति कल्पनि स्वीकारः । पाचकः ७
पचतीत्यत्र पाकजनकः पचतीति शाब्दे दयात्रा कृतिशक्तिमते दोषः । अत्रेदं विचार्यते । स्वरितञि
तः कर्त्रभिप्राये । क्रियाफले इत्यनुशासनेन स्वकर्त्रभिप्राय इत्यस्य कर्त्तारं चेदभिसंबधातोऽस्यार्थकरणे
न कर्तृगतफल एवात्मनेपदप्रयोगः । तथा च प्रत्ये विर्वां यजेतेति विधौ आत्मनेपदश्रवणात्
स्वगतफलकामनयैव प्रक्षरणी यागेऽधिकारः नन्वपि श्राद्धि स्वर्गकामनया दुर्गापाठादौ स्वगम्यात

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

थैवक्लृप्तिः कल्पत इति पाणिनिमुनिः। अभिप्रायेत्यस्य इच्छावाचकत्वे तु कर्त्रिच्छाविषयफल एवात्मनेप
दस्य साधुत्वं यत्र हि स्वगतफल एव कामना तत्राप्यधिकारः। नच तर्हि प्रत्युदाहरणाभाव इति वाच्यं। यज्ञ
निर्याज्ञिका इत्यादेः प्रत्युदाहरणस्य सामञ्जस्यात् याज्ञिकस्य स्वीयवेतन एव लिप्सा न तु तायमानकामना
विषये इति अत एव भवति मूलं नरति ब्रह्महत्यां योऽश्वमेधेन यजत इत्यात्मनेपदस्मरणात्। पितृर
क्षकपुत्रवधजनितपापक्षयकामनया च रघुनाथस्याश्वमेधाचरणं यत् तत्तद्धि नाभिप्रायेश्च स्येच्
छावाचकत्वेन निर्वहति इति निचस्त्वकीयब्रह्मराक्षसवारणवधजनितपापक्षयकामनयेव तदनुष्ठा
नं। इति युज्यते चैतत् अंधकपुत्रस्य शूद्रवन्नद्वधजनितपापक्षयार्थं ब्राह्मणवधप्रायश्चित्तानुष्ठानानु
पपत्तेरिति वाच्यं। रावणवधपापक्षयकामनया रामेश्वरशिवस्थापनमेव कृतं ब्रह्महत्यापापप्रायश्चि
त्तस्य मुनिवधपापक्षयकारकत्वात् तदनुष्ठानं त्वकं रामायणे बु। तथापि कर्त्रिपरस्मैपदं यथा स्वमं।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गंकयति इत्यादावितिमनिकृतः। अत्र पचति पक्ष्यति अपाक्षीदित्यादौ वर्त्तमानत्वभविष्यत्वातीतत्व
प्रत्ययात् वर्त्तमानत्वेन ध्वादिना वर्त्तमानप्रागभावप्रतियोगित्वेऽभविष्यत्वे लुङादिना वर्त्तमानध्वंसप्रतियो
गित्वरूपेऽतीतत्वेन लुङादिना शक्तिः। अत्र वर्त्तमानत्वं ननतन् कालसंबंधित्वं। निखिलकालस्यैव वर्त्तमा
नत्वेन भविष्यति अतीते कालेऽव्याप्तिकाप्तेः। नापि तत्प्रयोगाधिकरणक्रियादिरूपकालोपाधिवृत्ति-
त्वं तन्न कृते रतीतत्वदशायामपि चैत्रेतादृशक्रियावृत्तिपाककृतिमत्वस्याबाधात् चैत्रः पचतीत्यादि- ८
प्रतीत्यापत्तेः। अत्र सांप्रदायिकाः तत्प्रयोगजन्यवर्त्तमानत्वश्याब्दबोधं प्रति तत्प्रयोगाधिकरणक्रियावृ
त्तित्वप्रकारकज्ञानस्य हेतुत्वात्। अतीतत्वं च निरुक्तवर्त्तमानध्वंसप्रतियोगित्वरूपं क्वचिदंडीतका
लावच्छिन्नत्वमपि यथा नापाक्षीदित्यत्राभावान्वयितीतितत्वं तत्र नञर्थ एवातीतकालावच्छिन्नत्वमेवा
तीतत्वं भासते। तेन कृतपाकेन नापाक्षीदिति प्रयोगः। अन्यथा कृतपाकस्यापि अतीतकालावच्छिन्नाया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कृतेश्च भावस्य सत्त्वात् कृतपाकेऽपि पुरुषेणापाक्षीदिति प्रयोगस्य वर्त्तमानत्वापत्तेः । अस्मन्मते तु
पाकानुकूलकृत्यभावस्यातीतकालवृत्तित्वाभावान्नायं दोषावसरः । न वा वर्त्तमानध्वंसप्रतियोगित्वलक्ष
णातीतत्वस्याभावे बाधेऽपि क्षतिः । अतीतकालावच्छिन्नत्वस्यैवातीतत्वात् । भविष्यत्वं च वर्त्तमानप्रागभा
वप्रतियोगित्वं वर्त्तमानत्वं च निरुक्तमेव ग्राह्यं । अतो न दोषः । अभावि त्रि घटे अद्य भविष्यतीति प्रत्यय
वारणाय प्रतियोगिनि देशकालान्वयस्वीकारेऽपि गेहोत्पत्तिसमये भूतलवर्त्तिनि घटे भूतले घटो भविष्य
तीति प्रत्ययवारणाय वर्त्तमानप्रागभावप्रतियोगित्वे सति एतत्कालएतद्देशवृत्ति तदुत्पत्तिकत्वमे
व भविष्यत्वं इति तु नव्याः । परे तु कालस्य प्रागभावे देशस्य प्रतियोगित्वयेऽप्ययं दोषः कालस्य प्रतियो
गिनि देशस्य प्रागभावे त्वये तु नायं दोष इति वदन्ति । एवं क्वचित् भविष्यत्सामीप्ये वर्त्तमाना भवन्ति । य
था कदा गमिष्यसि एष गच्छामीति । भविष्यत्सामीप्यं तत्प्रयोगाधिकरणक्रियावृत्त्युत्पत्तिकाध्वंस

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रतियोगित्वे सति प्रागभावप्रतियोगित्वं तथा चोक्तध्वंसप्रतियोगिप्रागभावप्रतियोगिगमनानुकूलकृतिमानयःमिति शाब्दधीः।
अत्र पाणिनेः वर्तमानसामीप्ये वर्तमानवद्वेति सूत्रात्वर्तमानताया विधानात्। कदागतोसि अयमेव आगच्छामीत्यत्र भूतसामीप्ये
वर्तमानाभूतसामीप्यं च वर्तमानक्षणावृत्ति [illegible] ध्वंसप्रतियोगित्वं वर्तमानत्वं च वक्ष्यमाणविशेषणविशिष्टभूतस्य लकालमादाया
नोन दोषः। उर्गोक्तं। एवं तेनोपरतश्चैव वक्ष्यते विरत एव च। नित्यप्रवृत्तः सामीप्यो वर्तमानश्चतुर्विधः। इति पूर्वपूर्वस्मिन् विभागो ह्यासा
मीप्येन तदन्तर्भावः। किंतु छात्रा च परं तत्प्रश्नस्य विषयः। चिरध्वस्तस्त्रियास्थले पिता दृश्यत्यानां क्रियायाः अनुवर्तमानत्वप्रति २
संधानदशायामेव नादृष्टप्रतियोगस्य साधुत्वं तथा च वर्तमानक्षणावृत्तित्वप्रसंधानविषयक्रियानुकूलव्यापारं तत्र सम्यत्र धीः
एवं भूतकारणवत्स्मश्चस्यने नातीतकाले क्रियानिपत्तेरप्यतीतकालत्वमर्थः। अत्र वदंति। एवं वा चैत्र लृप्यतन्तरानत्सपक्षत इत्या
दिप्रयोगात् आपादकतावच्छेदकधर्मप्रकारेण वक्त्रिपातिपत्त्या बोध्यते। आपादकतावच्छेदकधर्मः पक्षासत्त्वं आपन्नोप
शान्तनिर्वन्नानहेतुः अतोपि विषयतयावच्छेदकं पक्षासत्त्वमत्रेति एवं लाभ्यदशायां तदेशावच्छेदे एधन्नानतो वदि दोषः। यत्रा

ज्ञान २ सत्या १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लेनयत्नरूपेणतादृशप्रयोगः।तत्कालावच्छेदेनतत्स्वरूपेआपादकाभावत्वमपेक्षितंवस्तुतस्तुक्रियाविपत्तेरभावएवार्थः।तथाच
एधोओदनपातओदनमपक्ष्यतइत्यत्रएवंलाभाभावप्रयुक्ताभावप्रतियोगिपाकानुकूलकृतिमानइतिधीः।प्रयुक्तत्वंचकाला
भावप्रयुक्तः कार्याभावइतिप्रतीतिसाक्षिकस्वरूपसंबंधविशेषएवनचतथापिएधलाभदशायामपितादृशप्रयोगापत्तिरि
तिवाच्यं।एककालावच्छेदेनैकशरीरावच्छिन्नत्वप्रयुक्तत्वएतदुभयसंबंधेनएधलाभाभावप्रतियोगिपाकानुकूलकृतिमानह
मितिधीः।अतोनदोषः।अन्येतुएधांश्चेदलप्स्यतओदनमपक्ष्यतइत्यत्रएधलाभाभाववानहं।ओदनपाकानुकूलकृत्यभाव
वानहमितिधीः।ननुतदुभयवाक्येनविशिष्टवैशिष्ट्यधीरित्थंचएवंलाभदशायांनैतादृशप्रयोगः।तदानीमेधनाभावस्याभावात्।
नवाविभक्त्यर्थद्वयस्यपरस्परान्वयबोधस्वीकारादस्तुत्यन्निस्वीकारइतिवदंति।तदसत्तथासति।एधांश्चेदलप्स्यतजल
मभक्ष्यइत्यादिप्रयोगापत्तेः।कार्यकारणस्थलएवतथाप्रयोगोऽतिप्रसक्तानांतत्प्रयत्नकृत्यरणाच्चैत्रस्यवनमित्यादौकृत्यरणाज
न्यचैत्रवनवृत्तिनमित्यन्वयबोधात्।विभक्त्यर्थद्वयस्यापिपरस्परान्वयबोधस्यक्वचित्स्वीकारादित्तिन्नचाबाधितरूपपंचम्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

र्थसंवमे कथं जन्यत्वमर्थ इति वाच्यं। तथा सति यत्र एकदैव क्रयाणां प्रतिग्रहस्तत्रापि क्रयणा व्यवहारानापत्तेः तत्र नावधि
त्वं दानस्यापि सत्वात् त्रिलोचनदासमनाथ क्रियातिपत्तेर्नैक्रियातिपत्तिरित्यत्र क्रियाया अनिष्पत्तं क्वचित् कारणावैगुण्या
दनिष्पत्तिरित्युक्ते न सामयमर्थः। कारणाभावप्रयुक्तकार्याभाव एव पर्यवस्यति। अथ यदि अभाव एवार्थः क्रियातिपत्तेः
तदाहृदे यदि धूमेनस्यमय मोस्यन्तदा वह्निमित्यादौ का गतिः न हि संयोगाभावप्रयुक्त एव वह्निसंयोगाभावः कार्याभावस्ये
वकारणाभावप्रयुक्तत्वात् इति चेन्नस्मं। अत्र। साधुरेव क्रियातिपत्तिः क्वचित् कारणावैगुण्यात् क्रियाया अनिष्पत्तिरिति त्रि
लोचनव्याख्यानं। पद्मनाभमते विवक्षितात् परपदस्तत्क्रियातिपाद्यर्थाभावप्रयुक्तत्वं पूर्वपदस्थक्रियातिपत्त्यर्थाभावे भा १०
सते न तथाच वह्निसंयोगाभावप्रयुक्तोऽभावप्रतियोगिधूमसंयोगवान् ह्रदश्चेत्यर्थोजननार्थबोधः अत्र यद्यपि धूमसंयो
गं प्रति वह्निसंयोगस्याभावहेतुत्वं नास्ति तथापि तत्प्रयोजकत्वात्तादुपपत्तिः प्रयोज्यप्रयोजकयोरभावेपि तथापरंपरं तथाक्रि
यात इति॥ अथवा लाघवाद्भावे शक्तिकल्पनेन तत्रापादकत्वे आपत्तौ लक्षणेति विभक्त्यर्थत्वस्य परंपरान्वयबोधस्तु कस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रामश्चेत्सधनेविद्यादिस्थलाठीधामक्षाविदंगीक्रियन्तैरएव॥ यदिसहस्रवर्षमजीविष्यंतदाशतपुत्रमजनयिष्यंमेघाभिर्वा
रितकालविशेषोयमर्थः संभावनाभविष्यत्वंचक्रियातिपत्तेः।तथाचानिर्धारितकालविशेषकृतिसहस्रवर्षजीवित्वप्रकार
कसंभावनावानहंभविष्यत्तेशतपुत्रमजननक्रियोन्प्रकारकसंभावनावानहमित्याकारकधीः।एवंयदिशिलाःकोमलाःअभवि
ष्यंततदाकोमलमभविष्यंतइत्यत्रापिनात्वंनिरुक्तार्थःक्रियातिपत्तेःतथाचतातकोमलत्वप्रकारकसंभावनाविषयीभूताःशि
लाःकोष्ठकर्तृकभक्षणकर्मत्वसंभावनाविषयाभिन्नाइतिधीरितिवहवः।तन्नतहकृत्संपत्तिदशायाप्रसिक्रियातिपत्ति
प्रयोगापत्तेः।अनिर्धारितत्वसंभावनात्वयोरुक्तत्वाच्च॥अथपरोक्षाः।तत्राक्षाणांपरंपरोक्षमितिव्युत्पत्त्यालौकिकप्रत्यक्षा
विषयएवपरोक्षातदापरोक्षायातुत्तमपुरुषवचनंव्यर्थंस्यात्।अहंजगामइतिप्रयोगस्यासाधुत्वापत्तेश्चेतिचेत्।लौकिकप्र
त्यक्षाविषयत्वविवक्षायामेवसाधुत्वात्।अतएवोक्तंक्वचित्तव्यासक्तेभवतियथासोहंकिंचकार।एवमत्यंतापह्नवेपरो
क्षाइतिसूत्रंनह्किकलिंगंजगामइतिगमनदोषभयात्प्रश्नस्यमप्यपहुतेप्रश्नकर्तृप्रतिपत्तिविरोधस्ययथार्थत्वप्रतिपत्त्यर्थकृ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लङ्वत्प्रयोगोऽपह्नवः। तथा च कलिङ्गकर्मकगमनप्रतियोग्यनुकूलव्यापारवानित्यन्वयधीः। अथ पंचमीः पंचम्यनुमत्यादिष्वनुज्ञा
मन्त्रणप्रश्नेषु स्यादित्यर्थः। सा च स्वारसवाहिनी इच्छा सा च वर्त्तमाना भविष्यद्विषयिणी एव। तथा च वर्त्तमानक्षणवृत्तिप्रा
गभावप्रतियोगी इच्छाविषयीभूतघटविषयककृतिमांस्त्वं वर्त्तमानप्रागभावप्रतियोगीच्छाविषयीभूतघटकर्मककृतिमांस्त्वम् इ
निवाधीः। अत्र कथं गच्छ गच्छसि चेत्कान्त पन्थानः सन्तु ते शिवाः ममापि जन्म तत्रैव भूयाद्यत्र गतो भवानित्यन्वयधीः। इच्छं दंडवा
नित्यादिवत् गच्छ गच्छसीत्यस्य निराकांक्षत्वात्। अनुमतिविषयीभूतगमनानुकूलकृतिमर्थकस्य गच्छेत्यस्य गमनानुकूलग
च्छामीत्यर्थस्यान्वयाधीयोग्यनाकांक्षितत्वात्। तथा च गमनानुकूलकृतिमान् अनुमतिविषयीभूतगमनानुकूलकृतिमानिति ११
धीरिति वाच्यम्। आख्यातार्थे इष्टतावच्छेदकताबोधप्रयोगसामर्थ्यात्। कथमन्यथा एवं न गच्छतीति वत् एवं तीनत्वशास्त्रधीर
ति चेन्न सत्यम्। अत्र गमने इच्छावानत्र अनुमतिविषयीभूतगमनानुकूलकृतिमानिति धीः इच्छावाचकचेनत्र शब्दप्रतिपाद्येच्छाधर्मि
तावच्छेदककशास्त्रधीजननान्न दोषः। आख्यातात् निरर्थका एव आपदीरुधा दिवसप्रमबिन्दवनुज्ञासनात्। कृतिमाख्यातं बल

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वदनिष्टाननुबधीष्टसाधनत्वबोधसप्तमीचकारसमुच्चिता पंचमी च साधुः। तथा च स्वर्गकामो यजेतेत्यत्र स्वर्गकामनावानब
लवदनिष्टाननुबंधीष्टसाधनीभूतकृतिसाध्ययागानुकूलकृतिमानिति धीः। एतदर्थे क्वचिद्वर्त्तमाना भवतीति यथा ऐंद्रंदधिमवसमा
स्यामिति वाक्ये मावास्याधिकरणकदधियागइष्टसाधनमिति धीः। एवं हेतुहेतुमतोर्लिङिति अनुशासनात्। यो ब्राह्मणायावगुरे
त्तं शतेन यातयादित्यत्र ब्राह्मणावगोवनंथाः शतयातनावानिमानयधीः। इति प्रभाकरमिश्राः। मीमांसकास्तु उदितापूर्वस्यावाच्य
तया अपूर्वघटितजनकताया न बोधः किंतु पूर्ववर्त्तित्वमुत्तरवर्त्तित्वमवगम्यते व्यापकतालाभस्तु यद्यागप्रागभावस्समुत्पत्तिव
लात्तथात्वमानस एव तच्च जनकत्वजन्यप्रमयो न तु शाब्दः। यद्यपि यत्यागप्रागभावस्तुत्पत्तिवलाद्व्याप्त्यैव लभ्यते। ननु व्यापकता
यथा यो यो धूमवान्सोग्निमानिमादौ तथापि वैदिकस्यलेनादृशव्युत्पत्तिर्व्यापकतैवं यथा यो गंगायां स्नाति स स्वर्गी भवतीत्य
त्र गंगास्नानस्य स्वर्गजनकत्वं लभ्यत इति न च तत्र सुकृतापूर्वस्य वाच्यत्वात्। शब्दात्स्वर्गजनकत्वमेव प्रतीयत इति वाच्यं यः परस
रांतृगच्छतीत्समानकोभवतिस्यात्तथाभावादिति वदंति। अथ कर्मवत्कर्मकर्त्तैत्यनुशासनात्कर्मत्वारोपककर्तृत्वबोधए

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वंलयते केदारः स्वयमेवाभिधत्ते कुशलः स्वयमेव स्यादो नेदृशात् फलस्य पारगामित्वस्य जन्मफलशालिकेदारवृत्तिधीः न चैकं
दाकर्तृत्वकर्म्मत्वमप्युपपन्नं इति दीधितिकृद्भिः कथमेकदा कर्तृत्वकर्म्मत्वबोधकत्वमेवेत्याख्यातं । एकस्मिन्धर्म्मिणि कर्तृत्वकर्म्मत्वबो
धकत्वं वाप्युपपन्नं किन्तु भिन्नधर्म्मिणि तादृशबोधजनकत्वं अतएव चैत्रः पचते ओदनः स्थाल्या इत्यादौ न प्रयोगाः इति संप्रदायविदः । परे तु क
र्म्मवत्कर्म्मकर्तृत्यत्र नैकदा कर्तृत्वकर्म्मत्वबोधः तथा सति तादृशात्मनेपदस्यानुपपत्तेः कर्म्मत्वादेवात्मनेपदं भविष्यति । परसम
वेतक्रियाजन्यफलशालित्वं कर्म्मत्वं तत्र भानान्तराद् अभेदस्य स्वाश्रितत्वसम्भवात् । ननु यथा कर्म्मत्वादात्मनेपदं तथा कर्तृत्वा
त् परस्मैपदं भवत्विति चेन्न । तत्र परस्मैपदस्य कर्तृत्वबोधने असामर्थ्यात् । अस्तु वा एकदा एकस्मिन्धर्म्मिणि कर्तृत्वकर्म्मत्वबोधार्थ १२
एतत्सूत्रस्य प्रणयनं सार्थं तथापि पच्यते ओदनेन स्वयमेव इत्यत्र भावेऽपि शानिष्ठजनकतानिरूपितजन्यता शालिकर्म्मकर्तृत्वस्य
स्याप्यत्वेनास्य का गतिः तस्मात्तत्र कर्म्मत्वस्य बोधो न जायते एवं किन्तु कर्तृत्वस्य कर्त्तरि आत्मनेपदस्य लघुत्वार्थमेव तादृशसूत्रा
भावस्याभाव इति वदन्ति । अथोपमानादाचरतीत्यर्थे औत्रयति मानैककमिव पञ्च पुत्रमारस्य एवंप्रकारकमानसविषयकज्ञानविशेष

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वानित्यन्वयधीः आचारभ्यात्र शांनविशेषस्य एवं कर्त्तुर्व्याप्तिः मनोपत्तेस्यतु ग्रामनात् इयेनायतेत्र कोरश्यत्रश्येनमस्यश
कर्म्मविशेषवानयमितिधीः। एवंश्चार्थेभ्रमनित्यन्तु शासनात्। ग्रामंजिगमयतीत्यत्र ग्रामकर्म्मकगमनेच्छावानयमित्यन्वयधीः
चिकीर्षेत्यत्र सनोधात्वर्थगोचरेच्छावाचित्वात्। कृतिसाध्यत्वप्रकारकेच्छात्वप्रकारकशाब्दस्यानुभवसिद्धत्वात् तादृशवाद
कारणेनो कृतिसाध्यत्वविशिष्टलक्षणयामादृशान्वयधीः न च सर्वत्र धात्वर्थस्य सनः प्रतिपाद्येच्छायां विशेष्यतयैवान्वय
स्यानुभवत्वात्। कथंचिकीर्षा इत्यत्र कृतिसाध्यत्वप्रकारकेच्छायाबोधश्चैवासं। ग्रामोजिगमिष्यते देवदत्तेनेत्यत्र कर्म्मप्र
त्ययस्थले गमनप्रकारकेच्छाविषयो ग्राम इत्यन्वयबोधस्यानुभवसिद्धत्वेन तत्रापि तत्रोक्त एव पंथाः। अथाकाशे तिष्ठामती
त्यत्र कीदृग्बोधः न तावत् आकाशवृत्तिस्थितिगोचरेच्छायानुवेत्यत्र इत्यन्वयधीः आकाशाधिकरणकस्थितेर्वप्रसिद्धेः न च स्थागति
निवृत्तारिति श्चतेः स्था भागामिष्विकृतिदाभागस्यापि तदर्थकत्वमस्य चाकाशेः वाधितत्वात् नानुपपत्तेरितिवाच्यं नहि स्थाधातोः
केवलगतिनिवृत्तिरेवार्थः। किंतु स्थागतिनिवृत्तारित्यत्र गतिक्रियायानिवृत्तिर्यस्यामिति उत्तमया संयोगविशेषो नवेतत्तवानां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तच्चेक्षणीयास्य चित्कालिकविशेषणतयाबोधः तथा च तादृशसंयोगस्याकाशेबाधितत्वात् । तद्देशत्वादवस्थ्यात्स्याकाशवृत्तित्वप्रकारकत्व
मीच्चा वानिसंन्नयधीः एवंरूपंगमिष्यतीत्यादिष्वपि एषैव रीतिरिति वाच्यं । तथा सति प्रकृत्यर्थान्वितस्वार्थबोधकत्वं प्रत्ययानामिति व्युत्पत्ति
भंगप्रसंगः तदर्थस्य प्रकृत्यर्थस्य विशेष्यतया प्रत्यर्थभासते नेतरस्येति कथं मनोरथेः शब्दायां प्रकारतायां प्रकारतया आकाश वृत्तित्वरू
पकर्म्मत्वस्याभानमिति चेन्नमं यथा अर्द्धपिप्पलीमानयेत्यत्र पकुंभ आनय अतिरात्रे षोडशीनं गृह्णातीत्यादिः तादृशव्युत्पत्तिभंगः तथा च
पीति वाच्यं । एवमिनो हेतुकर्त्तृव्यंजकत्वात् यज्ञदत्तं भोजनं कारयति देवदत्त इत्यत्र यज्ञदत्तवृत्तिभोजनानुकूलव्यापारवान् देवदत्त
इति धीः इन्प्रत्ययस्यानुकूलव्यापार एवार्थः । यदि चात्मानं भोजनं कारयति देवदत्त इत्यादौ न प्रयोगाः तदा भेदोप्यर्थः । तत्र च प्रतियोगितया द्वि १३
तीयसमभिव्याहृतेनान्वेति नामार्थान्वेति अनुयोगितया च प्रथमासमभिव्याहृतनामार्थेप्यन्वेतीति यद्द्वितीयायाः कर्म्मत्वयोरेवार्थः
कर्म्मत्वं च परसमवेतक्रियाजन्यफलशालित्वं । तथा च भोजनकर्म्मक यज्ञदत्तवृत्तिकृतौ जनकीभूत यज्ञदत्तान्यसमवेतव्यापारवान् दे
वदत्त इति धीः । अत एव अजिनत्रनेष्यः कर्त्तान्याद्विनत्नेक्ष्यः कर्त्तास्यादिनं तेनैव कर्म्मस इति साधु संगच्छते । एवं तत्कर्षितितदाविष्टद्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्यनुशासनात् । मुंडयतीति मुंडशब्दात्कृत्कृतिमान सूत्रयतीति सूत्रकर्म्मकथनानुकूलव्यापारवानिति धीः अत्र यद्यपि तत्करोतीत्यर्थे
णिचोऽनुशासनार्थं आख्यातार्थेवानुकूलव्यापारलाभसंभवात् । तथापि मुंडयतेत्र राणिजिलि कृतेनुंडाविभागान्नरूपिताद्धात्वर्थस्थि
आनुभविकत्वेन तदुपादानमिति दिक् ॥ ॥ एवं धात्वोः शब्दे क्रीयीनं क्रियासमभिव्याहारे हेतुशासनात् क्रियायाः समभिव्याहारः पौ
नःपुन्यं पास्मतत्र यथा काव्यवहितो नरपाकानुकूलकृतिमान चैत्र इति धीः । आख्यातस्य तत्र यादेव वत्सलक्षणाव्यवहितो नरश्वेलनानु
कूलव्यापारवान ताद्दशास्वलनाश्रयो वा इति धीः । अत्र समर्थात्कोटिल्ये क्रुशमनुशासनात् समर्थधातोः कौटिल्यार्थ एव साधुः । यथा च क्रम्य
तश्चक्रे कौटिल्यं एकदाना नास्ते द्यसक्तित्वं अतिप्रसंगात् किन्तु वैजात्यविशेष एवेति वम्भमीति व्यादेनुगं चंक्रीयां चलयते तत्र पश्यति त
त्र्यथाकर्म्मत्रास्य रगात् शाब्दबोधात् कुत्रापि तु गंचंक्रीयीत सम्प्ररणात् । या रूधीः तयाच स्व मणात् नेव्यवहितो तरस्व मनानुकूलव्यापार इति
धीः । अत्र केचित् । समर्थात् इति कौटिल्ये क्रुशमनुशासनात् । एवं भ्रमीत्यादौ कौटिल्यमेवार्थः प्रतीयते इति पौनःपुन्यमिति प्रतीयते तत्
पौनःपुन्यमिति प्रतीयते स्व कारस्कारमादिति तत्र मन । पौनःपुन्यं प्रतीयत एव अधिकं कौटिल्यं एवकारणात् कौटिल्यार्थमपहाय पौनःपु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नैमियसमाधानमानर्थमेवप्रज्यतेइतिमनाम्।अथाकाशत्वं नपक्षतावच्छेदकः नैनंदहतिपावकइत्यादौरूपत्वं गन्धत्वादौ च कीदृशान्वयबो
धः नचाकाशविषयकत्वाद्यभाववान्धः नाद्यशब्दार्थकर्म्मकज्ञानजन्यफलव्यापाराभाववान्घटादिः रूपकर्म्मकगमनजन्यफलव्यापारा
भाववान्चैत्रइत्यन्वयधीरितिवाच्यं।सर्वत्रप्रतियोगिप्रसिद्धेः नचाकाशविषयत्वाभाववान्घटइत्यन्वयधीरितिवाच्यं।आकाशविषय
त्वाभाववत्त्वास्तु घटत्वान्वयितानवच्छेदकत्वात्।कथं तद्धर्म्मावच्छिन्नाभावेन ज्ञापयितुं न शक्यते अन्यथा अतिप्रसंगात्।अन्वयिताव
च्छेदकत्वं च भावान्वयेनतद्धर्म्मावच्छिन्नान्वयो भवतीत्यपि न किंचिदेतत्।एकपदार्थस्यापरत्वयभानेऽपि न सार्वत्रिकं।अपि च।आकाश
विषयत्वाभाववत्त्वास्तु घटत्वान्वयितानवच्छेदकत्वात्।कथं तद्धर्म्मावच्छिन्नाभावेन ज्ञापयितुं शक्यते अन्यथा अतिप्रसंगात् अनुमि १४
तिवच्छेदकं च भावान्वये यद्धर्म्मावच्छिन्नान्वयो भवतीति किंचिदेतत् एकपदार्थस्यापरत्वयभानेऽपि सार्वत्रिकं।अपि च।आकाशवि
षयत्वाभाववत्त्वास्तु घटत्वावच्छिन्नाभाववानित्यन्वयबोधे आकाशं न पश्य घटमपि वाक्यात्।वास्तुवानाकाशं पश्यतीत्येवमिसंदेहात्तदुप
पत्तिः वास्तुघटत्वावच्छेदे आकाशविषयत्वाभाववत्त्वानुग्रहात् कथं वास्तु घटत्वविशिष्टे आकाशविषयताग्रहः।एतेनाकाशविषयत्वाभा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

त्वा
वव चाक्षुषत्वयितान्यवच्छेदकत्वात् तत्सम्बन्धावच्छिन्नाभावेन ज्ञाशेवयितुं न शक्यते इति चाक्षुष आकाशविषयत्वाभावो उभयमेवाभा
वः न ज्ञाबोध्यत इति परास्तं । तथासति आकाशं पश्यति न चाक्षुषमिति संशयानुपपत्तिः अंशतः घटं पश्यति न चेति संशयानुपपत्तिश्चा
क्षुषत्वावच्छेदेन न जायते समवेतत्वाद्याभावस्य आकाशविषयत्वाभावस्य च बोधनात् । न च चाक्षुषत्वसामानाधिकरण्येन तदुभयाः
भावविशिष्टद्विशिष्टिरिति वाच्यं । तथासति आकाशं न पश्यतीति वाक्यजन्यशाब्दबोधानन्तरमपि आकाशं पश्यत्यर्थ इति वाक्यजन्य
शाब्दापत्तिः सामानाधिकरण्येन बाधनिश्चयस्य सामानाधिकरण्यसंबंधेन तद्विशिष्टबुद्धेः प्रतिबंधकत्वात् । नञ्ञ अभावबो
धने अनुमितावच्छेदकावच्छेदेन बोध्यत इति व्युत्पत्तिविरोधाच्च न चाकाशविषयत्वसमवेतत्व एतदुभयत्वावच्छिन्नाभावेन आबोध्यते त
था च आकाशं न पश्यतीति शाब्दानन्तरं चाक्षुषमानं आकाशं पश्यति न संशयानुपपत्तिः नाहं शोभयत्वावच्छिन्नाभावस्य विशिष्टबुद्धि
हि न प्रतिबन्धकधर्मावच्छिन्नविशिष्टत्वनाद् द्विविधत्वादिभवति च घटपटोभयाभाववद्भूतलमिति ज्ञाने भूतलं घटवदिति विशिष्टबु
द्धिरिति वाच्यं । तथासति आकाशं पश्यत्यर्थ इति शाब्दापत्तिः । केचित्तु चाक्षुषे तादृशोभयाभाववत्ताज्ञानं आकाशवच्चाक्षुषमवगतौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तुषिमर्थे विरहांगवाथमन्यथाहि तु सामानाधिकरण्याभावप्रतियोगितायां साध्यतावच्छेदकसंबंधावच्छिन्नत्वं साध्यतावच्छेदकीभूत-
धर्म्मावच्छिन्नत्वं च तदुभयाभाववत्त्वं लक्षणं व्याप्तिज्ञानस्य साध्यतावच्छेदकसंबंधावच्छिन्नसाध्यतावच्छेदकधर्म्मावच्छिन्नप्रतियोगि
ताकाभाववद्वृत्तित्वलक्षणव्यभिचारग्रहविरोधित्वमिति वदंति। तन्न भवदीयं तद्व्यभिचारस्यैव साध्यतावच्छेदकसंबंधावच्छिन्न
त्वसाध्यतावच्छेदकावच्छिन्नत्वैतदुभयवत्त्वान्नादृशप्रतियोगिताया: तथापि न कोपि दोष:। न च घटपटोभयाभाववदिति ज्ञा
नानंतरं कदाचित् घटवत्तद्वृत्ति ज्ञानं जायते न त्वेकदा घटवत्पटवदिति ज्ञानं तथा च कथं तादृशोभयाभाववदिति ग्रहानंतरं आ १५
काशं पश्यत्यर्थ:। अत्र चाक्षुषत्वे आकाशविषयत्वासमवेतत्वरूपे वबोध इति ज्ञावबुद्धीरायाश्चतत्त्वमिति वाच्यं। तथा च तादृशोभयाभाव
वदिति ज्ञानानंतरं चक्षुष्मानाकाशं पश्यति न वेति समूहालंबनसंशयो मा जनिष्ट तेनाकाशविषयत्वाभाववच्चाक्षु
षत्वं धर्मितावच्छेदकीभूतांशसमवेतत्वाभाववत्त्वांशसमवेतत्वाभाववच्चाक्षुषत्वं च धर्मितावच्छेदकीभूतमाकाशविषयत्वाभा
वविशिष्टबुद्धि: अतस्तादृशज्ञानानंतरं चक्षुष्मानाकाशं पश्यति न वेति संशयस्य चानुपपत्तिरिति परास्तं। तथा सति आका

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शं प्रत्यक्षमिति शङ्कानंतरमपि आकाशं प्रत्यक्षमिति शङ्कोदयप्रसंगात्। अत्र हि शुद्धचाक्षुषविशिष्टे आकाशविषयत्वस्य
अवगाहनादाकाशविषयकं चाक्षुषम्। ऽन्वेवगाहनाच्च तस्यान्वयितानवच्छेदकत्वेनाभावप्रतियोगितावच्छेदकत्वासंभवाच्च। अ
त्र वदंति· आकाशविषयित्वनिष्ठानिरूपिताया प्रतियोगिताकाभावोऽवगाहात्। नाऽऽकाशवाक्येनाकाशविषयीत्वेन चाक्षुषाभाववानि
ति प्रत्ययस्याक्षिक एतादृशाभावशाविषयं च साक्षात्कारत्वनिरूपितं ज्ञायते नाऽऽशगोचरालौकिकचाक्षुषवत् एतद्येव चक्षुष्माका
शं न पश्यतीत्यत्रानुपपत्तिः तत्प्रसिद्धस्तु ईश्वरज्ञानादौ योगिज्ञाने वर्त्तिव्यधिकरणधर्म्मस्य प्रतियोगितावच्छेदकत्वस्वीक्रिय
ते प्रतियोगितावच्छेदकतावच्छेदकत्वन्तु अंगीक्रियत एव अत एवमनिरुक्ततापुक्तं। प्रतियोगप्रवृत्तिः धर्म्मो न प्रतियोगितावच्छेदक इ
ति न तु प्रतियोगितावच्छेदक इत्युक्तं। अत एव पीतः शंखो नास्तीति शाब्दस्य नानुपपत्तिः तत्रापि पीतत्वेन शंखाभाव इति वाच्यं। य
था श्रुते प्रतियोग्यप्रसिद्धेः। एतेनु पीतः शंखो नास्तीत्यत्र पीतेशंखत्वावच्छिन्नप्रतियोगिताकभेदो भासते तथा च नानुपपत्तिरिति
न दसत्। पीतशंखो नास्तीत्यत्र तथापि गत्यंतराभावादुक्तेवगतिः न ओसंताभाववोधने यथाऽऽयोगिनिस न तस्यापेक्षिता तथान्यो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्याभाववोधनेपिसमानविभक्तिकत्वंतंत्रंकथमन्यथाभूतलेघटोनेत्यत्रभूतलेनघटान्योन्याभावप्रत्ययःतथाचतत्रापीतपदेतरविभक्तेर
भावात् नतादृशधीः नचाभावान्वयस्यभावान्वयेतादात्म्यसंबंधेनसमानविभक्तिकत्वंतंत्रं अपितुविरुद्धविभक्तिकत्वादियमेवकथम
न्यथानीलोत्पलमित्यादौतादात्म्यसंबंधेनान्वयधीरितिवाच्यं।अनुभवबलादसमानविभक्तिकत्वमेवतंत्रंविभक्तिश्चात्रप्रथमैवहि
कस्यचिदपीतशंखोनास्तीत्यत्रान्योन्याभावोनुभवसिद्धः।किंतुअत्यंताभावएवएवंयदिचयकेएगाधर्म्मस्यप्रतियोगितावच्छेदक
त्वमिवतदवच्छेदकत्वमपिनांगीक्रियतेतदाऽपार्थकमेव।यद्यपिपीतशंखोनास्तीत्यत्रात्यंताभावबोधोनसंभवतितस्यानुयोगिनिस
त्त्वप्रत्यपेक्षितत्वात्तथापितत्रशंखेतिपदाध्याहारात्तादृशबुद्धिः रूपंगच्छतीत्यत्ररूपकर्तृकाभावेनसाबोधयितुमशक्यते।तादृशरूप १६
कर्म्मत्वस्यालीकत्वात् नचरूपस्याभावःकर्म्मतायांबोध्यतेइतिवाच्यं।प्रातिपदिकार्थस्याभावेनसाबोधात् ।।श्रीः।। ।।वायुश्चै गौरख.
त्रेणानाजन्यचैत्रप्रत्यक्षविषयोनेतितिविप्रतिपत्तिः।विधिकोटिर्मीमांसकानांनिषेधकोटिर्नैयायिकानांचैत्रीयोपनीतभानात्मकप्रत्यक्ष
विषयत्वस्यवाक्येसत्वात्तदभावसाधनेबाधइत्यतश्चैत्रज्ञानाजन्यत्वप्रत्यक्षविशेषणांचैत्रीयोपनीतभानस्यचैत्रीयोपनायकज्ञानजन्य

इत्याख्यातवादः ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वात् अदोषः। नैयायिकमते चैत्रीयप्रत्यक्षमात्रस्यैव ईश्वरज्ञानजन्यतया ज्ञानाजन्यचैत्रीयप्रत्यक्षाप्रसिद्धिः अतः ईशेतरयोगिकोटे
र्ज्ञानांशे चैत्रीयत्वं निवेशितं चैत्रज्ञानाजन्यप्रत्यक्षविषयत्वस्य नैयायिकमते वायौ सत्त्वात् तदभावसाधने बाधः इत्यत आह प्रत्यक्षांशेऽपि
चैत्रीयत्वं निवेशितं। लौकिकसन्निकर्षजन्यज्ञाने उपनीतभानादिव्यावृत्तविषयताविशेषस्वीकारे तु वायौ लौकिकप्रत्यक्षविषयताश्रयो
न वेत्येव साधीयसी विप्रतिपत्तिः। अत्र मीमांसकास्तु यथेत्यनेन त्वक्संयोगादिघटितस्पार्शनसामग्र्याः वायावपि सत्त्वात् तस्य स्पार्
शनप्रत्यक्षविषयत्वे बाधकाभावात् वायुर्लौकिकप्रत्यक्षविषय एव। न च द्रव्यलौकिकप्रत्यक्षं प्रति रूपस्य हेतुतया गगनादिप्रत्य
क्षवारणाय क्लृप्तत्वात् रूपात्मककारणविरहात् वायौ लौकिकप्रत्यक्षविषयत्वं न संभवतीत्याद्य इति वाच्यं। द्रव्यप्रत्यक्षत्वस्य
रूपकार्यतावच्छेदकत्वे आत्मप्रत्यक्षे व्यभिचारात् द्रव्यचाक्षुषत्वस्यैव तथात्वस्वीकरणीयतया वायोः स्पार्शनोत्पत्तौ बाधका
भावात्। अथ बहिर्द्रव्यप्रत्यक्षत्वमेव रूपजन्यतावच्छेदकं वाच्यं। बहिस्त्वं च आत्मभिन्नत्वं अतो नात्मप्रत्यक्षे व्यभिचारः। न वा
त्मभिन्नद्रव्यप्रत्यक्षत्वापेक्षया लघोर्द्रव्यचाक्षुषत्वस्यैव तथात्वमुपपन्नमिति वाच्यं। तथा सति गगनादीनां स्पार्शनवारणाय द्रव्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्पार्शनं प्रति स्पर्शत्वेन हेतुतान्तरकल्पने गौरवात् न च भवन्मते आत्मभिन्नद्रव्यविषयकप्रत्यक्षत्वं द्रव्यविषयकमानसान्यप्रत्यक्षत्वं वा न च
तावच्छेदकभिन्नत्वविनिगमनाविरहात् कार्यकारणभावद्वयं अवच्छेदकगौरवं चेति तद्रूपेक्षया ऽन्यचाक्षुषत्वस्पार्शनत्वावच्छिन्नं
प्रति रूपस्पर्शयोर्भिन्नाभिन्नकारणताकल्पनमेवोचितमिति वाच्यं। मानसान्यत्वस्य प्रत्यक्षतांशे सामानाधिकरण्येनैव निवेशनीय
मयापि तद्रूपेक्षया आत्मभेदस्य विशेषणताविशेषसंबंधेन द्रव्यांशे निवेशलाघवेन विनिगमनाविरहासंभवात् इति चेन् न। आ
त्मभिन्नद्रव्यप्रत्यक्षत्वस्य जन्यतावच्छेदकत्वे द्रव्यनिष्ठावच्छेदकतायां किंचिद्विशिष्टस्यात्मभेदस्य विशेषणताविशेषेण किंचिद्वि ७
शिष्टस्य द्रव्यत्वस्य च समवायेनावच्छेदकत्वेन संभवति। तथाविधयोस्तयोरतिप्रसंजकत्वात्। किंतु तयोः सामानाधिकरण्यसंबंधेन
एकविशिष्टमपरं इति आत्मभेदविशिष्टद्रव्यत्वं द्रव्यविशिष्टात्मभिन्नत्वं वावच्छेदकतावच्छेदकमिति अवच्छेदकतावच्छेदकभेदात् का
र्यकारणभावभेदः। एवं आत्मभेदस्य सामानाधिकरण्यनिवेशस्यावश्यकत्वे लाघवानवकाशात्। सामानाधिकरण्यसंबंधेन मानसान्य
त्वविशिष्टप्रत्यक्षत्वस्यावच्छेदकत्वमादाय विनिगमनाविरहः। यदि च सामानाधिकरण्यसंबंधेन परस्परविशेषणविशेष्यभावापन्नयोर्द्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यांशे साक्षात्संबंधेन विशेषणतापन्नयोर्द्वयनिष्ठावच्छेदकतावच्छेदकत्वस्य पर्याप्तिस्वीकारात् तयोर्मिथो विशेषणविशेष्यभावेन विनि
गमनाविरहः। न वा सामानाधिकरण्यसंबंधेन मानसान्यत्वविशिष्टप्रत्यक्षत्वस्य जन्यतावच्छेदकत्वमादाय विनिगमनाविरह इति विभा
व्यते। तथा तु त्वप्रत्यक्षत्वाप्रत्यक्षांशे विशेषणतापन्नयोर्मानसान्यत्वप्रत्यक्षत्वयोः कार्यतावच्छेदकत्वपर्याप्तेरपि स्वीकर्तुं शक्यतया पू
र्ववदेव विनिगमनाविरहः द्रव्यचाक्षुषत्वे द्रव्यस्पार्शनत्वावच्छिन्नं च यो रूपत्वस्पार्शनत्वाभ्यां हेतुत्वकल्पनमेवोचितमिति। अथ द्रव्यत्वा
श्रयत्वस्य रूपजन्यतावच्छेदकत्वमतेपि द्रव्यस्पार्शनत्वावच्छिन्नं प्रति स्पर्शत्वेन रूपत्वेन वा हेतुताकल्पने तत्र विनिगमकाभावात्
द्रव्यस्पार्शनत्वावच्छिन्नं प्रति रूपत्वेनापि हेतुतासिद्धेरिति तथा च कथं वायोः स्पार्शनमुपपद्यत इति चेत्। न। वायोः स्पार्शनसंदेहे
द्रव्यस्पार्शनत्वावच्छिन्नं प्रति रूपत्वेन हेतुत्वे व्यभिचारसंदेहात्। निश्चितव्यभिचारकस्पर्शत्वावच्छेदेनैव कारणत्वकल्पनायाउ
चितत्वात् तथा चोक्तं परिमज्जनिश्चितव्यभिचारकरूपं गत्येमाणव्यभिचारकेण कारणत्वकल्पनानुदयादिति। अथ द्रव्यत्वा
श्रयत्वावच्छिन्नं प्रति रूपत्वेन द्रव्यस्पार्शनत्वावच्छिन्नं प्रति स्पर्शत्वेन हेतुत्वकल्पनापेक्षया मन्त्रप्रत्यक्षत्वावच्छिन्नं प्रति रूपत्वेनैव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हेतुत्वं कल्पने लाघवात्। मूर्त्तत्वं च स्पंदसमवायिकारणतावच्छेदको जातिविशेषः न च प्रत्यक्षत्वस्पंदे व्याप्यि कं तद्वैतिन्न्य साधारण्यतया
जन्यत्वविशेषितस्यैव तज्जन्यतावच्छेदकत्वं स्वीकरणीयं। तथा च प्रत्यक्षत्वविशेषितस्य तज्जन्यत्वस्य तथात्वमस्त्वविनिग
मनाविरहः एवं प्रतियोगितासंबंधेन प्रागभावत्वं उत्पन्नत्वं प्रतियोगितासंबंधेन ध्वंसत्वं कालिकसंबंधेन घटत्वादिमत्वं निवे
शयतेरन्यस्यापि विनिगमनाविरहात् कारणतावच्छेदकत्वं एतेनावच्छेदकतया व्यासज्यवृत्तित्वोपगमेपि न निस्तार इति वाच्यं विशेष
णतानाक्रान्तस्यानवच्छेदकतया सिद्धस्य जन्यप्रत्यक्षवृत्तिजातिविशेषस्यैव निवेशात्। तथा च रूपविरहात् वायोः स्पार्शनानुपपत्ति
रिति चेत्। न। वायोः स्पार्शनानभ्युपगमेऽव्यासत् स्पार्शनप्रतिबध्याश्रयसमवेतसंबंधेन प्रतिबंधकीभूतस्य स्पार्शनविषयता
वायुप ३ भावस्य वायुस्पर्शेपि सत्वात् न तत्स्पार्शनानुपपत्तिरित्यन्यथाऽव्यक्तत्वावच्छिन्नं प्रतिरूपत्वेनऽयस्पार्शनत्वावच्छिन्नं प्रतिस्पर्शत्वेन हे
तुत्वमेव कल्पनीयं। ननु प्रत्यक्षत्वावच्छिन्नं प्रतिरूपत्वेनैव हेतुत्वमिति। न च द्रव्यस्य स्पार्शनत्वावच्छिन्नं प्रतिबध्याश्रयसम
वेतत्वसंबंधेन स्पार्शनविषयत्वाभावस्य प्रतिबंधकत्वमानाभावादिति वाच्यं। तदकल्पने चघटाकाशसंयोगाभासंयोगादीनामपि

१८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

स्पार्शनापत्तेः। न च सामानाधिकरण्यसंबंधेन स्पर्शाभावप्रतिबंधकतयैव तत्प्रत्यक्षवारणं संभवति। प्रभायाः स्पर्शवत्त्वे सामान्याभावादि-
ति किं स्पार्शनविषयताभावप्रतिबंधकत्वेनेति वाच्यं। प्रभायामिः स्पर्शत्वस्य नैयायिकसिद्धांतविरुद्धत्वात्। स्पार्शनविषयताभाव
स्य प्रतिबंधकत्वे प्रभापटसंयोगस्पार्शनवारणासंभवात्। एवं वायुघटसंयोगादिरपि नैयायिकमते ऽतींद्रियतया तः स्पार्शनवा
रणायापि स्पार्शनविषयताभावस्य प्रतिबंधकताया आवश्यकत्वाच्च। न चऽव्यान्यस्पर्शाव्यसस्पार्शनत्वमेव स्पार्शनविषयताभाव
प्रतिबध्यतावच्छेदकं वाच्यं। तथा सत्यायोरस्पार्शनत्वेपि तत्स्पर्शस्पार्शनानुपपत्तिरिति वाच्यं। तथासतिऽव्याप्यवत्स्पर्शाव्याप्यत्वसत्वा
नामियो विशेषणविशेष्यभावे विनिगमनाविरहेण प्रतिबध्यप्रतिबंधकभावद्वयकल्पनाप्रसंगात्। यत्तु नाडीविषयधर्म्यांशे एक
धर्मांशे सामानाधिकरण्यसंबंधेनापरधर्मवैशिष्ट्यं न निवेश्यते। येनामिथो विशेषणविशेष्यभावे विनिगमनाविरहः स्यात्। किं
तु विषयितयावच्छेदकीभूततद्धर्माश्रयता संबंधेन त्रयाणां वैशिष्ट्यं निवेश्यते तेन न विनिगमनाविरहात् प्रतिबंधकतावा
हुल्यमिति तन्मतं तत्र परस्परविशेषणविशेष्यभावेऽप्यवापत्त्वानां त्रयाणां प्रत्येकमवच्छेदकत्वानिरिक्तत्वेनयाऽवच्छेदकतावच्छेदक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्यासंभवात्। अवच्छेदकतायां व्यासज्यवृत्तित्वस्य चान्यत्र दूषितत्वात्। तथात्वे तदंशे एकत्रद्वयमितिरीत्या तेषां निवेशे तु न एकविशेष-
णाविशिष्टेऽपरस्य विशेषणत्वेनान्यत्रापि विनिगमकाभावात् प्रतिबंधकतावच्छेदकस्यावश्यकत्वाच्च। एवं स्पार्शनविषयत्वाभावप्रतिबंध्य-
तावच्छेदककोटौ स्पर्शान्यविषयतानिवेशे स्पर्शस्पार्शनस्य तद्प्रतिबध्यतयाऽनुद्भूतस्पर्शानुद्भूतस्पर्शान्यापि स्पार्शनापत्तिः। वायुवृ-
त्तिस्पर्शान्यविषयतानिवेशेऽपि वायवीयानुद्भूतस्पर्शत्वगिंद्रियादिवृत्त्यनुद्भूतस्पर्शस्पार्शनापत्तिरेवं रीतिस्पर्शस्पार्शनत्वावच्छिन्न-
प्रति सामानाधिकरण्यसंबंधेन महत्त्वस्य हेतुत्वे। अनुद्भूतस्पार्शनत्वावच्छिन्नं प्रति चानुद्भूतस्पर्शानां तादात्म्येन संबंधेन प्र- १२
तिबंधकत्वमधिकं कल्पनीयं न चानुद्भूतस्पर्शवत्त्वस्य स्पार्शनवारणाय तत्रानुद्भूतस्पर्शस्य प्रतिबंधकता कल्प्यते न च नस्य तदुभयवादि-
संमततया तत्रैव सामानाधिकरण्यसंबंधेन तस्य प्रतिबंधकत्वं कल्प्यते न तु समवायेनानुद्भूतस्पर्शवतां प्रभात्वगिंद्रियादी-
नामवयवेष्वनुद्भूतस्पर्शसत्वात् सामानाधिकरण्यसंबंधेनापि तत्रानुद्भूतस्पर्शसत्त्वेन तत्स्पार्शनवारणसंभवात्। तथाच
सामानाधिकरण्यसंबंधेनानुद्भूतस्पर्शस्य स्वस्मिन्नपि सत्वात्तादात्म्यसंबंधेनानुद्भूतस्पर्शस्य स्पार्शनं प्रतिप्रतिबंधकताकल्प-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नेपि न तत्स्पार्शनापत्तिरिति वाच्यं। सामानाधिकरण्यसंबंधेन अनुद्भूतस्पर्शस्य प्रतिबंधकत्वकल्पनेन द्रव्यत्वादिस्पार्शनोपप
त्तेर्येसद्विषयकत्वस्याधिकस्य प्रतिबध्यतावछेदककोटौ निवेशनीयतया गौरवात्। समवायसंबंधेन प्रतिबंधकत्वकल्पने तु उद्भूतस्य
स्पार्शनत्वस्यैव तत्प्रतिबध्यतावछेदकत्वोपगमात्। एवमेतन्मते स्पार्शनाभावप्रतिबध्यतावछेदकाक्रांतस्यापि स्पर्शस्पार्शनस्य सन्नि
कर्षादिघटितसामान्यसामग्र्याजननात्। घटाकाशसंयोगादेः सन्निकर्षादिघटितसामान्यसामग्रीबलात्वात्। तज्जन्यतावछेद
कद्रव्यसमवेतस्पार्शनत्वावछिन्नापत्तिः। नच भवन्मतेपि स्पार्शनाभावप्रतिबध्यतावछेदकानाक्रांतस्य द्रव्यस्पार्शनद्रव्यत्वादि
स्पार्शनस्य सामान्यसामग्र्याजननात्। सामान्यसामग्रीबलात् घटाकाशसंयोगादिविषयतासंबंधेन स्पार्शनापत्तिर्दुर्वारे
वेति तद्वारणाचिंतनं मावयोः समानमिति वाच्यं। द्रव्यस्पार्शनं प्रति समवायेन स्पर्शादिहेतुतायाः क्लृप्तत्वात्। द्रव्यत्वादिस्पार्श
नेसद्भिन्नस्पार्शनत्वावछिन्नं प्रति तादात्म्यसंबंधेन सद्भिन्नत्वेन विशेषणताविशेषेण सद्भेदस्य वा हेतुतायाः कल्पनीयतया
तावद्व्यतिरेकसहकृततायाः एव सामान्यसामग्र्याः सामान्यकार्येत्याद्प्रयोजकत्वोपगमात्। घटाकाशसंयोगादेरुपनीतादृश

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कारणानां एकस्याप्यभावेनापत्त्यभावात्। भवन्मते च स्पर्शस्पार्शनानुरोधेन तादृशविशेषसामग्र्यसहकृताया अपि सामग्र्याः
फलोपधायकतास्वीकारस्यावश्यकतया तत्र बलात् घटत्वाद्यसंयोगादेः स्पार्शनापत्तिर्दुर्वारैव। न च स्पर्शस्पार्शनत्वावच्छिन्नं प्रति तादा
त्म्यसंबंधेन स्पर्शत्वेन विषयस्य हेतुतान्न। स्पर्शस्पार्शनीयसामग्रीबलात् घटत्वाद्यसंयोगादेः स्पार्शनापत्तिः तादृशसामग्रीघट
कस्य स्पर्शरूपविषयस्य तादृशसंयोगादौ तादात्म्येनासत्त्वादिति वाच्यं। स्पर्शस्पार्शनत्वावच्छिन्नं प्रति स्पर्शत्वेन हेतुत्व
स्याप्रामाणिकत्वात्। एतदनुरोधेन तत्कल्पने च गौरवात्। अथ वायोः स्पार्शनानुपगमे वायुत्वसंयोगादिघटितत्तत्स्पार्शनसामग्री २०
काले वायुरुपमितिशाब्दबोधवारणाय तत्र वायुस्पार्शनसामग्र्याः प्रतिबंधकत्वकल्पने गौरवं। यन्नु वायुरुपमित्यादेः वायुस्पार्शन
सामग्र्याः प्रतिबंधकत्वकल्पनं नाधिकं। घटादिस्पार्शनसामग्रीकाले घटमुपमितिवारणाय तत्र तादृशसामग्र्याः प्रतिबंधक
त्वे कल्पनीये विषयमनिवेश्य विषयतासंबंधेनानुमितित्वावच्छिन्नं प्रति समवायसंबंधेन इतरकारणत्वकसंयोगस्य प्रतिबंध चिशि ५२
कत्वकल्पनात् न त एवोप[illegible]पत्तेः। न चैवं भूतलादिसन्निकर्षवत्यकाले घटादिसंनिकर्षसत्त्वे भूतले घटवदित्यनुमितिरस्त्य

प्रसंगः। भूतलादिसन्निकर्षस्य भूतलादिविशेष्यतानिरूपितविधेयतासंबंधेनानुमित्यादिकं प्रति प्रतिबंधकत्वकल्पनेऽपि वि
भिन्नावच्छेदेन घटभूतलयोः स्वकसंयोगदशायां तादृशानुमित्युत्पत्त्यापत्तिः। तदानीं च घटभूतलसंयोगस्यैकविलक्षणस
न्निकर्षविरहात्। संयोगांशे घटवद्भूतलमित्येतादृशप्रत्यक्षसामग्र्याः असत्त्वेन तादृशानुमितेरनुभवसिद्धतया तदनुत्पत्तेरनिष्ट
त्वादिति वाच्यं। भूतलादिविशिष्यतानिरूपितविधेयतासंबंधेनानुमित्यादिकं प्रति भूतलादिसंयोगावच्छेदकावच्छिन्नत्वकसं
योगत्वेन प्रतिबंधकत्वकल्पनेनानुपपत्त्यभावात्। न च घटानुमितित्वपटानुमितित्वप्रकारकविधेयतानां पृथक्पृथगनुगम नाना ५
कत्वानुरोधेन विधेयभेदात्, प्रतिबध्यप्रतिबंधकभेद आवश्यकः। तथाविधसकलेच्छानामेकस्यैव जनकत्वे एकानुमितिसत्त्वे
न्यानुमित्यापत्तिरिति वाच्यं। स्वीयानुमितित्वनिष्ठविधेयतानिरूपितविषयितासंसर्गावच्छिन्नप्रकारतासंबंधावच्छिन्नप्रति
योगिताकानुमित्यभावविशिष्टस्वकसंयोगत्वेनैव प्रतिबंधकत्वोपगमात्। घटानुमितिर्जायतामितीत्येतादृशेच्छाकालेऽपि
तादृशसंबंधावच्छिन्नप्रतियोगिताकानुमित्यभावस्य घटादौ सत्त्वेन अतिप्रसंगाभावादिति तत्त्वं। यथा हि भूतलादिविशि

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

व्यतानिरूपितविधेयतासंबंधेनैवानुमित्यादिकं प्रति भूतलसंयोगावच्छेदकावच्छिन्नत्वक्संयोगत्वेन प्रतिबंधकत्वकल्पने। यत्र भू-
तलसंयोगावच्छेदकीभूतकपालाद्यवच्छेदेनैव घटादेस्त्वक्संयोगः भूतले त्वन्यावच्छेदेन न तु घटसंयोगावच्छेदकावच्छेदेन। तत्राभू-
तलं घटवदित्याकारकानुमित्यनुदयप्रसंगः। तदानीं च घटसंयोगावच्छेदकीभूतावयवावच्छिन्नभूतलसन्निकर्षसत्वेउभयसंयोग-
ग्राहकस्यासत्वेन भूतलं घटवदित्याकारकानुमितेरनुभविकतया न तदपलापो युज्यते नह्यनायत्या विधेयविशेष्यनिवेशे घ-
टसंयोगावच्छेदकावच्छिन्नभूतलत्वक्संयोगविशिष्टभूतलत्वक्संयोगविशिष्टभूतलसंयोगावच्छेदकावच्छिन्नघटत्वक्संयोगत्वा- २१
दिना भूतलादिपक्षकघटानुमितित्वावच्छिन्नं प्रति प्रतिबंधकत्वं कल्पनीयमिति कथं घटानुमितिस्थलीयप्रतिबंधकत-
यानिर्वाहः। वस्तुतो घटत्वादिसाक्षात्कारप्रतिबंधकदोषादिसत्वे घटत्वक्संयोगसत्वेऽपि भूतलं घटवदित्याकारकानुमित्युद-
यात्। नादृशदोषाभावा अपि सामग्री प्रतिबंधकतायां निवेशनीयाः इत्थं च सर्वेषां धारणेनैकप्रतिवध्यप्रतिबंधकभावस्वीकारे घटत्वा-
दिघटप्रतिबंधकदोषसत्वे घटवद्भूतलमित्यादिप्रत्यक्षसामग्रीकाले तथाविधानुमित्यापत्तिरिति विशिष्य प्रतिवध्यप्रतिबंधकभा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वकत्वनमावश्यकं। एतेनस्वावच्छेदकावच्छिन्नसंयोगावच्छेदकावच्छिन्नत्वसंबंधेनभूतलत्वसंयोगविशिष्टत्वसंयोगत्वेनभू
तलविशेष्यतानिरूपितविधेयतासंबंधेनात्तमितिप्रतिबंधकत्वकल्पनेभूतलसंयोगावच्छेदकीभूतकपालाद्यवच्छिन्नघटत्व
संयोगस्यतादृशसंबंधेनात्मावच्छिन्नभूतलत्वसंयोगविशिष्टत्वाभावेनपूर्वोपन्यस्तंभवेपिननिस्तारइति। तस्माद्वायुस्पार्श
नांगीकारेत्वाय्वुत्तमित्यादिकंप्रतिजनत्स्पार्शनसामग्र्याःप्रतिबंधकत्वकल्पनगौरवंदुःपरिहरमेव। मेवं। वायुत्वसंयोगकाले
वायवुत्तमितिसामग्रीसत्वेनैयायिकमतइवायोरुत्तमित्यादिरेवमस्यापिस्वीक्रियते। नचतत्रभवन्मतेवायुस्पार्शनसामग्र्य
त्याज्ञानयोगपद्यप्रसंगइतिवाच्यं। तादृशस्थलेस्पार्शनानुपगमेक्षतिविरहात्। ननुत्पत्तौबाधकाभावः समानविषय
कोदिअनुमितिसामग्र्याः लौकिकज्ञानादिविशेषनादितिवाच्यं। वाय्वनुमितिसामग्रीकालेवायोरुपनीतभानस्वीकारणाय
६मा२ जनता(?)सामग्र्याःप्रतिबंधकत्वकल्पनीयेवायुप्रत्यक्षत्वस्यैवतत्स्पर्शनिविषयतावच्छेदकत्वोपगमात्। कार्येलौकिकप्रत्य
क्षस्यापितनएववारणासंभवात्। नचतत्रोपनीतभानत्वप्रकारकेच्छायाउत्तेजकत्वात्। उपनीतभानत्वमेवनत्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निबध्यतावच्छेदकमिति वाच्यं। अन्यथा लौकिकप्रत्यक्षत्वप्रकारकेच्छाधीनलौकिकप्रत्यक्षे व्यभिचारप्रसंगादिति कथमुपनीतभानस्थ
लीयप्रतिबंधकतया लौकिकप्रत्यक्षवारणासंभव इति वाच्यं। यत्र त्वनुमितिसामग्रीकाले वा यो लौकिकप्रत्यक्षेच्छासत्त्वेऽपि भवतु
न्त्वेवं ममापि न स लौकिकप्रत्यक्षत्वानंगीकारात्। न च लौकिकप्रत्यक्षसामग्र्याः स्वतंत्रप्रतिबंधकत्वाकल्पनेऽपनीतभानं जायतां शब्दे
तादृशेच्छाकाले वा यत्रानुमितिलौकिकप्रत्यक्षयोर्योगपद्यापत्तिरिति वाच्यं। उपनीतभानसामग्र्यास्तदावश्यकत्वात्। उपनीतभाने
च्छाविशिष्टोपनीतभानसामग्रीरूपप्रतिबंधकत्वसत्त्वेन तत्सन्नीमनुमित्सुन्यत्रैवासंभवात्। एतेन नवीयो लौकिकप्रत्यक्षं प्रति अनु
मित्साविशिष्टं न तदनुमितिसामग्रीप्रतिबंधकताकल्पनप्रयुक्तगौरवमपि परास्तं। उपनीतभानस्थलीयप्रतिबंधकतयैवोपपत्तेः। न २२
चैवमपि बाह्यविषयकलौकिकप्रत्यक्षं प्रति यद्यनुमितिसामग्रीप्रतिबंधकताकल्पनस्याधिक्यं दुःपरिहरमेव। वायूपनीतभानं
जायतां द्रव्ये तादृशेच्छासत्त्वे उपनायकज्ञानासत्त्वे तादृशसामग्र्यां सत्यां न लौकिकप्रत्यक्षस्योपनीतभानस्थलीयप्रतिबंधकतया वा
रयितुमशक्यत्वादिति वाच्यं। उपनीतभानस्थलीयप्रतिबंधकतया न वारणासंभवेऽपि पश्वादिलौकिकप्रत्यक्षं प्रति घटाद्यनुमितिसामग्र्याः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रतिबंधकतायां घटादिभिन्नविषयकलौकिकप्रत्यक्षत्वस्यैव तत्प्रतिबध्यतावच्छेदकत्वोपगमात्। तत एव वायुलौकिकप्रत्यक्ष
स्यापि वारणासंभवात्। न च परं लौकिकप्रत्यक्षं जायतां इत्याद्याकारकेच्छानां विशिष्योत्तेजकताया आवश्यकत्वात्। विशिष्यप्र
तिबध्यप्रतिबंधकभावकल्पनमावश्यकं। अन्यथा वह्निलौकिकप्रत्यक्षं जायतां इत्येतादृशेच्छाकाले न प्रत्यक्षसामग्र्यसत्त्वे घ
टादिलौकिकप्रत्यक्षापत्तेरिति कथं घटादिप्रत्यक्षस्थलीयप्रतिबंधकतया वायुप्रत्यक्षं वारयिष्यत इति वाच्यं। विषयतासंबंधे
न प्रत्यक्षं प्रति घटो घटत्वमिति सामग्रीविशिष्टस्य स्वीयप्रत्यक्षनिष्ठविशेष्यतानिरूपितविषयितासंसर्गावच्छिन्नप्रकारतासंबं
धावच्छिन्नप्रतियोगिताकप्रत्यक्षेच्छासामान्याभावस्यैकप्रतिबंधकत्वेनोपपत्तेः। वह्निप्रत्यक्षेच्छाकालेपि सामग्रीविशिष्टस्य
तादृशसंबंधावच्छिन्नप्रतियोगिताकप्रत्यक्षेच्छाभावस्य घटादौ सत्त्वेनोक्तापत्त्यभावात्। सामग्रीविशिष्टत्वं च इच्छाभावे एकका
लीनत्वसंबंधेन। न तु एकदेशवृत्तित्वसंबंधेन तादृशसामग्र्याः आत्मनि सत्त्वात्। घटादावसत्त्वेपि न क्षतिरिति। यत्तु वायोः प्र॰
त्यक्षत्वमते द्रव्यस्पार्शनं प्रति स्पर्शस्य हेतुतायाः कल्पनीयतया विजातीयनानास्पर्शवदवयवारब्धेऽवयविनि चित्रस्पर्शस्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

व्याप्यवृत्तीनां नानास्पर्शानां नानास्पर्शानां कारणत्वमावश्यकं अन्यथा तत्स्पार्शनानुपपत्तेः। अस्मन्मते तु तत्रावयविनो निस्पर्शत्व
मेव स्वीक्रियत इति तिलाघवमिति न दूषणम्। चित्ररूपविचारेणैव नानाजातीयस्पर्शवदारब्धावयविनो निःस्पर्शत्वमतस्तं दूषितं। तत् अथ
वायोः स्पार्शनप्रत्यक्षत्वमते तन्निष्ठसंख्यापरिमाणादीनामपि प्रत्यक्षापत्तिः। तेषामाश्रययोग्यताधीनयोग्यताकत्वादिति चेत् न
यतः स्वपक्षाणादौ संख्यादिप्रत्यक्षस्य सर्वानुभवसिद्धत्वात्। क्वचित्तदनुपपत्तिस्तु दोषविशेषवशादेव एवं संलग्नवस्त्रादौ गुरुत्वपरिमा
णो नष्टसंख्यापरिमाणग्रहवदिति। एवं वाय्वादिरपि प्रत्यक्ष एव अनुद्भूतरूपस्य स्पार्शनप्रतिबंधकत्वे मानाभावात्। न
च वायुषु प्रत्यक्षे उद्भूतरूपस्य प्रतिबंधकत्वं कल्पनीयं प्रत्यक्षत्वावच्छिन्नं प्रत्येव तस्य तथात्वं कल्प्यते। तथा च नीरूपाः प्रत्यक्षं सं २२
वर्तीति वाच्यं। प्रत्यक्षत्वस्यानुद्भूतरूपाभावजन्यतावच्छेदकत्वे व्यभिचारसंदेहात्। वायुवत्वस्यैव तथात्वोचितत्वात्। न च प्रत्यक्षत्व
स्य तज्जन्यतावच्छेदकत्वे अनुद्भूतस्पर्शाभावस्य स्पार्शनप्रतिबंधकत्वं न कल्प्यत इति लाघवात् प्रत्यक्षत्वस्यैव तथात्वमुचितमिति वा
च्यं। अनुद्भूतस्पर्शस्य स्पार्शनं प्रत्यप्रतिबंधकत्वे उद्भूतरूपवतां घटादीनां स्पार्शनापत्तेरिति। अत्रोच्यते। इयं चास्तु यत्वस्य रूपजन्यता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वच्छेदकत्वे मूर्त्तचाक्षुषत्वमादाय विनिगमनाविरहात् कारणद्वयं। रूपस्य कार्यतावच्छेदकं मूर्त्तचाक्षुषत्वमेव तु द्रव्यचाक्षुषत्वं तस्य तथात्वे चक्षुःसंयोगस्य कार्यतावच्छेदकं द्रव्यचाक्षुषत्वं मूर्त्तचाक्षुषत्वं वेति विनिगमनाविरहप्रसंगात्। मूर्त्तचाक्षुषत्वस्य रूपजन्यतावच्छेदकत्वे तु द्रव्यचाक्षुषत्वस्य चक्षुःसंयोगकार्यतावच्छेदकत्वं न संभवति। तथा सति गगनादीनां चक्षुःसंयोगवलात् चाक्षुषापत्तेरिति मूर्त्तचाक्षुषत्वमेव तज्जन्यतावच्छेदकमिति लाघवमिति। तदसत्। तथाहि मूर्त्तचाक्षुषत्वस्य रूपजन्यतावच्छेदकत्वेपि द्रव्यचाक्षुषत्वस्य चक्षुःसंयोगकार्यतावच्छेदकत्वं संभवति। द्रव्यचाक्षुषत्वव्यापकीभूतस्य मूर्त्तत्वचाक्षुषत्वावच्छिन्नहेतुभूतरूपसहकृतस्यैव चक्षुःसंयोगस्य फलोपधायकत्वमभ्युपेत्य गगनादीनां चाक्षुषवारणसंभवात्। रूपस्य चक्षुःसंयोगित्वसहकारित्वानभ्युपगमे मूर्त्तचाक्षुषत्वस्य तज्जन्यतावच्छेदकत्वेपि तदवच्छिन्नस्यैव गगनादावापत्तिवारणासंभवात्। अवच्छेदेपि तत्सहकारिताया आवश्यकत्वादिति तथा च तादृशविनिगमनाविरहस्य उभयथैव सत्वात्। रूपस्य कार्यतावच्छेदकं द्रव्यचाक्षुषत्वं मूर्त्तचाक्षुषत्वं वा इत्यविनिगमनाविरहो दुर्वार एव। एवमेतन्मते स्पर्शस्य कार्यतावच्छेदकमपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

इष्टस्पार्शनं मूर्त्तस्पार्शनं चेति विनिगमनाविरहात् कारणताद्वयं। एवं च तादृशकारणताचतुष्टयकल्पनापेक्षया मूर्त्तप्रत्यक्ष-
त्वावच्छिन्नं प्रति रूपत्वेन एकहेतुताकल्पनमेवोचितं। पञ्चाक्रमे नन्वेते स्पार्शनाभावप्रतिबध्यतावच्छेदककोटौ स्पार्शनान्यत्वनि-
वेशात्। इष्टापत्त्यादिभिर्विशेषणविशेष्यभावे विनिगमनाविरहात् कारणताबाहुल्यमिति तत्त्व। स्पार्शनस्पार्शनं प्रति स्पार्शन-
विषयत्वाभावविशिष्टसत्त्वेन तादात्म्यसंबंधेन प्रतिबंधकत्वकल्पने। न तु इष्टान्यसत्स्पार्शनत्वं कार्यतावच्छेदककोटौ निवेश्यते इ-
ष्टत्वादेश्चसामानाधिकरण्यसंबंधेन स्पार्शनविषयत्वाभावसत्त्वेपि स्पार्शनविषयत्वाभावविशिष्टविजातीयसत्त्वावच्छिन्नभेद-
रूपकारणसत्त्वेन व्यभिचारानवकाशात्। न विनिगमनाविरहः। नैवमपि स्पार्शनाभावविशिष्टविजातीयसत्त्वविशिष्टस्पार्श- २५
नाभाववत्त्वं वा प्रति प्रतिबंधकतावच्छेदकमिति वचविनिगमनाविरहादेतन्मते प्रतिबंधकताबाहुल्यं। मम तु विजातीयसत्स्पार्श-
नत्वावच्छिन्नं प्रति सामानाधिकरण्यसंबंधेन स्पार्शनाभावस्य प्रतिबंधकत्वेन तादृशरीत्यानवकाशाऽल्पमिति वाच्यं। विजातीयस-
त्वविशिष्टस्पार्शनाभावस्य प्रतिबंधकतावच्छेदकत्वे सामानाधिकरण्यसंबंधस्यैवावच्छेदकतया घटकत्वान्न विशिष्टविजाती

यसत्वस्य तथात्वे च समवायस्यावच्छेदकताघटकतया लाघवेन विनिगमनाविरहासंभवात्। विजातीयसत्वस्यावच्छेदकत्वे सामा-
नाधिकरण्यसंबंधेन स्वाश्रयसमवायेन वृत्तिमत्वरूपसामानाधिकरण्यप्रत्यासत्त्या स्पार्शनाभावस्यावच्छेदकत्वावच्छेदकतावच्छेदकत्व
घटकप्रत्यासत्तिगौरवमिति तन्नाशंकनीयं। स्पार्शनाभावस्यावच्छेदकत्वेपि समवायेन स्वाधिकरणे सामानाधिकरण्यसंबंधेन वृत्ति
मत्वरूपसामानाधिकरण्यप्रत्यासत्त्या विजातीयसत्वस्यावच्छेदकतावच्छेदकतायावच्छेदकतया अवच्छेदकतावच्छेदकघटकसंबंध
स्य उभयमपि न एवं तु स्पार्शत्वात्। अथैवमपि मन्मते स्पर्शान्यविषयकस्पार्शनत्वस्य प्रतिबध्यतावच्छेदकत्वे स्पर्शान्यविषयकत्ववि
स्पार्शने ४ शिष्टस्पार्शनत्वं विशिष्टत्वस्य शरीरविषयकत्वं वा तथा च तन्न्यायविनिगमकाभावात् प्रतिबध्यताप्रतिबंधकस्पर्शाभावकाउस्यां। मन्मते
तु अवच्छेदकस्पार्शननावच्छिन्नं इति स्पार्शनविषयत्वाभावविशिष्टविजातीयसत्वेन प्रतिबंधकत्वकल्पनान्नैतादृशासत्याप्रतिवध्या
प्रतिबंधकतावच्छेदकत्वमिति चेन्न सत्यं। स्पर्शान्यविषयकत्वविशिष्टस्पार्शनत्वस्य प्रतिबध्यतावच्छेदकत्वे कारणताद्वयविनि
गमनाविरहप्रसक्तिः। समवायेन स्वाश्रयविषयकत्वसंबंधेन स्वाधिकरणे समवायसंबंधेन वृत्तिमत्वरूपसामानाधिकरण्यप्र

मासत्यास्पर्शान्यत्वविशिष्टस्य स्पार्शनत्वस्यैव प्रतिबध्यतावच्छेदकत्वमुपगम्यते तत्र च समवायसंबंधेन स्वाश्रये स्वाश्रयविषयत्वसंबंधे
न स्पर्शिमत्त्वरूपसामानाधिकरण्यप्रत्यासत्त्या स्पार्शनत्वविशिष्टस्य स्पर्शान्यत्वस्यावच्छेदकत्वमादाय न विनिगमनाविरहः। स्पर्शान्यत्व
स्य स्वाश्रयविषयकत्वसंबंधेनैवावच्छेदकतायाः स्वीकरणीयतया अवच्छेदकतापरकसंबंधगौरवात्। मन्मते स्पार्शनत्वस्य समवाय
संबंधेनैवावच्छेदकतास्वीकारात्। अथ स्पर्शान्यस्पार्शनत्वावच्छिन्नं प्रति स्पार्शनाभावविशिष्टविजातीयमनस्त्वेन प्रतिबंधकताकल्पने ऽ
गविजातीयमनःस्पार्शनत्वावच्छिन्नं प्रति स्पार्शनाभावविशिष्टस्पर्शामनस्त्वेन वेति विनिगमनाविरह इति वाच्यं। स्पार्शनत्वस्य प्रति
बध्यतावच्छेदकत्वे सद्भिन्नस्पार्शनत्वस्य प्रतिबध्यतावच्छेदकानाक्रान्ततया घटाकाशसंयोगादेः सद्भिन्नस्पार्शनतापत्तिवारणाय २१
सद्भिन्नस्पार्शनं प्रति सद्भेदत्वस्य हेतुत्वकल्पने गौरवात्। न च स्पर्शान्यस्पार्शनत्वस्य प्रतिबध्यतावच्छेदकत्वेपि स्पर्शस्पार्शनस्य तत्प्र
तिबध्यतया घटाकाशसंयोगादेः सद्भिन्नस्पार्शनतापत्तिवारणाय स्पर्शस्पार्शनत्वावच्छिन्नं प्रति स्पर्शनत्वेन हेतुताया कल्पनीय
तया साम्यमिति वाच्यं। सद्भिन्नस्पार्शनं प्रति सद्भेदस्य हेतुत्वापेक्षया स्पर्शस्पार्शनं प्रति स्पर्शस्य हेतुताकल्पने ऽवच्छेदकलाघवात्।

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अन्यथा महत्स्पार्शनाभावप्रतिबंधकताक्लृप्तं तथापि आपत्तिवारकस्पर्शहेतुताकल्पनगौरवेणान्यथासिद्धमिति चेत् ॥ मन्यते एतादृश
कारणताया आधिक्येपि महत्त्वे कारणतात्रयस्याधिक्येन गौरवात् ॥ न च महत्त्वे परमाणुस्पर्शोद्भूतस्पर्शस्पार्शनवारककारणताधि
क्यागौरवमिति वाच्यं वायवीययोग्यस्पर्शजातिविशेषं कल्पयित्वा विजातीयस्पर्शान्यस्पार्शनत्वस्यैव स्पार्शनाभावप्रतिबध्यता
वच्छेदकत्वोपगमात् । परमाणवादिस्पर्शस्पार्शनस्य तादृशप्रतिबंधकतयैव वारणसंभवेन कार्यकारणभावांतरकल्पनात् । परमा
णवादिस्पर्शे च तादृशविजातीयस्पर्शस्पार्शनापत्तिः नाशंकनीया । तादृशविजातीयस्पर्शत्वेनैव स्पर्शहेतुतायाः कल्पनीयत्वात् ।
अथैवमुद्भूतस्पर्शस्पार्शनानुपपत्तिः उद्भूतस्पर्शस्य विजातीयस्पर्शान्यत्वेन स्पार्शनस्य स्पार्शनाभावप्रतिबध्यतावच्छेदकाक्रांतत्वात्
उद्भूतस्पर्शसाधारणवैजात्यकल्पनायाश्चोद्भूतस्पर्शत्वादिजात्या सांकर्यप्रसंगेनासंभवादिति चेन्न अस्तु नाम उद्भूतरूपप्रत्यक्षत्वं अतो
नोद्भूतस्पर्शस्पार्शनानुपपत्तिः एवमपि वायोः प्रत्यक्षत्वमपेक्ष्य स्थापनमशक्यमेव । वस्तुतस्तु वायोः प्रत्यक्षत्वमते स्पार्शनवाच्यत्वप्रयुक्त
समवायस्य कार्यतावच्छेदकं द्रव्याद्रव्यसमवेतस्पार्शनत्वं सद्रव्यद्रव्यसमवेतस्पार्शनत्वं चेत्युभयविनिगमनाविरहादुभयथैवद्रव्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्पार्शने व्यभिचारवारणसंभवात्। इत्यनंतं तु हृदयेदेनमिश्रनयाः। तंतानां सन्निकर्षहेतुताद्वेगुणं मन्मते तु द्रव्यान्यद्रव्यसमवेतस्पार्शि
नत्वस्पर्शनिष्ठकार्यतावच्छेदकत्वं। न संभवति वायुस्पर्शस्पार्शने व्यभिचार इति संबद्धद्रव्यसमवेतस्पार्शनत्वमेव नज्ञानमनावच्छेदकस्पा
र्शनपदत्वं संयुक्तसमवायस्य कार्यतावच्छेदकं यद्यसम्भिन्नद्रव्यसमवेतस्पार्शनत्वं तदा गुणक्रियास्पार्शनासंग्रह इति न तस्यान्य
तावच्छेदकत्वमादाय विनिगमनाविरहः॥ किंतु भवन्मतेऽपि गुणादिस्पार्शनासंग्राहकतया नात्रत्यधर्मस्य जन्यतावच्छेदकत्वासंभवात्
द्रव्यान्यद्रव्यसमवेतस्पार्शनत्वमेव जन्यतावच्छेदकं वायनत्र च वायुस्पर्शस्पार्शने व्यभिचारवारणाय द्रव्यसमवेतान्तं स्पर्शत्व
त्वमपि निवेशनीयं। तथा च स्पर्शस्पार्शनस्यानादेशकार्यतावच्छेदकतानाक्रांततया स्पर्शस्पार्शनं प्रत्यनंतं तु हृदयेदे न त्वक्संयुक्तसम २६
वायस्य अनंतं तु हेतुता स्पार्शनत्वमनिवेश्य कल्पनीया इति महागौरवमिति चेत्। न। गुणक्रियास्पार्शनस्य त्वक्संयुक्तसमवायस्य
कार्यतावच्छेदकानाक्रांतत्वेऽपि यत्किंचिदेकाश्रयसन्निकर्षात् व्यासज्यवृत्तिधर्मप्रत्यक्षवारणाय विजातीयसत्स्पार्शनत्वावच्छिन्नं
प्रतिसामानाधिकरण्यसंबंधेन त्वक्संयोगाभावस्य प्रतिबंधकत्वकल्पनावश्यकतया तन्नरूपवत्तं निरुक्तगुणक्रियादीनां स्पार्शन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वारणासंभवात् सन्निकृष्टेऽव्यक्तसमवेतस्पार्शनत्वस्यापि जन्यतावच्छेदकत्वसंभवात्। अथैवं त्वक्संयुक्तसमवायस्य हेतुताकल्पनमेव क
थं। आश्रयविप्रकर्षदशायां द्रव्यसमवेतजातिस्पार्शनवारणाय। अथ स्पर्शत्वादिस्पार्शनानुरोधेन संयुक्तसमवेतस्पार्शनवत्स
मवायहेतुताया आवश्यकत्वात्। तेनैव द्रव्यत्वादिस्पार्शनसाधारणं सन्निकृष्टस्पार्शनत्वं जन्यतावच्छेदकं अस्तु किन्तु त्वक्संयुक्तसमवाय
हेतुतयेति चेन्न यत्किंचिदेकाश्रयसन्निकर्षकाले त्वक्संयुक्तसमवेतसमवायवत्त्वात् द्वित्वादिस्पार्शनापत्तिरिति विजातीयसत्सम
वेनस्पार्शनत्वावच्छिन्नं प्रति सामानाधिकरण्यसंबंधावच्छिन्नप्रतियोगितात्वकसंयोगाभावाभावस्य सामानाधिकरण्यसंबंधेन हेतुत्वंक ना ५
ल्पनीयं इत्थं च तादृशकारणाविरहादेव स्पार्शाय सन्निकर्षदशायां स्पर्शत्वादिस्पार्शनवारणासंभवात्। संयुक्तसमवेतसमवायहेतु
त्वमेव नास्ति इति द्रव्यत्वादिस्पार्शनानुरोधेन स्पार्शनवत्त्वक्संयुक्तसमवायहेतुत्वं कल्पनमावश्यकं यदि च संयुक्तसमवेतसमवाय
हेतुत्वं प्रामाणिकं तदा तन्निरूपितवत्त्वावच्छेदककोटावेव द्रव्यान्यविषयकत्वसन्निकृष्टविषयकत्वयोर्निवेशविनिगमनाविरहात् गौरवं।
मन्यते स्पर्शस्पार्शने व्यभिचारेण तत्र द्रव्यान्यविषयकत्वनिवेशासंभवादिति। एवं च मूर्त्तत्वजात्यनभ्युपगमे मूर्त्तत्वाश्रयमादौ नारु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इतिवायुप्रत्यक्षविचारः

पादिजन्यतावच्छेदकत्वमादायाविनिगमनाविरहात् संभवेन पर्य्याप्तगौरवपरीहारेऽपि न निस्तारः। एवं चोक्तरीत्यनोऽद्रियत्वमुपपद्यते स्पा
र्शनाभावप्रतिबध्यतावच्छेदककोटौ स्पर्शसामान्यभेदस्यैव निवेशनीयतया न स्पार्शनोत्पत्तिः। परमाण्वादिस्पर्शस्पार्शनवारणाय सामा
नाधिकरण्यसंबंधेन महत्त्वस्य हेतुतायाः तादात्म्यसंबंधेनोद्भूतस्पर्शप्रतिबंधकतायाश्च कल्पनात्। तादृशकतिपयकार्यकारणभावस्याधिके
ऽपि भवन्मते ऽनंतसन्निकर्षहेतुत्वाविवेचनसामग्र्याभावादित्ति परमरहस्यं॥ ॥श्रीः॥ ॥घटः कर्मत्वमित्यादिनिराकांक्षवाक्यस्थले
पदार्थोपस्थित्यादिसत्त्वेऽपि कर्मत्वादौ भेदान्वयबोधापत्तेः दयात्। आकांक्षाज्ञानस्य हेतुत्वं कल्पनीयं। तच्च यस्य येन विना न स्वार्थान्व
यानुभावकत्वं तस्य तेन पर्यवसानमाकांक्षेति मणिकृतः। अत्र यत्पदं यद्रूपावच्छिन्नोपस्थितिपरं तथा च यद्रूपावच्छिन्नोपस्थितिव्य
तिरेकप्रयुक्तं यद्रूपावच्छिन्नपदोपस्थितेर्यादृशान्वयबोधानुपधायकत्वं तद्रूपावच्छिन्नत्वमेव तद्रूपावच्छिन्ननिरूपितादृशान्वयबो
धप्रयोजिकाकांक्षेत्यर्थः। एवं च पदमानयेत्यादौ अमादिपदे घटपदापत्तिनोत्तरामप्रत्ययादिमत्त्वं अव्यवहितोत्तरत्वसंबंधेन घ
टपदत्वम् अमपदनादिकमेव वा कर्मत्वादिरूपविभक्त्यर्थविशेष्यकघटादिरूपनामार्थप्रकारकबोधे यत्तादिसंसर्गकान्वयबोधप्रयो ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जकीभूताकांक्षायनस्तद्रूपावच्छिन्नोपस्थितिव्यतिरेकस्य घटपटःत्वाद्यवच्छिन्नोपस्थितिमित्तमादृशान्वयबोधानुपधायकत्वप्रयोजक
त्वं। स्वरूपयोग्यस्य फलानुपधाने सहकारिविरहस्य प्रयोजकत्वात्। उपदर्शितान्वयबोधेन घटपदाव्यवहितोत्तरत्वविशिष्टाम्पदत्वा
वच्छिन्नोपस्थितेर्हेतुतया तादृशोपस्थितेर्घटादिपदोपस्थितिसहकारित्वात्। कार्यानुपधानसहकारिव्यतिरेकयोः प्रयोज्यप्रयोज
कभावश्च कव्यतिरेकानुपपत्त्यनुपधानं दण्डसंयोगादिप्रतीतिसिद्धः स्वरूपसंबंधविशेषः। एवमुपदर्शितस्थले अमाद्यव्यवहित
पूर्वघटपदत्वादिमत्वं अव्यवहितपूर्वत्वसंबंधेनाम्पदवद्घटपदादिकमेव घटादिपदे अमादिपदनिरूपिताकांक्षाविनिगम
नाविरहात्। तादृशरूपावच्छिन्नोपस्थितेरपि तथाविधान्वयबोधहेतुतयान व्यतिरेकस्यापि तथाविधान्वयबोधानुपधानप्रयो
जकत्वात्। घटपदत्वादिकं च घटपदकारोत्तरत्वादिरूपानुपूर्वीविशेषः एवं घटपदाव्यवहितोत्तरकर्मत्वपदत्वं कर्मत्वपदाव्यव
हितपूर्ववृत्ति घटपदत्वादिकं च नोपदर्शितान्वयबोधे घटाभावादिपदनिरूपिताकांक्षानद्रूपावच्छिन्नोपस्थितेस्तथाविधशाब्द
बोधाजनकतया नव्यतिरेकस्य न तथाविधशाब्दबोधनाप्रयोजकत्वात्। घटाद्यनुपधाने रासभादिव्यतिरेकवत्। अतो घटः कर्म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

गोर

त्वमित्यादौ नातिप्रसंगः एवं कृत्यादिरूपाख्यातार्थविशेष्यकानयनादिरूपधात्वर्थप्रकारकात्तु कृत्यादिसंसर्गकान्वयबोधे याव-
र्वनीयत्वात् न रीतिपदत्वादेराकांक्षात्वं उपायेन च आनयतीत्यादौ साकांक्षता बोध्या। उक्तरीत्या च नाहत्यान्वयबोधे आनयनादिपदसत्त्वे कृ॰
त्यादिपदत्वस्य नाकांक्षात्वं। अतो न आनयनं कृतिरित्यादावतिप्रसंगः। एवं च प्रकृतिप्रत्ययभावस्थले प्रकृतिपदाव्यवहितोत्तरत
प्रत्ययपदत्वरूपा तु पूर्वविशेषस्यैवाकांक्षात्वं पर्यवसितं घटमित्यादिपदस्य चानये इत्यादिपदे घटमित्याद्यव्यवहितोत्तरत
यपदत्वादिकमाकांक्षा। आनय घटमित्यादितोऽपि घटकर्मकानयनकृत्यादिविषयकशाब्दबोधोदयात् न च तथाविधत्वोपस्थि- २८
तेराहत्यान्वयबोधाहेतुत्वात्। किं तु घटमित्यादिपदसमभिव्याहृतानयपदत्वादिकमेव तत्राकांक्षा। समभिव्याहृतत्वं च घ
टमिति पदस्य आनयनपदेन सहविशिष्टार्थप्रतीतिजनकत्वे तात्पर्येणोच्चरितत्वरूपं पदतात्पर्यमेव। न हि रामश्च पघट
मानय पदमित्यादौ न पदपदस्यानेकवाक्यतापन्नस्य घटमित्यादेः पदमित्यनेनैकवाक्यतापन्नानयेत्यादिपदसाकांक्षता। आनय
पदं न घटमित्यादिपदसमभिव्याहृतमित्यादिव्यतिरेकज्ञानदशायां घटकर्मकानयनानुकूलकृत्यादिविषयकान्वयबोधानुद

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यात् घटमित्यादिपदसमभिव्याहृतानयपदत्वावच्छिन्नोपस्थितेः तादृशान्वयबोधे हेतुत्वस्यावश्यकतयोक्तरूपस्याकांक्षारूपता
निर्वाहः उद्देश्यविधेयभावेनान्वयबोधे च प्रकृतिप्रत्ययातिरिक्तस्थलेऽपि उद्देश्यवाचकपदविधेयवाचकपदयोः पौर्वापर्यमाकां
क्षारूपं घटः श्यामादिवदुद्देश्यमित्यादौ उद्देश्यतावच्छिन्नोद्देश्यक घटादिविधेयकान्वयबोधानुदयात्। अत एव व्यकारोत्वपमेवमे
यदवयवरत्यासैतान्यर्थविषयीभूतेऽप्युद्देश्यत्वावच्छिन्नोद्देश्यकान्यप्रकारविधेयकशाब्दप्रयोजकाकांक्षाविरहात्। आलंकारिकाअ
विमृष्टविधेयांशं नाम नन्दोषमामनन्ति। विधेयस्याविमृष्टत्वं च प्राधान्येनानिर्दिष्टत्वं न तु विधेयकशाब्दबोधकप्रयोजकाकां
क्षावत्पदेनानुपस्थितत्वमिति यावत् अत एव अव्यवधानांशः नाकांक्षाघटकः॥ पार्थ एव धनुर्धर इत्यादौ एवपदव्यवहितधनुर्द्ध
रपदस्यापि पार्थांशे विधेयत्वादिति। अथ प्रकृतिप्रत्ययभावस्थले यदि प्रकृतिपदाव्यवहितोत्तरप्रत्ययपदत्वमाकांक्षा तदा
घटपटावानयेत्यादिद्वन्द्वसमासस्थले घटादिपदाव्यवहितायाविभक्तेस्तत्साकांक्षतानुपपत्तिरिति चेन्न समासातिरि
क्तस्थल एव तथा नियमात्। न च घटपदाव्यवहितपटपदाव्यवहितोत्तराम्पदत्वादेरेव अमादिपदे घटादिपदाकांक्षात्वात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तद्रूपावच्छिन्नोपस्थितेरेव तत्र कर्मत्वादिविशेष्यकघटादिप्रकारकान्वयबोधे हेतुतया तत्रोक्तलक्षणागमनसंभवात्। न चैवं राजपु
रुषमानयेत्यादितत्पुरुषस्थलेपि राजपदस्य विभक्तिसाकांक्षत्वप्रसंगः। तादृशे हि स्थले कर्मत्वविशेष्यकराजप्रकारकान्वयबो
धोत्पत्तावाकांक्षाबोधे राजपदाव्यवहितोत्तरपुरुषपदाव्यवहितोत्तरामपदत्वावच्छिन्नोपस्थितेर्हेतुत्वकल्पनायाआवश्यकत्वा
त्। तत्रा काांक्षायाउपगमे च तत्र कर्मत्वांशे पुरुषस्येव राजशेष्यकान्वयबोधप्रसंग इति वाच्यं। इदं हि स्थलीयकर्मत्वादिविशेष्यकराजा
द्यन्वयबोधे राजपदाव्यवहितोत्तरपुरुषपदाव्यवहितोत्तरामपदत्वावच्छिन्नोपस्थितिर्हेतुना यां राजादिपदे पुरुषादिवि २२
शेष्यकस्वार्थविशेषणकान्वयबोधपरत्वेनागृह्यमाणात्वस्मृतिवैशिष्ट्यतया न तथाविधराजादिपदाव्यवहितोत्तरपुरुषादिपदा
व्यवहितोत्तरामपदत्वादेरेवाकांक्षात्वरूपत्वमिति तत्पुरुषस्थले अन्वयादिपदेन तथाविधान्वयबोधपरराजादिपदाकांक्षाविरह
त्। यत्र च राजादिपदस्यानोत्तरपदार्थविशेष्यकस्वार्थान्वयबोधपरता तत्र च इदं हि समासस्थल एव तत्पुरुषस्थलेपि तत्राकांक्षासत्व
मिष्टमेवेत्यवधेयं। अभिमतान्वयबोधदशायामाकांक्षावारणायअज्ञातास्वार्थान्वयबोधकत्वमपि आकांक्षालक्षणे निवेश्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नीयं। तस्य जनकत्वसंबंधेनान्वयबोधाभाववत्त्वपर्याप्तिविशिष्टत्वो अतोऽजनितान्वयबोधकस्यापि पदस्य पुनरनुसंधाने साकां
क्षत्वोपपत्तेः। अजनितान्वयबोधकत्वं च स्वरूपसदेव शाब्दबोधोपयोगि। जनितान्वयबोधदशायां वक्ष्यमाणप्रतिबंधकसत्त्वेन
शाब्दबोधानुदयात्। न तु तज्ज्ञानं जनितान्वयबोधदशायामपि न तज्ज्ञानसंबंधेन तद्धेतुतया तदानीं शाब्दबोधवारणस्याशक
त्वया वक्ष्यमाणप्रतिबंधकताकल्पनस्यावश्यकतया तद्धेतुत्वे मानाभावात्। यत्तु निरुक्तं अन्यथाननुभाववत्त्वज्ञानहेतुतयैव ज
नितान्वयबोधनादशायां शाब्दबोधवारणसंभवति। तथा हि सति कोऽयोऽन्यथाऽनुभवाभाववत्त्वमेवान्ययाननुभावकत्वं
स्वपुरुषः। न ह्यत्वं च पदस्य येन केनचित् संबंधेन बोधाः एवं चान्यथानुभवदशायामेनाहशान्वयाननुभावकत्वज्ञानमेव न सं
भवति। स्वनिष्ठत्वेनान्वयाननुभवज्ञाने स्वरूपसन्नेव स्वनिष्ठान्वयानुभवस्य विरोधित्वात्। योग्यतावच्छेदकस्थले स्वरूप
सत्प्रतियोगिन एव विपरीततद्धि प्रतिबंधकत्वादिति तदसत्। अन्वयानुभवदशायामन्वयानुभवाभावज्ञानानुपपत्त्यापि अन्व
यबोधाप्रवाहे न पूर्वोत्पन्नेन तज्ज्ञानेनान्वयबोधोत्पत्तिः द्वितीयक्षणेऽन्वयबोधानुत्पत्तिजनकेबाधकाभावात्। तस्मात्

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

घटपदाव्यवहितोत्तरत्वम्पदत्वावच्छिन्नपूर्वाविशेषसमभिव्याहाररूपपदास्मर्यस्वज्ञानमेवान्वयबोधहेतुर्नत्वन्वयानतुभावक
त्वस्यायानिनिष्कर्षः। अत्र च कर्मत्वादिविशेष्यकाधेयतासंसर्गकघटादिप्रकारकशाब्दबुद्धित्वावच्छिन्नं प्रति अम्पदत्वावच्छिन्न
विशेष्यताकघटपदत्वावच्छिन्नाव्यवहितोत्तरत्वप्रकारकनिर्णयत्वेनआनुपूर्वीज्ञानस्य हेतुता बोध्या। अव्यवधानांशनिवे
शेघटः पटमित्यादौ नकर्मताविशेष्यकघटप्रकारकान्वयबोधः अत्र अस्मदादेः घटादिव्यवहिततयाविशेषदर्शिनां घटादिपदा
व्यवधानज्ञानसंभवात्। तत्राप्यव्यवधानभ्रमवतः पुरुषस्य भवत्येवतादृशान्वयबोधः। उत्तरत्वांशनिवेशात्। अमुघटइत्यादौ
नतथाविधान्वयबोधः। तत्रागादिपदस्य घटपदपूर्ववर्त्तितयाविशेषदर्शिनां उत्तरत्वज्ञानासंभवात्। भ्रांतानां च भवत्येव ३०
तादृशान्वयबोधः। अव्यवधानं च स्वोत्तरवर्णोत्तरत्वं उत्तरत्वं च स्वध्वंसप्रागभावप्रतियोगित्वं। अथात्र यदि घटपदस्याम
मस्वपदार्थः। तदा अस्मते घटपदाव्यवहितं घटपदोत्तरत्वेनाकारकज्ञानस्यैव हेतुत्वं लभ्यं। तादृशं च ज्ञानं अस्मदघटइत्यादा
वपि विशेषदर्शिनां संभवति। तादृशानुपूर्व्यस्यापि घटपदाव्यवहितोत्तरत्वात्। अव्यवहितपूर्ववृत्तिघटपदोत्तरत्वाद्याकांक्षा यदि चत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पदव्यक्तित्तथानदानुन पदव्यक्त्याव्यवहितत्वविशिष्टत्वं तत्र पदव्यक्त्युत्तरत्वप्रकारकज्ञानत्वेन हेतुत्वं पर्यवसितं। तथा च पद-
व्यक्तिभेदेनानन्तकार्यकारणभावप्रसंग इति चेन्न मयेतेतत्पदस्याव्यवहितोत्तरत्वं स्वोत्तरत्वोभयसंबंधावच्छिन्नघटपदत्वावच्छि-
न्नप्रकारतानिरूपितां पदत्वावच्छिन्नविशेष्यताकनिर्णयत्वेनैव हेतुता वाच्या उपदर्शितस्थलीयानुपदविशेष्यकं नारदोभयसं-
सर्गावच्छिन्नघटपदप्रकारताशालिज्ञानं च भ्रम एव तादृशानुपदस्य तथाविधोभयसंबंधेन केनापि घटपदेन वैशिष्ट्य-
विरहादिति न तत्त्वविशेषदर्शिनां शाब्दबोधप्रसंग इत्यवधेयं। अथ अकारोत्तरमत्वादिकमेव अस्मदन्वायित्वावच्छिन्नधर्मिकघट-
पदाव्यवहितोत्तरत्वनिर्णायत्वेन हेतुत्वे परमितौ वपिविशेषदर्शिनां शाब्दबोधानुदयप्रसंगः। अकारोत्तरत्वमत्वाद्यवच्छिन्न-
स्य तथाविधप्रकारस्य अकारादिव्यवहिततया घटादिपदाव्यवहितोत्तरत्वविरहात् तद्धर्मिकतन्निर्णायस्याभ्रमत्वादिति चेन्न
अस्मदन्वायवच्छिन्नधर्मिकघटादिपदाव्यवहितोत्तरत्वनिर्णायकस्य चकारोत्तरमत्वाद्यवच्छिन्नघटादिपदाव्यवहितोत्तरत्वनिर्णा-
यत्वं नार्थः किंतु मत्वाद्यवच्छिन्नधर्मिकघटपदाव्यवहितोत्तराकाराव्यवहितोत्तरनिर्णायत्वमिति न किंचिद्दोषः। अथ घटपदपद

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्यादौ मकाराद्यर्थघटो नाम पदत्वावच्छिन्नविशेष्यक घटादिपदाव्यवहितोत्तरत्वज्ञानासंभवात् । कथं कर्मत्वादिविशेष्यक घटाद्यन्वयबोध
शक्तिचेत् नन्वानादृशस्थले मकारादेरभ्रंज्ञानावपि तत्स्थानीयेन तु स्वारादिना अम्पदत्वावच्छिन्नस्य स्मारणात् एवं कर्मत्वादिविशेष्यकाधेयता
दिसंसर्गक घटादिप्रकारक शाब्दबोधो जायते । नान्यथा कर्मत्वादिपदार्थस्मरणानुरोधेनापि तदा अम्पदत्वावच्छिन्नोपस्थितेरावश्य
कता । अन्यथा कर्मत्वादिशक्ततावच्छेदकीभूतं पदत्वावच्छिन्नामादिपदज्ञानरूपकारणानामभावात्पदार्थोपस्थितेरेवासंभवात् । सर्व
त्रैव चादेशादेशादेशाभावस्थलेष्वयमेव गतिश्चिन्तनीया । यदत्वाम्पदत्वावच्छिन्नोपस्थितिं विनापि अनुस्वारादेः कर्म
त्वादिशक्तत्वभ्रमाधीन कर्मत्वाद्युपस्थित्या शाब्दबोधोऽनुपपत्तिः । तदानन्तरं ज्ञातोऽबोधेनानुत्वावच्छिन्नविशेष्यकघटपदाव्यव ३१
हितोत्तरत्वज्ञानस्यापि हेतुता स्वीक्रियते परस्परं व्यभिचारस्थाने निरसनीयः । घट अम्पदस्मारे अस्मापुनः ज्ञानविरहदशायां कर्मत्वाविशे
ष्यकघटाद्यन्वयबोधोऽयं तु न भवितुमर्हति । तदा अम्पदत्वावच्छिन्नविशेष्यकघटादिपदाव्यवहितोत्तरत्वं न वक्तव्यं । किन्तु मकाराद्यव
च्छिन्नविशेष्यकतज्ज्ञानत्वेनैव निवेश्यं । एवं घटोपदानन्तरं घटस्थानन्यानि मांदोच कर्मत्वादिविशेष्यकघटाद्यन्वयबोधो न स्यात् । ओंकार

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वादिधर्म्मितावच्छेदककघटादिपदाव्यवहितोत्तरज्ञानत्वेनापि हेतुत्वं न तु ना कल्पनीया। यदा वा नयेन्यादौ औकारादेरभावेपि आकारादि
कपदेन औकारादेः स्मृतौ सत्यामेव तादृशान्वयबोधो जायते। आकारादेः कर्मत्वावच्छिन्ने पदार्थस्मरणानुरोधेनापि तत्स्मरणस्यावश्यक
त्वात्। विनैवौकारादिस्मरणं आकारादेः शक्तिभ्रमादिना कर्मत्वाद्युपस्थितिमात्तादृशबोधस्यानुभवसिद्धत्वेन तन्नायत्या आकारादिधर्म्मिताव
च्छेदककघटादिपदाव्यवहितोत्तरज्ञानत्वेनापि तादृशान्वयबोधं प्रति हेतुत्वं न तु कल्प्यं एवं कुम्भं कलशं भौ कलशादिसत्त्व आनुपूर्वी
ज्ञानादीनामपि तादृशान्वयबोधे पृथक् कारणत्वं बोध्यं। परस्परं व्यभिचारस्त्वगत्या तत्तदानुपूर्वीज्ञानाव्यवहितोत्तरत्वं न तु तत्तदानुपूर्वीज्ञानज
न्यतावच्छेदककोटौ निवेशपारणीयः। अव्यवहितोत्तरत्वानुगमात् न व्यक्तिविश्रान्तिरिति नाशंकनीयं। अनुमितिपरामर्शविचोपदर्शित
रीत्यां तदनुगमसंभवात्। तत्तदानुपूर्वीज्ञानजन्यतावच्छेदकतया जातिविशेषाणां स्वीकारः। नानाविधानुपूर्वीविषयकसमूहालंबन
जन्यशाब्दबोधे जातिसांकर्यप्रसंगेन पराहतः। यत्तु तादृशान्वयबोधे घटं घटौ कुंभं कुंभौ आदिष्विव घटानुपूर्वीज्ञानानां कर्म्मत्वग्रहेण नव्यक्ति
कविभक्तिविशेष्यकघटग्रहोत्पत्तिकप्रातिपदिकाव्यवहितोत्तरत्वज्ञानत्वेनैव हेतुता अतो अव्यवहितोत्तरत्वस्य कार्यतावच्छेदक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कोनैअनिवेशेपि न व्यभिचारः। घटपदाविस्मादि इंघस्थलेपि विशिष्टाभिन्नि घटस्य पदादिपदार्थव्यवहितोत्तरत्वं प्रति संधाने सत्येन घटकर्मत्वा
द्यन्वयबोधस्यापत्तेर्न व्यने। अतोन तत्र व्यभिचारप्रसंगः। तन्नीयादिविषयमते: पदादिपदस्य च कर्मत्वादिघटयोर्लक्षणारूपवृत्तिसत्वात्
लक्षणाग्रहस्य च कालेऽसतिशक्तिभ्रमे घटे न पदमिन्याद्याकारतः पूर्वज्ञानात् घटकर्मत्वाद्यन्वयबोधापत्तेः अतः कर्मत्व घटादिनिष्ठवृत्तिनिरू
पकत्वस्य पेक्ष्य न रूढितोनवृत्तिकत्वंमि वेशितं। न च तत्र पदजन्यपदार्थोपस्थितिविरहेणैव न तादृशान्वयबोधप्रसंगइतिवाच्यं। नरानीमेव घटः
कर्मत्वमित्यादिनिराकांक्षवाक्यजन्यघटकर्मत्वाद्युपस्थिति सत्वेन तादृशान्वयबोधप्रसंगस्य दुर्वारत्वात्। अथ कर्मत्वादिविशेष्यक घटादिप्र ३२
कारकशाब्दबुद्धौ कर्मत्वादिरूढ्या वृत्तिकविभक्तिविशेष्यक घटादिरूढ्या वृत्तिकपदादिपदाव्यवहितोत्तरज्ञानत्वेनानुगतकार्यका
रणभावकल्पनेपि कार्यतावच्छेदककोटौ व्यवहितोत्तरत्वनिवेशनमावश्यकं। अन्यथा तदादिपदानुपदंतरस्येव वायनिभ्रमात्। लक्ष
णातो वायत्रा धेयत्वादि संबंधेन घटादि विशिष्टकर्मत्वादेरुपस्थित्या तत्र स्वपदार्थान्वयबोधोजनितः। तत्र घटादिरूढ्या वृत्ति
कपदाव्यवहितोत्तरत्वेन कर्मादिरूढ्या वृत्तिकविभक्तेरज्ञानान् व्यभिचारः स्यादिति चेत् न प्रकृतिप्रत्ययार्थान घटकर्मत्वाद्युपस्थितिम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लकशाब्दबोधकघटकर्म्मत्वादेरुद्देश्यभावविधेयभावेनैव शाब्दबोधो जायते यत्र चोपदर्शितविशिष्टस्यैव पदार्थता न त्वविशेषणतावि
शेष्यभावमात्रं तेषां न तदुद्देश्यविधेयभावोपि स्वपदार्थस्यैवापरपदार्थस्य विधेयतया भानानुभवात्। एवं चोक्तस्थले घटादि
बोद्देश्यतानिरूपितकर्म्मत्वादिविधेयताया एवजननतावच्छेदकत्वोपगमान्न व्यभिचारावकाशः स्यादतः स्वसमत्। घटकर्म्मत्वाद्यन्व
यबोधे कर्म्मत्वादिगृहीतवृत्तिकविभक्तिविशेष्यकघटादिगृहीतवृत्तिकप्रातिपदिकप्रातिपदिकाव्यवहितोत्तरत्वज्ञानस्यैव हेतुत्वेन यत्र कर्म्म
त्वादिपदेऽव्यभ्रमादत्वाद्भ्रमः तत्र घटः कर्म्मत्वमित्यादिवाक्यात्। नादृशान्वयबोधस्य सर्वानुभवसिद्धस्यानुपपत्तेः। वास्त्वविभक्ति
कविशेष्यकप्रातिपदिकाव्यवहितोत्तरत्वज्ञानात्। न च विभक्तित्वावच्छिन्नविशेष्यताकनादृशप्रातिपदिकाव्यवहितोत्तरत्वज्ञानत्वे
न हेतुताकल्पने। न तु वास्त्वविभक्तिविशेष्यकतज्ज्ञानत्वेनेत्यतावोस्तु उपपत्तिरिति वाच्यं। अमादेर्विभक्तित्वपक्षानन्तोपसूप
दत्वाद्यवच्छिन्नविशेष्यकघटपदाव्यवहितोत्तरत्वज्ञानात्। नादृशान्वयबोधीनपत्त्या विभक्तित्वाद्यवच्छिन्नविशेष्यकज्ञानत्वेन
हेतुत्वासंभवात्। विभक्तित्वव्याप्यधर्मावच्छिन्नविशेष्यताकज्ञानत्वेन हेतुत्वोपगमान्नेयमनुपपत्तिरित्यपि न वक्तव्यं --- स्ववि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शिष्ट मत्वादिरूपाम् । एतत्स्यापि विभक्तित्वव्याप्यत्वेपि अध्वंसत्वादिनावर्णानरध्वंसावगाहिता इत्थं धर्मावच्छिन्नविशेष्यकशा
नस्यापि विभक्तित्वव्याप्यधर्मावच्छिन्नविशेष्यताकत्वाभावेन न तत्ता इत्यान्वयबोधानुपपत्तिः । एवमाकांक्षानिर्णायकस्यैव शाब्दबोधहेतु
तया निर्णायकत्वस्यापि विशेष्यतावच्छेदकप्रकारतावच्छेदकताकविशिष्टाभिवेशपुर्व्विवचनतया अस्मदत्वादिरूपविशेष्यतावच्छेदकप्र
कारपदत्वादिरूपप्रकारतावच्छेदकताकविशिष्टाभिवेशपुर्व्विवचनतया अस्मदत्वादिरूपविशेष्यतावच्छेदकघटपदत्वादिरूपप्र
कारतावच्छेदकानां विशिष्टाभिवेशनमावश्यकमेव । वस्तुतोऽतिरिक्तविभक्तिप्रातिपदिकसाधारणानुगतानतिप्रसक्तविभ
क्तित्वप्रातिपदिकादिनिर्वचनस्यशक्यत्वात् तथाविभक्तित्वव्याप्यस्यास्मदत्वादेः प्रातिपदिकत्वेन च घटपदत्वादेश्च गमे ३२
शकत्वस्य च न त्वविभक्तित्वादरूपः शब्दस्यास्यानुजातिमेयम् एवैतिना नतु गमञ्जिति वाच्यं । अकारत्वनारत्वादिना जातिसंकरप्र
संगादिस्यत्तं सामान्यशब्दाभेदेन । एतेन घटकर्मत्वादिपदार्थानां विशिष्टाभिवेशसामान्यतो नामार्थप्रकारतानिरूपितविशे
ष्यतासंबंधेनशाब्दबुद्धित्वं निर्विभक्तिपदजन्योपस्थितित्वेन विशेष्यताप्रत्यासत्त्या हेतुताविभक्तिपदज्ञानत्वेन वासत्त्योपस्याप्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वऽप्रमासत्वाघटः कर्मत्वमित्यादिवाक्यउपदर्शितान्वयबोधवारणाय कल्प्यते लाघवात्। नामार्थप्रकारकत्वचनादान्वयाप्रसिद्धिसं
बंधावच्छिन्नायाश्चाः अतोऽयं घटःश्यामादिवाक्यजन्यनामार्थयोरभेदान्वयबोधेन व्यभिचारः। यदि च एतादृशकार्यकारणकल्पनयोः
अमघटःपदं घटःश्यामादौ कर्मत्वादिविशेष्यकघटादिप्रकारकान्वयबोधवारणं न संभवतीति विभाव्यते। न च प्रातिपदिकार्थमात्रवि
शिष्यभिन्नेष्वप्रकारतानिरूपितसंबंधावच्छिन्नघटादिप्रकारतानिरूपितविशेष्यतासंबंधेन शाब्दबोधं प्रति घटाद्यर्थकप्रातिपादि
कात्यवहितोत्तरत्वप्रकारकविभक्तिपदज्ञानजन्योपस्थितेर्न विशेष्यताप्रत्यासत्त्यानादृशविभक्तिपदज्ञानत्वेन वाच्योपस्थाप्यत्व
प्रत्यासत्त्याहेतुताकल्प्यं एवं घटः आनयनीयादौ कर्मत्वादिसंबंधेन आनयनाद्यंशे घटादिप्रकारकशाब्दबोधापत्तिरित्यपि निरस्तं
आनयनादेर्विभक्तिजन्योपस्थित्याविशेष्यतया तस्य घटादिविशेष्यतया भानासंभवादित्यपि संहरपराहतमोऽयमप्यन्नाधिकद्द
घणां। यत्र घटादिप्रकारतानिरूपितविशेष्यतासंबंधेनान्वयबोधं प्रति उपदर्शितविभक्तिज्ञानजन्योपस्थित्यादिहेतुर्न्ने यत्र घटादि
रूपविक्रियातुकलव्यापारे आख्यातस्य लक्षणात्र प्रथमान्तप्रातिपदिकोपस्थाप्यविशेष्यताप्रकारकभेदान्वयबोधे व्यभिचारः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एवं कर्म्मत्वमानयनं कृतिश्चैत्र इत्यादौ आनयनकृतिश्चैत्रांशे कर्म्मत्वानयनकृतीनां भेदान्वयबोधवारणे कर्म्मत्वादिप्रकार
कान्वयबोधं प्रति समानविशेष्यतया समस्तासमस्तपदाभिमतविभक्तिज्ञानजन्योपस्थितिहेतुत्वे घटमानयनीत्यादौ वाक्यसमानय
नादिविशेष्यककर्मत्वादिप्रकारकभेदान्वयबोधे व्यभिचारश्चेति न च प्रातिपदिकज्ञानजन्यघटादिप्रकारकशाब्दबुद्धित्वेनै
व उपदर्शितकार्यतावच्छेदकत्वोपगमादुपदर्शितास्यानायधीनघटादिप्रकारकशाब्दबोधेन व्यभिचार इति वाच्यं तादृशशा
ब्दबोधस्यापि प्रथमोत्पन्नप्रातिपदिकज्ञानजन्यतया तस्यैव व्यावृत्तेः संभवात्। घटाद्यर्थप्रातिपदिकज्ञानजन्यत्वनिवेशेपि त
थाविधशाब्दबोध एव घटादिपदज्ञानादपि यत्र किंचिद्ध्वनितनया घटादेर्विषयता तत्र व्यभिचारस्य दुर्वचत्वात्। तस्माद्वि ३५
शिष्यांपदतायवच्छिन्नविशेष्यकघटपदतावच्छिन्नाव्यवहितोत्तरत्वज्ञानविशिष्टकर्मत्वादिविशेष्यताधेयतादिसंसर्ग
कघटादिप्रकारकशाब्दबोधं प्रति तादृशाव्यवहितोत्तरत्वज्ञानत्वादिना आनुपूर्वीभेदेन भिन्नत्वमेव हेतुत्वमनायमावक्रोपः
मिति घटादिपदस्य घटादौ शक्तिमगृहीतवतः उरुवस्यकलशपदस्य कलशः कर्मत्वमित्यादिनिराकांक्षवाक्यात् घट

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कर्मत्वादीनांउपस्थितिदशायांघटमित्याद्यानुपूर्वीज्ञानात्घटकर्मत्वाद्यन्वयबोधवारणायतन्नावच्छेदककोटौघटादिपदेषुग
दिगृहीतवृत्तिकत्वमपिनिवेश्यं।एवंचतथाविधस्यैवउक्तसोघटमित्याद्यानुपूर्वीज्ञानाव्यवहितोत्तरक्षणेयमानकलशमित्यादि
वाक्यजन्यतथाविधशाब्दबोधेव्यभिचारवारणायकार्यतावच्छेदककुक्षिप्रविष्टंघटादिपदेपितन्निवेश्यं।नचस्वजन्यघटक
र्मत्वादिगोचरोपस्थितिद्वारैवघटमित्याद्यानुपूर्वीज्ञानस्यघटकर्मत्वाद्यन्वयबोधजनकत्वोपगमात्गृहीतघटादिवृत्ति
कत्वकस्यचघटमित्याद्यानुपूर्वीज्ञानजन्यघटाद्युपस्थितिविरहेपिनोपदर्शितस्थलेशाब्दबोधापत्तिरितिवाच्यं।एवमपि
यत्रकलशःकर्मत्वादिस्यादितिनिराकांक्षवाक्येपिविषयमेघटमित्याद्यगृहीतवृत्तिकपदघटितानुपूर्वीविशेषावच्छिन्नविषय
कज्ञानंतादृशसमूहालंबनात्तुघटकर्मत्वाद्युपस्थितिस्तादृशपदार्थोपस्थितिस्तथाविधानुपूर्वीज्ञानजन्यतयास्वजन्यत
यास्वजन्यतथाविधयोपस्थितिसंबंधेनतादृशानुपूर्वीज्ञानसत्वात्।घटकर्मत्वाद्यन्वयबोधापत्तेर्दुर्वारत्वात्।तस्मात्तत्त
दर्थगृहीतवृत्तिकत्वमवश्यंपदविशेषणमुपगंतव्यं।वस्तुतस्तुघटादिविषयकशाब्दबुद्धिंप्रतिघटादिपदवृत्तिज्ञान

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जन्यघटाद्युपस्थितित्वेन पदार्थोपस्थितेः स्वातंत्र्येण हेतुत्वोपगमात् घटमित्याद्यानुपूर्वीज्ञानस्य च तादृशाद्युपस्थिति
सहकारेणैव फलोपधायकत्वमिति। अत एव उक्तस्थले तादृशशाब्दबोधवारणं संभवति। तादृशानुपूर्वीज्ञानघटितसामग्री
विरहादित्याकांक्षाज्ञानहेतुतायां तत्तदर्थगृहीतशक्तिकत्वस्य पदविशेषणानभ्युपगमेपि न क्षतिः। अर्थेतादृशविशेषण
पेण पदार्थोपस्थितेः स्वातंत्र्येण कारणतानाकलनापेक्षयाकांक्षाज्ञानहेतुतायां तत्तदर्थगृहीतशक्तिकत्वस्य पदविशेषणता
याः पदार्थोपस्थितेः कारणतानिर्वाहाय च तस्याः सामान्यतः उपस्थितित्वेन शाब्दत्वावच्छिन्नं प्रत्येक हेतुतायाः एवकल्पन
मुचितं। यदि च तत्तदर्थगृहीतशक्तिकत्वनिवेशेपि कालांतरीयपुरुषांतरीयशक्तिग्रहमादायातिप्रसंगः संभाव्यते तदा शक्ति ३५
संबंधेन तत्तदर्थविशिष्टपदनिरूपितविषयतैव निवेशनीया। एवं च कर्मत्ववदस्मदं घटत्ववद्धटपदाव्यवहितोत्तरमित्याका
रकं शक्तिग्राहकमेवाकांक्षाज्ञानं तत्तदर्थान्वयबोधहेतुः। यत्र चानुपूर्वीज्ञानं शक्तिविषयकं शक्तिग्रहस्य स्वतंत्रतत्र च शाब्द
बोधो नास्त्युपेयत एवेति चेन्न। आकांक्षाज्ञानहेतुतायां तत्तदर्थगृहीतशक्तिकत्वानिवेशात्कल्प्यघटमित्याद्येकैकविधानुपू

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यौ ज्ञानस्य कर्मत्वरूपविभक्त्यर्थान्तर्भावेनैव घटपदादिरूपसहत्वपदपदार्थभेदेन सहत्वकारणताकल्पनं घटादेः घटपदा
र्थत्वं च लक्षणादिना बोध्यं। एवं लक्षणादिना अन्यपदार्थभिन्नकारणत्वादिरूपविभक्त्यर्थसहत्वस्यैकैकमन्तर्भाव्यापि सहत्व
सहत्वकारणताकल्पनमिति रीत्या सहत्वघटितसहत्वकार्यकारणभावा यत्र तत्र ज्ञाने घटपदज्ञानजन्यपदार्थोपस्थितेर्घटप
दारूपसहत्वपदार्थभेदेन कारणतासहत्वं नम् घटपदार्थोपस्थितेः कर्मत्वकारणत्वादिसहत्वपदार्थभेदेन कारणता।
सहत्वं घटमित्येतादृशानुपूर्वीज्ञानस्य च एककारणत्वमिति रीत्या एकाधिकद्विसहत्वकार्यकारणभावकल्पनामिति महा
लाघवं। अथ यत्र कस्मामेव हेतुतायां अमादिविभक्तेर्घटादिपदे च तत्तदर्थग्रहीतशक्तिमत्त्वं निवेश्य न तदेव घटमित्याद्ये
कविधानुपूर्वीज्ञानस्य कर्मत्वादिरूपैकविभक्त्यर्थमन्तर्भाव्य घटपदादिरूपसहत्वनामार्थभेदेन कारणतासह
त्वं प्रसज्यते। न तदेव न किन्तु न कर्मत्वग्रहीतशक्तिकामपदधर्मिकघटपदाद्यवहितोत्तरत्वज्ञानत्वाम् पदधर्मिकघटग्रही
तशक्तिकपदाद्यवहितोत्तरत्वज्ञानत्वादिना पृथक्पृथग्विभक्त्यादीनां तत्तदर्थग्रहीतशक्तिकत्वं निवेश्य पृथक्पृथगेव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कारणत्वंकल्पनीयं । दंडचक्रादिवत् । परस्परसहकारैरौव फलोपधायकत्वोपगमान्नादिप्रसंग इति चेन्न्यते । एवमप्यनन्तनन्तेयत्र
घटपदघटितात्पूर्वीज्ञानस्याभोशमादिसहस्त्रप्रत्ययानां एकैकमंतभावैवघटपदार्थरूपसहस्त्रनामार्थभेदेनकारतासह
स्त्रस्यकल्पनीयतयासहस्त्रगुणितसहस्त्रकारणताकल्पनं चास्माकं घटपदघटितात्पूर्वीज्ञानस्यार्थविशेषमनिवेश्यअभोशमादि
भेदेनसहस्त्रकारणाकल्पनं घटपदवृत्तिज्ञानजन्यघटपदार्थरूपसहस्त्रनामार्थविषयकोपस्थितीनांसहस्त्रकारणताकल्पनमि
तिसहस्त्रद्वयमात्रेणनतु कल्पनमित्येवंक्रमेणालाघवंईदृशमेवेति । नचानुपूर्वीज्ञानस्यनत्वपदार्थोरूपस्थापारसंबंधेनेवहेतुतायावा
च्यतयाभवत्यतेप्यानुपूर्वीज्ञानस्यपदार्थभेदेनकारणतावच्छेदकत्वमावश्यकमितिवाच्यं । उपदर्शितकार्यहेतुताश्रीकारेपद ३९
दिपदवृत्तिज्ञानजन्यपदार्थोपस्थितिरूपकालेघटमित्यत्रानुपूर्वीज्ञानात् घटकर्मत्वान्वयबोधापत्त्यभावेनआनुपूर्वीज्ञानस्यप
दार्थोपस्थितिद्वारेहेतुत्वानभ्युपगमेपिक्षतिविरहात् । नस्वसमवायसंबंधेनैवहेतुतायाः स्वीकरणीयत्वात् । यदि चानुपूर्वीज्ञा
नस्यपदार्थोपस्थितियोग्यतासंशयादित्वाऽनेनरितत्वात् । शाब्दबोधाव्यवहितपूर्वक्षणेनियमतोऽसत्वेननतस्यसाक्षात्कारत्वे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धहेतुत्वं संभवतीति पदार्थोपस्थितिद्वारैव तस्य तथात्वमावश्यकमिति मन्यते। तथापि तत्तदर्थोपस्थितित्वेन संबंधज्ञानोपेयत्वे प्रयोजनाभावात्।
अपि तु सामान्यत उपस्थितित्वेनैवेति नार्थभेदेनास्याः क्रमानुपूर्वीज्ञानहेतुभेदः। वस्तुतस्तूपस्थितेरानुपूर्वीज्ञानव्यापारत्वेपि समवायस्यैव
प्रत्यासत्तितास्वीक्रियते। नत्वनंतानामुपस्थितिव्यक्तीनां व्यापारस्य कारणतावच्छेदकसंबंधत्वानियमात्। समवायसंबंधानुपूर्वीज्ञान
स्यानियमतः कार्य्याव्यवहितपूर्वक्षणावच्छेदेन कार्य्याधिकरणक्षणावच्छेदेन कुत्रचित् वर्त्तितुमशक्यत्वात्। तथात्वसमवायादिनावि
हत्नौ वाधकाभावात्। स्वस्वव्यापाराव्यतरस्यानियमतः कार्य्याव्यवहितपूर्वक्षणावच्छेदेन कार्य्याधिकरणसत्वमेव कारणतावच्छेदकं। त
च स्वस्यात् तथात्वेपि व्यापारस्यतत्वात्। निर्वह्नीति चेत् समाधीयते तुल्यं समवायस्य तथात्वेपीति। अथैवमपि अर्थविशेष्यविच्छिन्नकर्म
त्वादिविशेष्यकघटादिप्रकारकशाब्दत्वस्यैव घटमित्याद्यानुपूर्वीज्ञानजन्यशाब्दबोधे घटमित्याद्यानुपूर्वीज्ञानजन्यतावच्छेदकतया।
पदार्थभेदेन तत्कारणताकल्पनस्यावश्यकत्वात् परिहारसंभवेति चेत्। न कलशमित्याद्यानुपूर्वीज्ञानजन्यशाब्दबोधे घटमित्याद्यानुपूर्वीज्ञानस्य व्यभिचा
रवारणाय कारणताविशिष्टस्य जन्यतावच्छेदककोटाविवेशप्रवेशनीयतया तत एव पदार्थान्तरविषयकान्वयबोधेपि व्यभिचारवा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रणात्। तत्रपदार्थविषयतां जन्यतावच्छेदककोटौ वनिवेश्यैव तत्पूर्वीज्ञानहेतुताया कल्पनीयत्वामन्यते। अर्थभेदेन तद्धेतुताभेदाभा
वादिति। तस्मात्तदुपदर्शितलाघवात् आनुपूर्वीज्ञानस्यार्थविशेष्यकमनिवेश्यपदज्ञानजन्यपदार्थोपस्थितिं प्रत्यर्थविशेषं निवेश्यैव पद
ज्ञिनहेतुतेति निष्कर्षः। एतेन कलञ्जः कर्तृत्वमित्यादिवाक्यजन्यघटकर्मत्वाद्युपस्थितिदशायां घटादौ घटपदादिकृत्रिमगृहीतवतः पुंसो
घटकर्मत्वाद्यन्वयबोधवारणाय तत्स्वरूपं ताद्दशान्वयबोधे घटमित्याद्यानुपूर्वीज्ञानजन्यघटकर्मत्वाद्युपस्थितित्वेन हेतुता वाच्या तत एव चोप
पत्तौ [illegible]काङ्क्षाज्ञानस्य स्वतन्त्रहेतुत्वमप्रामाणिकमित्येतादृशोन्यासस्मादिग्रन्थेन चिन्तामणिकारोक्तमेव निरस्तः। उपदर्शितरीत्ये
वतथाविधापत्तिवारणसंभवात्। तदर्थमुपदर्शितरीत्या कार्यकारणभावकल्पप्रसंगप्रयुक्तगौरवकवलितत्वात् पूर्वीज्ञानजन्यप
दार्थोपस्थितेरूपदर्शितरूपेणहेतुताकल्पनप्रकारकस्यासंनतमप्यश्रद्धेयत्वात्। वस्तुतस्त्वेतादृशापत्तिवारणाय वस्तुतस्त्वित्यादिवि
शेष्यकघटाद्यन्वयबोधे अस्मदुक्तायवच्छिन्नत्वरटपदत्वाद्यवच्छिन्नाव्यवहितोत्तरत्वरूपानुपूर्वीज्ञानत्वेन घटपदज्ञानत्वेनतावच्छि
न्नधर्मिकास्मदुक्तावच्छिन्नाव्यवहितपूर्ववर्तित्वज्ञानत्वेन हेतुताकल्पनइमन्त्र विनिगमनाविरहात्। अथ यथाविधानुपूर्वीज्ञानस्ये
३ तामप्युक्तवत्वावलंबनेपि घटमित्याद्यानुपूर्वीज्ञानजन्यघटकर्मत्वाद्युपस्थितित्वेन स्वजन्यघटकर्मत्वाद्युपस्थितिसंबन्धेन तादृशानुपूर्वीज्ञानत्वेन वा हेतुताक
ल्पनइत्यत्र विनिगमनाविरहस्तदपि आकांक्षाज्ञानहेतुतानिरूपणे स्फुटीभविष्यतीति मन्तव्यं। अथ कर्मत्वादि ४३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वहेतुताया॥ एवं चोभयविधानुपूर्वीज्ञानदशायामेव शाब्दबोधः स्यात्। न त्वेकविधानुपूर्वीज्ञानदशायां न चानुभवविरुद्धमिति चेत्। न। तृ
णारणिमणिन्यायेन प्रत्येकं निवेशपृथक्पृथक्सामग्रीव्याप्तिस्वीकारेणैकविधानुपूर्वीज्ञानादपि शाब्दबोधोपपत्तेः। व्यभिचारवारणा
प्रकारस्तु प्रागेव दर्शितः॥ ३ उपदर्शितरीत्या च कर्मत्वादिविशेष्यकानुकूलत्वादिसंसर्गकानयनादिप्रकारकान्वयबोधे तत्पदत्वावच्छिन्नवि
शेष्यकपदत्वावच्छिन्नोत्तरत्वज्ञानत्वेनापि हेतुता बोध्या। एवं च घटकर्मकानयनकृत्यादिविषयकशाब्दबोधे आनयतीति पदं घटमित्येत
त्पदपरैकवाक्यतापन्नं इत्याकारकसमभिव्याहारज्ञानस्य आनयनकृतिविशिष्टचैत्रादिविषयकशाब्दबोधे चैत्र इति पदं आनयतीति
पदैकवाक्यतापन्नमित्येतादृशसमभिव्याहारज्ञानस्यापि। हेतुत्वम्॥ द्वितीया॥ एवं इदंत्वावच्छिन्नोद्देश्यकघटादिविधेयकान्वयबोधे घट
पदत्वावच्छिन्नविशेष्यकेदंत्वावच्छिन्नविशेष्यकेदंत्वावच्छिन्नोत्तरत्वज्ञानत्वेन हेतुतापि घटोऽयमित्यादौ तथाविधान्वयबोध
वारणाय बोध्या। अत्र च समभिव्याहारज्ञानस्यापि हेतुता पूर्ववद्बोध्याः। अयं यथा घटो वयं घटः प्रमेयः इत्यादौ इदमादिपदेन सममेक
वाक्यतापन्नघटादिपदार्थस्य इदमादिपदार्थांशेन विधेयतयाऽन्वयबोधः। इदमादिपदघटादिपदयोः समभिव्याहारज्ञान

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्य चेदंत्वावच्छिन्नोद्देश्यकघटादिविधेयकशाब्दत्वं नञ्स्यतावच्छेदकं तथासति घटो यन्निपादिनकाधीन घटत्वावच्छिन्नोद्दे
श्यकेदंत्वावच्छिन्नविधेयकशाब्दबोधे स्वतन्त्रकार्यकारणभावप्रसंगात्। किंतु अयमाधारत्वं इदंत्वावच्छिन्नविषयतानिरूपितघटत्वा-
वच्छिन्नविषयताशालिशाब्दबोधविषयविशेषाभिमिन्न नादृशसमभिव्याहारस्थलीयविधि एवमेव नाइदमभिन्नघटत्वावच्छिन्नोद्देश्यकप्र-
मेयादिविधेयकबोधतात्पर्यकात् अयं घटः प्रमेयः इत्यादिवाक्यादिदंत्वावच्छिन्नोद्देश्यकघटादिविधेयकबोधतात्पर्यग्रहदशायामपि य-
दि नैतादृशो बोधः। तदा एतादृशबोधं प्रति इदमादिपदावच्छिन्नोत्तरत्वप्रकारकघटादिपदज्ञानहेतुतायां घटत्वोद्देश्यकबोधप-
रत्वेन ज्ञायमानत्वं घटादिपदविशेषणं देयं। अथैतादृशानुपूर्वीविशेषादिरूपाकांक्षाज्ञानस्य हेतुत्वोपगमेपि घटमानय ३८
नं चैत्र इमारे आनयनार्थशोकस्मारिपदाद्ये वैवार्थशेवानुकूलकृत्यादिसंबंधेन आनयनादेः कथं नान्वयबोधः। अपदर्शितानुपू-
र्वीज्ञानादेः कर्मत्वकृत्यादिविशेष्यकघटानयनादिप्रकारकशाब्दबोधं प्रत्येव हेतुतया कर्मत्वकृत्यादिसंसर्गकबोधस्य ततो वारणा
संभवात् इति चेत्। तादृशशाब्दबोधस्यापि सिध्यावापादकाप्रसिद्ध्या आपत्त्यसंभवात्। तादृशशाब्दबोधमापादयतां कुतवि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रसिद्धिरित्यवश्यं वक्तव्यं। अथ यत्र तत्पदादिना कर्मत्वादिसंबंधेन घटादिविशिष्टमानयनादिकं उपस्थापितं तत्रैव तत्प्रसिद्धिरि
ति चेन्न तर्हि तादृशविशिष्टार्थविषयकतदादिपदवृत्तिज्ञानजन्यतादृशविशिष्टत्वोपस्थित्यादिसहकृततदादिपदघटितानुपूर्वी
विशेषज्ञानघटितसामग्र्या एव तादृशविशिष्टविषयकशाब्दबोधोत्पादप्रयोजकतया तदभावात् प्रकृतस्थले तदापत्तिविरह इति
एतेन घटमानयति चैत्र इत्यादौ घटकर्मत्वानयनकृतित्वचैत्रादिपदार्थानां विशेष्यविशेषणभाववैपरीत्येनान्वयबोधप्रसंगो
पि निरस्तः। यादृशानुपूर्वीज्ञानाकाले तादृशबोधः प्रसिद्धः। तादृशानुपूर्वीज्ञानादिघटितसामग्र्याः प्रकृतेऽभावात्। एवं निपाता
तिरिक्तनामार्थद्वयस्याभेदान्वयबोधो न भवतीत्येतादृशनियमेऽपदर्शिताकांक्षाज्ञानहेतुतैव निर्वाहिकेत्यवसेयं। तथाहि घटः
कर्मत्वमित्यादौ घटकर्मत्वादिरूपनामार्थयोराधाराधेयभावादिसंबंधेनान्वयबोधः तत्कारणीभूतघटमित्याद्यानुपूर्वी
ज्ञानादिरूपकारणविरहादेव नोत्पद्यते। एवं तत्र कालिकादिसंबंधेन घटकर्मत्वयोर्घटः प्रमेयभूतलं घट इत्यादौ आधारा
धेयभावसंबंधेन प्रमेयघटभूतलयोरन्वयबोधोऽपि तादृशसंबंधेन कर्मत्वविशिष्टघटप्रमेयविशिष्टभूतलाद्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पस्यापकीभूतनत्वादिपदघटितानुपूर्वीविशेषज्ञानघटितसामग्रीविरहादेव नोपपद्यते इति तादृशनियमनिर्वाहः। तादृशनि
यमेनापि निपातातिरिक्तत्वविशेषज्ञानघटितसामग्रीविरहादेव नोपपद्यते इति तादृशनियमनिर्वाहः। तादृशनियमेनापि निपाताति
रिक्तत्वविशेषणानाम्। भूतलेन न घटः पटेन घट इत्यादिस्थले नञ्पदार्थाभावान्योन्याभावाभ्यां घटपटादिपदार्थानां प्र
तियोगित्वानुयोगिभावाधाराधेयभावादिसंबंधेनान्वयबोधेपि न क्षतिः। तादृशस्थल एव भूतले ऽघटो ऽभावपटे भेदो घटस्यापे
नतादृशान्वयबोधापत्तिः शंकनीयाः तादृशान्वयबोधे नञ्पदादिसमभिव्याहृतत्वेन पटादिपदज्ञानस्याकांक्षानसङ्घ्यानेतु ३९
४८ तायाः क्लृप्तत्वात्। प्रकृतस्थले तादृशाकारणाविरहेणापादकाभावात्। एवं सप्तम्यंतानुयोगिवाचकपदसमभिव्याहृतस्थले ए
वनञा संसर्गाभावो बोध्यते समानविभक्तिकानुयोगिप्रतियोगिवाचकपदसमभिव्याहृतस्थले एवं च नञा ऽन्योन्याभावो बो
ध्यते। इत्यतादृशनियमस्यापि समभिव्याहारविशेषरूपाकांक्षाज्ञानहेतुत्वेनैव निर्वाहः। तथाहि भूतले न घट इत्यादिस्थले ए
वघटादिसंसर्गाभावस्य नञा बोधनात्। सप्तम्यंतभूतलादिपदसमभिव्याहृतत्वप्रकारकनञादिपदज्ञानत्वेनैव नञ्पदज्ञान

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्य घटादिसंसर्गाभाववोधं प्रति हेतुत्वात्। भूतलं न घट इत्यादौ नादृशाकारेण विरहान्वये घटादिसंसर्गाभाववोधप्रसंगः। न च ता
दृशसमभिव्याहारभानस्य भूतलादिरूपानुयोगिविशेष्यकविषयकशाब्दबोधं प्रत्येव हेतुत्वात्। उपदर्शितस्थले घटेनेत्या
दौ तदनुयोगिविशेष्यामिश्रितया रबोधापत्तिर्दुर्वारैवेति वाच्यं। अनुयोगिविशेष्यामिश्रितसंसर्गाभाववोधस्य घटाभाव इत्या
दिवाक्याधीनस्यैव प्रसिद्ध्या तत्राभावादिपदसमभिव्याहारज्ञानस्य हेतुतया प्रकृते च तदभावेनापादकाभावात्। एवं घटो न
यइत्यादिस्थले एवं नञा घटाद्यन्योन्याभाववोधनात्। प्रथमान्तपदादिघटसमभिव्याहृतनञ्प्रकारकनञा प[illegible]ानत्वेनै
व तादृशान्योन्याभाववोधं प्रति हेतुत्वात्। पटो न घट इत्यादौ न घटपटयोरन्योन्याभावधीः समानविभक्तिकनामार्थयोरेव
भेदान्वयबोधोत्पत्तेः। तादृशनियमो भेदान्वयबोधपर्यन्तानुधावनं विशेष्यविशेषणवाचकपदयोर्यत्र समानविभक्तिक
नाम नैवाभेदान्वयबोधो भवतीत्येतादृशनियमस्याप्युक्तरीत्या समभिव्याहारज्ञानहेतुतयैवानिर्वाहः। अयं घट इत्यादि
वाक्यादेव बहूनां वादिनां अभेदसंबंधेन घटादिप्रकारकान्वयबोधोत्पत्तेः तत्र प्रथमान्तेदमादिपदसमभिव्याहृतप्रथमान्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

घटादिपदज्ञानस्य हेतुत्वात्। अत्र घटरूपत्वादौ नादृशाकारणाविरहेण न तथाविधबोधोत्पत्त्यभावात्। अथायं घटरूपत्वादौ विशेषणवाच
कपदसमभिव्याहृतविभक्तेरभेदार्थकत्वोपगमात्। नादृशविभक्त्यर्थेनैव समं नामार्थस्यान्वयबोधो भवति न तु नामार्थेनेति कथमुप
दर्शितनियमे मेयान्वयबोधपर्यन्तानुधावनं न च नादृशस्थले अभेदस्य प्रकारत्वोपगमे नादृशसमभिव्याहारज्ञानजन्यतावच्छेदक
कोटौ तत्संसर्गोऽपि विशेषणतयापि निवेशनीयाः। अन्यथा तत्संसर्गभाने नियामकाभावादिति गौरवं। अतोऽभेदसंसर्गकत्वयाभा
नोपगम एवोचित इति वाच्यं। योग्यताज्ञानादीनामेव विषयभाननियामकत्वसम्भवात् वैशिष्ट्यनिवेशस्यावश्यकत्वे व्यभिचार
न वारणात्। समभिव्याहारज्ञानजन्यतावच्छेदककोटौ विषयानामनिवेशेन नादृशसमभिव्याहारज्ञानजन्यशाब्दबोधे भेदी ४०
यसंसर्गस्यापि कस्यभानोपगमेऽपि कार्यतावच्छेदककोटौ तद्योग्यविषयतानिवेशाधिकप्रयुक्तगौरवानवकाशात्। योग्य
ताज्ञानेन समभिव्याहारविशेषज्ञानादीनां सहकारित्वाच्च तदर्थकपदसमभिव्याहारज्ञानजन्यकाले। तत्तद्विषयकशा°
ब्दबोधस्य योग्यताज्ञानबलादापत्तिः। कार्यतावच्छेदकसामानाधिकरण्यमात्रस्य हेतूनां परस्परसहकारित्वे तन्त्रत्वात् समभि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

याहारज्ञानयोग्यताज्ञानादिकार्यतावच्छेदकानां भेदेपरस्परव्यभिचारेपि न तेषां परस्परकारणत्वापत्तिः। अतः योग्यताज्ञान
कार्यतावच्छेदकेन समं समभिव्याहारादिज्ञानकार्यतावच्छेदकस्याभेदादिनिर्वाहाय समभिव्याहारादिज्ञानकार्यतावच्छेद
ककोटौ विषयनिवेशनमावश्यकमित्यपास्तं परेयमेव च तु गमकत्तु यत्र विशेषणविशेष्योरभेदे शक्ति भ्रमादिस्तत्र यं धमादिः न त्वाभे
दप्रकारकशाब्दबोधस्य सर्वतासिद्धतया न तु रोधेन तादृशशाब्दबोधनियामककार्यकारणभावकल्पनाया अभेदस्य
संसर्गाभाववादिनोप्यावश्यकतया नव्यमतेपि भेदसंसर्गकबोधे तादृशसमभिव्याहारादिज्ञानादीनां कारणतावाद्युक्तत्वाच्च। य
दि समभिव्याहारादिज्ञानजन्यतावच्छेदककोटौ विषयनिवेशस्यावश्यकतया नत्रविषयानिवेशेपि तादृशसमभिव्याहारज्ञा
नघटितभेदप्रकारकशाब्दसामग्रीकाले अभेदसंसर्गकबोधसामग्र्याः संसर्गकशाब्दसामग्र्या भिन्नविषयकप्रत्यक्षादि
कं प्रति प्रतिबंधकाधिकत्वं तेषां ङ्गीकरमेव अभेदप्रकारकबोधसामग्र्याः प्रतिबंधकताया उभयवादिसिद्धत्वात्। नत्वतादृश
समभिव्याहारज्ञानघटितभेदप्रकारकशाब्दसामग्रीकाले अभेदसंसर्गकबोधसामग्र्या आवश्यकत्वात्। तत्प्रतिबंधकत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

थैवोपपत्तेः। नातस्तसमभिव्याहारस्थले नघटितमभेदकारकशाब्दसामग्र्याः प्रतिबंधकतांतरं प्रयोजकस्य नइति वाच्यं। अभेदप्रकारकशाब्दबो
धाजनकीभूताभेदसंसर्गकयोग्यताज्ञानतथाविधशाब्दस्मिन्प्रमावामांभभेदसंसर्गकशाब्दबोधहेतुतया अभेदप्रकारकशाब्दसामग्रीनिय
मात्। एतेन विशेषणविभक्तेरभेदार्थकत्वमते अभेदविषयकान्वयशाब्दबोधहेतुत्वात् अभेदप्रकारकशाब्दसामग्रीतत्त्वसामग्रीस
मनियमात्। एतेन विशेषणविभक्तेरभेदार्थकत्वमते अभेदविषयकान्वयबोधे प्रथमादिविभक्तिरिति ज्ञानजन्याभेदोपस्थितेः
कारणताधिकं उपदर्शितसमभिव्याहारज्ञानघटितसामग्री प्रतिबंधकतापन्नाद्याभेदोपस्थित्यभेदप्रकारकज्ञानाविरोधेवाधा ४१
भावादिनामधिकानां निवेशाभ्रेमपि निरस्तं। उपदर्शितरीत्या विशेषणविभक्तेः पदसाधुत्वार्थकतामतेपि न दोषः कारकत्वादिप्रवेशेन आकां
विशेषणविभक्तेरभेदार्थकतथापि नीलघटपदयोः सारोनीलादिपदसमभिव्याहृतविभक्तिजोपस्थानजन्यतापि नीलादिपदार्थे
अभेदबोधस्याउपधिकत्वात्। तत्पदजन्योपस्थितिजन्या अभेदस्य प्रकारत्वासंभवात्। न त्वं संसर्गतोयवनामार्थानां परस्परं अन्वयबोधस्त्व
पगंतव्यं। अतएवोक्तं भूयसाभेदान्वयबोधपर्यन्ता तथावनमावश्यकमेव केचित्। असमासस्थलेपि अभेदस्य संसर्गतयैवभानेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तुप्रकारतयाऽभेदविशेषणताविभक्तेः शक्त्यादिभ्रमदशायामप्यभेदस्य संसर्गतयैव भानस्याभ्युपगमात् प्रकारतया भानस्य चान-
भ्युपगमात् उक्तगौरवस्यानवकाशादित्याहुः। यत्तु नीलो घट इत्यादौ विशेषणविभक्तेरभेदशक्तिभ्रमादिकालेऽभेदस्य विशेषणता-
तया भानोपगमेपि तादृशशक्तिभ्रमादिशून्यकालेऽभेदसंसर्गकान्वयबोधस्वीकारे क्षतिविरहः। नीलघटमित्यादिसमासस्थलीया-
भेदसंसर्गशाब्दसामग्री एव तत्रापि शाब्दबोधोपपत्तेः तादृशसामग्रीप्रतिबंधकतयैव तदानीं भिन्नविषयकप्रत्यक्षादिवारणसंभवा-
त्। कार्यकारणभावबाहुल्यविरहात्। न च कार्यकारणभावाधिक्यविरहेपि तत्राभेदसंसर्गकशाब्दबोधस्वीकारे निर्युक्तिकः। ला-
घवविरहादिति वाच्यं। लाघवविरहेपि समासस्थलीयाभेदसंसर्गकशाब्दबोधसामग्र्याः तत्र शाब्दबोधजनने बाधकाभावात्। साम-
ग्र्याः कार्यजनने लाघवानपेक्षणादिति। तदसत्। नीलो घटः पटः इत्यादौ नीलघटयोरभेदसंसर्गकशाब्दबोधवारणाय नीलादिपदा-
व्यवहितोत्तरत्वप्रकारकघटादिपदज्ञानत्वेनैव समासस्थलीयाभेदसंसर्गकशाब्दबोधनिर्वाहककारणताकल्पनात्। नीलो घट इत्या-
दौ च विभक्तेर्व्यवधायकतया घटादिपदे नीलादिपदाव्यवहितोत्तरत्वस्याभावेन तादृशकारणाभावात् समासस्थलीयाभेदसंसर्गक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शाब्दबोधसामग्रीविरहात्। अत्र च व्यवधायविभक्तिसत्वेप्यव्यवधानभ्रमस्तत्त्वमसमासस्थलसमशीलमेव तत्र नाभेदसंसर्गकबोधेव
नास्माकं विवादः। वस्तुतो नीलो घटः पश्येत्यादौ नीलपदयोरभेदसंसर्गकान्वयबोधवारणाय विशेषणवाचकपदाव्यवहितोत्तरत्वप्रकारक
विशेष्यवाचकपदज्ञानत्वेन हेतुता कल्प्यते अपि तु विशेष्यवाचकपदोत्तरविभक्त्यभाववद्विशिष्टविशेषणवाचकज्ञानपदत्वेन। ता
दृशपदोत्तरत्वं न तादृशपदोत्तरोत्तरपूर्वावच्छिन्नत्वं नतु तादृशपदोत्तरत्वं समानविभक्तिकस्थले विशेषणवाचकपदोत्तरविभक्ते
र्विशेष्यवाचकपदोत्तरविभक्त्यन्यत्वात्। तादृशविभक्त्यभाववत्त्वाव्यवहितपूर्वत्वसंबंधावच्छिन्नप्रतियोगिताको ग्राह्यः। नामार्थ ५२
योरभेदान्वयबोधे विरुद्धविभक्तिराहित्यं तन्त्रमिति प्रवादस्याप्ययमेवार्थः। एवं चैतादृशाभेदान्वयबोधसामग्रीसमानविभक्ति
कस्थलसाधारण्यस्थलेपीति। तत्राप्यभेदसंसर्गकशाब्दबोधो भविष्यतीति न दत्तउक्तरूपापेक्षया लाघवाद्विशेषणवाचकपदाव्य
वहितोत्तरत्वप्रकारकविशेष्यवाचपदज्ञानत्वेनैव हेतुत्वं कल्प्यते इति चेन्न। वस्तुतस्तु उक्तरूपेण हेतुताकल्पनेऽसंभव उक्तिकमेवम
वगन्तव्यं प्रमेयं दधीत्यादावपि अभेदसंसर्गकान्वयबोधसमाव्यभिचारात्। तत्र विशेष्यवाचकदधिपदोत्तरं विभक्तेरभावात्। विशेष

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्याकाङ्क्षावादः

ता वाचकपदस्य विशेष्यवाचकपदस्य विशेष्यवाचकपदात्तत्तरविभक्त्यभाववत्त्वरूपविरुद्धविभक्तिराहित्यविरहात् । न च विशेष्य

अजगति: वाचकपदनिष्ठस्य विशेषणवाचकत्व ॥ ॥श्रीः॥ ॥अथ प्रागभावे प्रमाणं॥ ननावद्ध्वंसोऽस्तु इदानीं घटप्रागभावे अप्रत्यक्षासि

द्धेः । घटो भविष्यतीति प्रत्यक्षस्य वर्त्तमानकालोत्पत्तिकालोत्पत्तिकत्वाभाववत्त्वेनैवोपपत्तेः प्रागभावासाधकत्वात् । न चाभाववत्त्वविना-

शित्वं पदार्थविभाजकोपाधिमत्त्वावच्छिन्नप्रतियोगिताकाभावात् नान्यथासिद्धिरिति वाच्यं । तादृशात्मनस्याप्रयोजकत्वात् । अथ प्रागभावा-

नङ्गीकारे घटस्य नित्यत्वापत्तिः सामग्रीसत्त्वात् । तदङ्गीकारे तु न सर्वदोत्पत्तिः घटोत्पत्तिकाले एव विनाशात् तत्सहितसामग्र्यभावे

न तदापत्तिः । न चोत्पन्नस्य घटस्य पुनरुत्पत्त्यापत्तिः तदालीनः तदुत्पादः । सत्त्वनाशादिप्रयुक्तत्वं शक्यते अप्रसिद्धत्वात् इति वाच्यं । न द्वयोरप्युत्त-

रक्षणे इदं पश्चात् अपि न सामग्र्यवच्छिन्नोत्तरत्वेनापादकेन प्रथमक्षणे प्रसिद्धस्योत्पादस्यापादयितुं अनन्तराक्षणे एव तद्

*घ्र३२ घटोत्पत्तिद्वितीयक्षणः यदि तत्सामग्र्यवच्छिन्नोत्तरः स्यात् । एतद्घटोत्पत्तिमान् स्यात् इति तन्न योग्यधर्मावच्छिन्नसामग्र्यवच्छि-

न्नोत्तरः स्वधर्मावच्छिन्नोत्पादवान् इत्यादि सामग्रीव्याप्तिरेव नाप्रसिद्धि येन तत्तद्घटोत्पत्तिसमानाधिकरणीयादिकं तु योग्यधर्माव

य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

च्छिन्नसामग्र्यपवर्तितोन्त्यः सन्तद्धर्मावच्छिन्नत्वाभावत्वमेव सामग्रीव्याप्तिः। तादृशव्याप्तिबलात् आद्यक्षणस्य तद्धर्मावच्छिन्न न
न सिद्धे अर्थात्तद्व्यक्षणसंबंधरूपोत्पत्तेर्निर्वाहात्। उत्पन्नस्यानंतर्भावेन व्याप्त्युपगमेक्षतिविरहात्। एवं तन्तद्घटोत्पत्तिद्वि
तीयक्षणेन हन्तुमेवापादनीयं। नचैवमेवेति। यदि चानुत्पन्नस्यांतर्भावेन सामग्रीव्याप्तिः तथापि न घटोत्पत्तिद्वितीयक्षणादेन
दापत्तिः जन्यद्रव्यत्वावच्छिन्नं प्रति द्रव्यत्वेन प्रतिबंधकत्वाभ्युपगमात्। न च व्यक्तित्वावच्छिन्नं प्रति तत्तत्प्रागभावत्वेनानंतकारण
तानां भनंतप्रागभावानां च कल्पनापेक्षया एतादृशैकप्रतिबध्यप्रतिबंधकभावकल्पनाया एव न्याय्यत्वात्। एतेन एतद्घट ४१
नाशोत्पत्तिक्षणे एतद्घटोत्पत्तिरपि निरस्ता। तत्पूर्वं तद्घटस्य प्रतिबंधकस्यैव सत्वात्। एतद्घटनाशानंतरं खंडघटोत्पत्तिकाले
एतद्घटोत्पत्तिवारणाय प्रागभावहेतुत्वकल्पनमावश्यकं इत्यपि नाशंकनीयं। नच यादृशसंयोगनाशानंतरं घटनाशस्तत्संयो
गव्यक्तेरेव हेतुत्वोपगमेन तदभावादेव खंडघटोत्पत्तिकाले तदापत्तिवारणात्। नच पत्रशतसंयोगात् व्यघटस्य दृशसंयोगना
शानंतरं खंडघटोत्पत्तिकाले तदापत्तिवारणाय विभिन्नगमनाविरहेण तादृशसंयोगहेतुत्वकल्पनापेक्षया तत्प्रागभावस्य हेतुत्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कालनमेवोचितमिति वाच्यं। एतद्घटनाशस्यैव प्रतिबंधकत्वकल्पनात्। न च तद्घटं प्रति तद्घटनाश्याभावस्य जनकत्वावछिन्नं प्र
तिइव्यक्ताभावावछिन्नाभावस्य च हेतुत्वकल्पनापेक्षया तद्घटं प्रति तद्घटप्रागभावत्वेन एव हेतुताकल्पनमेवोचितमिति वाच्यं। एवं च म
हाघटनाशोत्तरं खंडघटोत्पत्तये आरंभकसंयोगविरहात्। तत्र प्रागभावहेतुत्वकल्पनापेक्षया द्व्याभावहेतुताया एव क्षिती
यादिक्षणे तदापत्तिवारणाय क्लृप्तत्वात् न एवोपपत्तेः। एतादृशस्थले न हेतुताया आवश्यकत्वात्। प्रागभावादेर्हेतुत्वेपि भावि
खंडघटादेः तन्न घटोत्पत्तिद्वितीयक्षणे आपत्तिवारणाय द्व्याभावहेतुताया आवश्यकत्वात्। न च भाविखंडघटादीनां महाघटो
त्पत्तिकाले उत्पादवारणाय तन्महाघटादिनाशस्य हेतुताया आवश्यकत्वात् न तत एव क्षितीयादिक्षणे आपत्तिवारणासंभवात् द्व
यभावहेतुत्वे इति वाच्यं। यदा महाघटस्य तदा रंभककपालेकपालांतरसंयोगः। तत्क्षणे तद्घटनाशोऽन्तरा संयुक्तक
पालसहितमहाघटारंभकपालैः खंडघटारंभस्तत्र महाघटोत्पत्तिकाले खंडघटहेतोरन्यत्र संयोगविरहेणापत्तिविर
हात्। महाघटनाशहेतुताया अनावश्यकत्वात् क्षितीयादिक्षणे आपत्तिवारणाय द्व्याभावहेतुताया आवश्यकत्वात्। न चास्तु इ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ध्वंसाभावहेतुत्वं उभयवादिसिद्धं। तथापि न घटं प्रति न घटनाशाभावापेक्षया प्रागभावहेतुत्वमेवोचितमिति ननु घटनाशाभावहेतुत्वेन
घटनाशकालोत्पन्नपदार्थान्तरनाशाभावमादाय विनिगमनाविरहापादनादिति वाच्यं। न घटेऽपि न घट समानकालोत्पन्नपदार्था
न्तरप्रागभावमादाय विनिगमनाविरहसंभवात्। एतेन ज्ञानादिस्थले प्रमन्वष्टनहत्यादो निरस्तः स्वामन्त्रि द्वितीयतृतीयपक्षयो
स्तदुत्पत्तेः तत्तद्घटत्वावच्छिन्नं प्रति तत्तद्घटत्वेन प्रतिबंधकत्वाभ्युपगमेन वारणीयत्वात्। चतुर्थादिक्षणे तदुत्पादस्य तत्तद्घटत्वाव
च्छिन्नजनकतावच्छेदकीभूततत्तद्घटत्वावच्छिन्नविशेषणज्ञानादिविरहापादनासंभवात्। प्रागभावहेतुत्वेऽपि तद्घटेः पूर्वम् ४४
त्पादवारणाय विशेषणज्ञानादीनां तत्त्वेन हेतुतायाः आवश्यकत्वात्। न च धारावाहिकस्थले निर्विकल्पकस्य चतुर्थादिक्षणे आपत्ति
वारणाय प्रागभावहेतुत्वमावश्यकं। तत्र विशेषणज्ञानादीनां अहेतुत्वात्। चक्षुःसंयोगादीनां तृतीयादिक्षणेऽपि सत्त्वात् इति
वाच्यं। तत्र तन्नाशाभावस्यापि हेतुत्वोपगमात्। न च तत्तद्घटत्वावच्छिन्नं प्रति तत्तद्घटत्वावच्छिन्नाभावस्य नाशत्वावच्छिन्नाभा
वस्य च कारणत्वकल्पनापेक्षया तत्तद्घटत्वावच्छिन्नं प्रति तत्तद्घटप्रागभावत्वेन एकैकहेतुताकल्पनमेवोचितमिति वाच्यं। प्रा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गभावहेतुत्वेपिअतिक्रान्तप्रागभाववत्तद्व्यक्तित्वनियतपूर्ववर्तित्वयो:कल्पनीयतयातदपेक्षयाक्लृप्तयो:क्लृप्तनियतपूर्ववृ-
त्तित्वयोरन्यथासिद्धत्वकल्पनाएवोचितत्वात्।अथवाकालिकसंबंधेनतत्त्वज्ञानाधिकरणत्वंसम्यगेकमेवप्रतिबंधकत्वेकल्प्यते।
ततएवतृतीयक्षणादौनतदापत्ति:नचद्वितीयक्षणेतदापत्तिरितिवाच्यं।उत्पत्त्यनंतरभावेनसामग्रीव्याप्तेरनभ्युपगमात्।तद्ध्वंसस्य
तदानींसत्त्वात्।अस्तुवातादृशध्वंसाभावस्यकार्यसहभावेनहेतुता।अतउत्पत्त्यनंतरभावेनसामग्रीव्याप्त्यभ्युपगमेपिद्वितीयादि-
क्षणेनतदुत्पत्त्यापत्ति:।तदधिकरणसमयध्वंसस्यतदानींसत्त्वात्।वस्तुतस्तुसामान्यतोनिष्ठतात्कालिकविषयकज्ञानत्वावच्छिन्नं
प्रतितद्विषयकज्ञानत्वेनप्रतिबंधकत्वोपगमात्विशिष्टद्वितीयादिक्षणेनतदापत्ति:संभवतीतिध्येयं।यत्तुउत्पन्नज्ञानस्यधर्माधर्मौस्या-
द्वारतासम्यादृष्टत्वावच्छिन्नंप्रतिआद्यतत्त्वज्ञानप्रागभावत्वेनहेतुतयाप्रागभावसिद्धि:।आद्यतत्त्वज्ञानेचनस्वसमानाधिकरणत-
त्त्वज्ञानाधिकरणसमयध्वंसासमानकालीनत्वंस्वत्वाननुगमात्।एवंरूपनिवेशेचात्मनगौरवात्।किंतुस्वसमानाधिकरणप
स्वाधिकरणयं।तदप्यसत्।तत्त्वज्ञानध्वंसप्रतिबंधकतानभ्युपगमात्तत्त्वज्ञानेवतांआरभ्यवारणासंभवात्।अथैवंतत्त्वज्ञानो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्याद्यक्षणे न द्वितीयक्षणे चाऽदृष्टोत्पत्तिः। न च तत्त्वज्ञानोत्पत्तिकाले भवत्येवेति न उत्पादप्रसंग इति वाच्यं। नाऽदृष्टप्रागभावस्य कार्य
सहभावेन हेतुत्वोपगमादिति चेन्न तत्त्वज्ञानध्वंसस्यैव तत्त्वज्ञानस्यापि प्रतिबंधकत्वोपगमात्। एवमपि पूर्वोक्तरीत्या कल्पनालाघ
वसंभवात्। नादृष्टानुत्पत्तिवदस्य तत्त्वज्ञानप्रागभावत्वादिना हेतुत्वे किंतु तत्त्वज्ञानवदस्यतत्त्वप्रागभावत्वयोर्विशेषणविशेषणविशि
ष्टाभावेऽपि निगमनाविरहेण कारणताद्वयस्य भवतोऽप्यावश्यकत्वात्। वस्तुतस्तु अदृष्टत्वावच्छिन्नं प्रति वासनात्वेनैव हेतुत्वं कल्प
ते। अतो न तत्त्वज्ञानिनां धर्माद्युत्पत्तिः। तत्त्वज्ञानेन वासनानाशात्। वासनात्वं च मिथ्याज्ञानजन्यसंस्कारगतो जातिविशेषः। न ४५
च पटुतरत्वजात्या सांकर्यमिति वाच्यं। नादृशजातेर्मानाभावात्। एवं च तत्त्वज्ञानाभावे हेतुतापि न स्वीक्रियते वासनायाः कार्य
सहभावेनैव हेतुत्वोपगमात् तत्त्वज्ञानोत्पत्तिद्वितीयक्षणे एव च तन्नाशेन द्वितीयादिक्षणेऽदृष्टोत्पत्त्यसंभवात्। प्रथमक्षणेऽदृष्टो
त्पादाभ्युपगमेऽक्षतिविरहात्। न च तत्त्वज्ञानिनां वासनोत्पादवारणाय वासनां प्रत्येव तत्त्वज्ञानप्रागभावत्वेन हेतुत्वमावश्यकमिति
वाच्यं। मिथ्याज्ञानरूपकारणविरहेणैव तत्त्वज्ञानिनां वासनानुत्पादात्। मिथ्याज्ञानं प्रत्यपि वासनांतरस्य हेतुतया उत्पन्नतत्त्वज्ञा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नस्य मिथ्याज्ञानाद्यभावानुमानादिति। यत्तु आत्मविशेषगुणानां क्षणिकतावारणाय विभुसमवेतयोग्यविशेषगुणनाशत्वावच्छि-
न्नं प्रति स्वानंतरोत्पन्नविशेषगुणस्य हेतुता वाच्या। न च तादृशविशेषगुणेन हेतुत्वेन संभवतीति स्वत्वाननुगमात्। अतः स्वपूर्वत्वसंबं-
धेन स्वत्वेन गुणत्वेन वा हेतुता वाच्या। स्वपूर्वत्वं च न स्वोत्पत्तिक्षणावच्छिन्नध्वंसप्रतियोगिसमयवृत्तित्वं तस्याद्यैरननुगमात्। किंतु कालि-
कविशेषणतया स्वप्रागभाववत्त्वं तथा च नाशं प्रत्युक्तप्रागभावसंस्थेन तस्य नीतिन्यसमत्। प्रतियोगितासंबंधेन नाशत्वावच्छिन्नं प्रति स्व-
प्रतियोगिमत्त्वसंबंधेन नाशत्वेन हेतुताकल्पनात्। पदार्थमात्रस्यैव क्षणिकतावारणासंभवात्। ज्ञानानंतरोत्पन्नविशेषगु-
णस्य योग्यविभुविशेषगुणनाशकत्वानभ्युपगमात्। यत्तु प्रागभावानभ्युपगमे पाकजरूपरसगंधस्पर्शानां सामग्रीभेदाभावात्
अभेदापत्तिः सामग्रीभेदस्य कार्यभेदप्रयोजकत्वात्। प्रागभावहेतुत्वे तु स्वस्वप्रागभावस्य स्वस्वसामग्रीघटकतया तद्भेदादेव सा-
मग्रीभेद इति तदप्यसत्। रूपरसादिकं प्रति रूपरसात्यंताभावस्य हेतुत्वात्। तद्भेदेनैव सामग्रीभेदात्। न च रसात्यंताभावस्य रू-
पादिहेतुत्वमात्रदाय विनिगमनाविरह इति वाच्यं। तेजःप्रभृतौ रसाद्यभावसत्त्वेन रूपाद्युत्पादनं तदं रूपाद्युत्पत्ति[illegible]वारणाय तत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्याद्यभावहेतुतायाआवश्यकत्वात्। एतत्तुजन्यसत्त्वेनद्रव्यत्वेनकार्यकारणभावेनजन्यत्वाभिवेशेनिरुक्ताधारणापातात्। सन्नि
वेशनमावश्यकमितिनच्चनोसन्निमत्वउमन्नेरनभ्युपगमात्। किंतुप्रागभावप्रतियोगित्वंप्रतियोगितासंबंधेनप्रागभाववत्त्वंवाइत्यु
भयथापिप्रागभावस्वीकारआवश्यकइतितदप्यसत्। प्रतियोगितासंबंधेनध्वंसवत्वाभिवेशेनैवोपपत्तौप्रागभावानिवेशानर्थक्यात्
च४ नैप्रतियोगितासंबंधेनध्वंसवत्त्वंकालिकसंबंधेनघटत्वादिमत्त्वंनाभिवेश्यतास्यत्रविनिगमनाविरहेणानेनकार्यकारणभावप्र
संगात्प्रागभाववत्तादेस्तथात्वेतुकालिकसंबंधेनघटत्वादिमत्वनिवेशमादायविनिगमनाविरहोनाशंकनीयः। अवच्छेद ५६
कत्वेनैवप्रागभावसिद्धेस्तदीयावच्छेदकतायाधर्मिग्राहकमानसिद्धत्वादितिवाच्यं। कालिकसंबंधेनघटत्वादिमत्वस्यमहा
कालधारणतयाभिमत्वान्नतत्वविरहेणनच्चिवेशमादायविनिगमनाविरहःध्वंसवत्वमिसेनेप्यप्रसक्तिः। अत्राहुः। स्वनिष
कारणतंत्वादेःपदार्थान्तरनिवारणायतत्तत्स्मत्वावच्छिन्नप्रतितत्तत्स्मत्प्रागभावत्वादिनाहेतुतास्वीकरणीयेतिप्रागभावसिद्धिः
नचतत्वंतत्तेरूपत्वावच्छिन्नोसत्त्रोइत्यापत्तिःघटान्तरसेववत्त्वोसत्त्रे। तत्तत्स्मत्वावच्छिन्नत्वनापत्तिःसंभवति। तादृशस्मेस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कस्यचित् जन्यतानवच्छेदकतया आपादकाभावात्। मन्वादेश्चैव पटत्वावच्छिन्नं प्रत्येव जनकत्वादिति वाच्यं। नव्यक्तित्वादेः कार्यमात्र
वृत्तितया कस्यचित् जन्यतावच्छेदकस्यावश्यकमेव स्वीकरणीयत्वात्। अन्यथा पटत्वादावपि अन्यथात्वापत्तिः। नन्वेवमपि न
त्रसरत्वावच्छिन्नं प्रति तत्तत्तंतुत्वेन तत्तत्संयोगत्वेन वा हेतुत्वमभ्युपेयते। तत एव तत्त्वेन पटे तदापत्तिवारणसंभवात्। किं
प्रागभावेनेति वाच्यं। एकैकपटं प्रति सहस्राधिकतंतूनां तत्तत्संयोगानां वा तद्व्यक्तित्वेन हेतुत्वं कल्पनीयं तदपेक्षया एकस्य प्राग
भावस्य हेतुत्वकल्पने लाघवात्। न च तन्तुद्वयेन त्रयेण वा सत्त्वेन तन्तुनेन कथं सहस्रतन्त्वारब्धपटोत्पत्तिः तत्रापि तादृशप्रागभावसत्त्वा
त् इति तत्तत्तन्तूनां तत्तत्संयोगानां वा हेतुत्वकल्पने प्रागभावस्वीकारेप्यावश्यक इति वाच्यं। चरमोत्पन्नसंयोगस्यैकस्य व्यक्तित्वेन
हेतुत्वकल्पनेनैव विचतुरादितन्तुमात्रोत्पन्नोत्पत्तिवारणसंभवेन चतत्तत्तन्तूनां संयोगानां च हेतुताया निष्फलत्वात्। नन्वेव
मपि तन्त्वधिकरणतन्तौ तत्पटहेतुभूतचरमतन्तुसंयोगाभावादेव न तत्पटोत्पत्तिरिति वाच्यं। तत्संयोगव्यक्त्यनधिकर
णीभूततन्तुष्वपि तत्पटोत्पादानन्तरं तदनधिकरणतन्तौ तत्संयोगव्यक्तिविरहस्याकिंचित्करत्वात् चरमसंयोगहेतुताया न सम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वाच्येनान्वदन्यविकरणीभूतानंतावृपितत्वयोग्यादेर्न व्यभिचारात्। किंतु कालिकप्रमासत्वानन्तरत्वावच्छिन्नं प्रतिकालिकप्र
त्यासत्तेर्हेतुता। न चैवमपि कालिकप्रत्यासत्त्यानत्यादेः स्वोत्पत्तिक्षणोत्पन्नेन च चक्षुरादिकालावच्छेदेन कारणसत्वाद्व्यभिचारेऽ
वारस्यैवेति वाच्यं। नतूत्पत्तिक्षणप्राक्कालावच्छेदेन कारणसत्ववत् कारणाभावस्यासत्वेन व्यभिचारानवकाशात्। न चानव
ष्ठमनियतसंख्याव्यक्तेर्हेतुत्वोपगमेनैवैतन्नियमोपपत्तौ किं प्रागभावहेतुत्वेनेति वाच्यं। अन्यूनानतिरिक्तापेक्षाबुद्धिजन्य
संख्याव्यक्तीनां हेतुत्वे एकहेतुत्वे विनिगमनाविरहप्रसंगात्। न च नानात्वन्यूनाधिक्यापेक्षाबुद्धिजन्यस्य युगपदुत्पन्नसमनियतसंख्या ७
भेदेमानाभावात्। नैष दोष इति वाच्यं। एवमपि क्रमोत्पन्ननानासंख्याया हेतुत्वे विनिगमनाविरहात्। एवं गगनादिसाधार धा ५
णव्यापकसंख्याव्यक्तीनां हेतुत्वमपि दृष्ट्यविनिगमनाविरहो बोध्यः। गगनादेर्नाशाभावेन तत्समवायनाशत्वादिरूपकारणाविरहेण न
उत्पत्त्यापत्त्यसंभवात्। एतेनानन्तत्वानुमितिभेदस्यानावच्छिन्नहेतुत्वे खंडस्य हेतुत्वान्नैष दोष इति परास्तं। गगनादिसाधा
रणभेदमादाय विनिगमनाविरहापत्तेः व्याप्यधर्मस्य जनकतावच्छेदकसंभवे व्यापकधर्मस्य तथात्वासिद्धिनिरूपकत्वा॰

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दितिचेन्न तत्पटसमनियतभेदव्यक्तिमत्त्वेनैतत्तन्तुगगनादिसाधारणभेदस्यतंत्वेन वा हेतुत्वेप्येतादृशविनिगमनाविर
हस्य तावतापि वारणासंभवात् । न च तावत्तन्तुवृत्तिजातिविशेषसंयोगत्वमनादिविजातीयतंतुत्वेन हेतुत्वोपगमान्नैव क्रमशक्ति
वाच्यं । तादृशतंतूनां कतिपयैस्तंतुसहकृतैर्यत्र पटान्तरमारब्धं तत्र पटान्तरजनकतावच्छेदकजात्या उभयपटारंभकतं
तुषु सीकर्यानि कल्पनाया अन्याय्यत्वात् । तस्माद्देशनियमाय प्रागभावस्वीकार आवश्यकः । अथैवमपि विभक्ततंतुक
पटादिस्थले प्रागभावस्वीकारो निरर्थकः । तत्तन्तदारंभकसंयोगव्यक्तेर्हेतुत्वेनैव देशनियमोपपत्तेः । न च तंतुसंयोग
स्यतंत्वावच्छिन्नहेतुत्वे विनिगमनाविरह इति वाच्यं । तंतुद्वयहेतुत्वापेक्षया एकसंयोगस्य हेतुत्वे लाघवस्यैव विनिगमकत्वात्
न च तंतोः प्रत्येकहेतुतामादाय विनिगमनाविरह इति वाच्यं । प्रत्येकहेतुत्वे तद्भिन्नतंत्वादिवृत्तदनाधिकरणानंतानां वा पिनश्य
दोषापातप्रसक्तेः । एवं वस्तुतस्तंत्वारंभकपटस्थलेपि यत्र प्रथममेकः संयोगस्तदनंतरं च तद्भिन्नतंतुपटारंभकयावत्संयोगो
त्पत्तिसंगपतत्तत्र प्रथमसंयोगानंतरमेव तदुत्पत्तिवारणाय तदुत्तरोत्पन्ननिखिलसंयोगानां विनिगमनाविरहेणहे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तुतायां आवश्यकत्वात् प्रथमसंयोगध्वंसेऽपि हेतुत्वकल्पनयैव देशनियमोपपत्तेः प्रागभावस्वीकारो निष्फलः। नच
तत्संयोगानधिकरणत्वेनावपि तत्त्वटोत्पत्त्यादेर्व्यभिचारात्। कालिकप्रत्यासत्त्यैव तद्धेतुतायाः स्वीकरणीयतया नततो
देशनियमोपपत्तिरिति वाच्यं। क्रियैव संयोगस्थलवत्कार्यतावच्छेदकावच्छिन्नं यत्किंचिद्व्यक्त्यधिकरणाया व्यक्तेरन्य
तमाभाववृत्तिप्रतियोगितावच्छेदकभेदकूटवत्त्वधर्मवत्त्वरूपव्यापकताया एव कारणताशरीरे निवेशनीयतया तत्पदाधिकरणान्य
तकिंचिद्व्यक्तौ तत्संयोगत्वावच्छिन्नाभावसत्त्वेऽपि क्षतिविरहात्। अथ वा तत्तत्संयोगाधिकरणान्यत्वाविशिष्टसमवायस्य ४८
वतत्तत्संयोगनिरूपितकार्यतावच्छेदकसंबंधत्वाभ्युपगमान्नोक्तानुपपत्तिः। नचपरविशेषकादौ प्रागभावहेतुत्वे सि
द्धेयविशेषयोरिम्यादिनियमेन जन्यत्वावच्छिन्नं प्रतिप्रागभावत्वेनापि हेतुत्वमावश्यकमिति किं तत्कोपितत्सिद्धिरिति
वाच्यं। तादृशनियमे मानाभावादिति चेत्। नेत्यत एव तादृशस्थले प्रागभावस्थलविशेषेत्येवेति। अचैतादृशयुक्तासि
द्धस्य पदार्थस्य सप्रतियोगित्वादौ मानाभावः इति चिंतनीयं। वस्तुतस्तत्र जन्यज्ञानादिव्यावृत्तात्मनोयोगादिनिरूपित

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कार्यतायां प्रतियोगितासंबंधेन प्रागभावरूपजन्यजनकस्यावच्छेदकतया प्रागभावः संभवति। न च प्रतियोगितासंबंधेन ध्वंसव
त्वनिवेशेपि कालिकादिसंबंधेन घटत्वेवत्वनिवेशमादाय विनिगमनाविरहप्रसंगात्। न च ज्ञानत्वादिनिवेशस्यावश्यकतया मह-
हाः कालसाधारण्याभावात्। न चैकालिकविशेषणतासमवायोभयसंबंधेन ज्ञानत्वमेव जन्यतावच्छेदकं तथा च जन्यतावच्छे
दकस्य नित्यसाधारण्याभावान्न प्रागभावनिवेशो नास्ति कथं कार्यतावच्छेदककोटिप्रविष्टप्रागभावसिद्धिरिति वाच्यं उभय
संबंधस्यावच्छेदकतावच्छेदकत्वे उभयत्वेन प्रत्येकरूपेण वा नाशः उभयत्वस्य दुर्वचत्वात्। संख्यात्मकस्य तस्य समवायवृत्तेः
न चापेक्षाबुद्धिविशेषविषयत्वं। तत्र बुद्धिगतस्य विशेषस्यैव दुर्वचत्वात्। नान्यः अननुगमात्। यत्तु कालिकविशेषणता
ताविशिष्टसमवायसंबंधेन ज्ञानत्वस्यावच्छेदकत्वान्न दोष इति तन्न। कालिकविशेषणतावैशिष्ट्यं समवाये केन संबंधेन
वक्तव्यं सामानाधिकरण्यसंबंधेनेति चेन्न। तर्हि घटत्वादिविशिष्टसमवायस्यापि तथात्वमादाय विनिगमनाविरहः। न च सामा
नाधिकरण्यसंबंधेन कालिकविशेषणताविशिष्टज्ञानत्वमेव कार्यतावच्छेदकं वक्तव्यमिति वाच्यं ज्ञानस्य ज्ञानत्वविशिष्टकालि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कसंबंधेऽपि न घटत्वादिसामानाधिकरण्यनिरूपकतया तस्य घटत्वादिविशिष्टज्ञानत्वं न त्वेन घटत्वविशिष्टज्ञानत्वमात्रस्यापि
विशिष्टमताविरहसंभवात् । न च विषयितासामानाधिकरण्यसंबंधेन घटत्वादिविशिष्टज्ञानत्वं निमज्ञानेऽपि वर्त्तत इति सामानाधि
करण्यसंबंधेन घटत्वादिविशिष्टज्ञानत्वस्य निमव्याप्तत्वमिति वाच्यं । कालिकसंबंधावच्छिन्नसामानाधिकरण्यनावच्छिन्नत्वरूपसा
मानाधिकरण्यस्यैव निवेशनीयत्वात् । विषयितासंबंधावच्छिन्नसामानाधिकरण्येन कालिकविशेषणताविशिष्टज्ञानत्वस्यापि
निमसाधारणतया संबंधविशेषनिवेशस्य भवतोऽप्यावश्यकत्वात् । केचित्तु केवलनीलाद्यवयवारब्धस्य ते चित्ररूपापत्तिवारणाय ४९
चित्ररूपतावच्छिन्नं प्रति घटाभावहेतुतापेक्षया चित्रप्रागभावत्वेन हेतुतायाः कल्पयितुमुचितत्वात् प्रागभावासिद्धिः न च पत्र
पाकादिना नीलादिनाशानन्तरं अवयवेषु नानाजातीयरूपोत्पत्त्या चित्रमुत्पद्यते । तत्र चित्रप्रागभावस्यावश्यं स्वीकरणीयत्वात्
नीलाद्युत्पत्तिदशायामपि चित्रापत्तिवारणाय घटाभावहेतुत्वस्यावश्यकत्वे किं प्रागभावहेतुतयेति वाच्यं । तत्र पाकाधीना
वयवानन्तरारब्धावयविनि चित्ररूपस्यैवोत्पादात् पूर्वमेव नीलघटे चित्रप्रागभावानंगीकारादित्याहुः । परे तु धूमालिंगकानुमिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वावच्छिन्नं प्रति धूमपरामर्शत्वादिना हेतुत्वं स्ववृत्तिप्रागभावप्रतियोगित्वस्ववृत्तिकृतिमत्त्वउभयसंबंधेन धूमपरामर्शवत्त्वादि
रूपधूमलिंगकत्वस्य कार्यतावच्छेदककोटिनिवेशात् अन्यविधस्यानुगतस्य धूमालोकादिलिंगकत्वस्य दुर्वचत्वात्। प्रागभावस्वी
कार आवश्यकः एतेन प्रागभावस्य प्रतियोग्युत्पत्तिक्षणाविनाशस्य प्रामाणिकत्वमिति निरस्तं। प्रतियोग्युत्पत्तिक्षणे प्रागभावसत्त्वे
वह्निव्याप्यधूमवान्पर्वतो वह्निव्याप्यालोकवांश्चेत्याकारकसमूहालंबनात्मकान्यलिंगकानुमितेरपि तादृशोभयसंबंधेन धूमपरामर्शादिम
त्त्वप्रसंगात् एवं प्रागभावानंगीकारे अनुमितिसामग्र्यादीनां सिद्ध्यभावबाधाभाववैशिष्ट्यपरामर्शत्वादिना प्रतिबंधकताया
व्या। तत्र च तादृशसामग्र्या विशेष्यविशेषणभावे विनिगमनाविरहेण प्रतिबंधकतानंत्यापत्तेः। तदभ्युपगमे च सिद्ध्यभावबाधाभाव
परामर्शादिकमनिवेश्य स्ववृत्तिप्रतियोगिकत्वसंबंधेन कृतिविशिष्टानुमितिप्रागभावत्वेनैव प्रतिबंधकताकल्पने इति लाघवं
तादृशसंबंधेन कृतिविशिष्टः स्वप्रागभावप्रतियोग्यव्यवहितपूर्वक्षणे एव वर्तते अतो नानुपपत्तिः। यत्तु तत्त्वज्ञानस्य चरमदुः
खध्वंसत्वरूपमुक्तित्वजन्यतावच्छेदकं। चरमत्वं च दुःखनिष्ठा जातिः। गोत्वघटत्वजन्यतावच्छेदकजातिभिः सांकर्यप्रसंगात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

किंतु स्वसमानाधिकरणपावच्छिन्नकालिकविशेषणतासंबंधेन दुःखप्रागभाववदन्यत्वं न दिति प्रागभावस्वीकार आवश्य-
कमिति। न च सत्। स्वसमानाधिकरणपावच्छिन्नकालिकविशेषणतासंबंधेन दुःखवदन्यत्वस्य ध्वंसे निवेशादेवेदानींतनदुः-
खध्वंसे व्यभिचारवारणासंभवात्। न च वारणाय दुःखे चरमत्वनिवेशस्यैव कल्प्यादिति॥ ॥इति प्रागभाववादः

प्रागभाववा/५/प०

गदाधरः